# काव्यशास्त्रम्

POST GRADUATE PROGRAMME

SANSKRIT LANGUAGE AND LITERATURE

**M23SN03DC**




SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# काव्यशास्त्रम्

Course Code: M23SN03DC

Semester-I

## Discipline Core Course
## Master of Arts
## Sanskrit Language and Literature
## Self Learning Material

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# Documentation

Course Code: M231SN03DC

काव्यशास्त्रम्

Semester-I

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-966907-0-0

**Academic Committee**

Dr. Shyla C.A.
Prof. M.S. Muraleedharan Pillai
Pro. C.S. Sasikumar
Dr. K.M. Sangameshan
Dr. N.K Sundareswaran
Dr. Chandrashekaran Nair
Dr. Sreegith T.G.
Dr. J.P. Prajith
Dr. K. Unnikrishnan
Dr. C.T. Francis

**Development of the content**

Chitra Bhaskar, Anju. J

**Review**

Content: Dr. G. Sahadevan, Dr. Saritha Maheswaran
Format: Dr. I.G. Shibi
Linguistic: Dr. G. Sahadevan, Dr. Saritha Maheswaran

**Edit**

Dr. G. Sahadevan, Dr. Saritha Maheswaran

**Scrutiny**

Dr. Vincent B. Netto, Dr.Vijayarajan K.U,
Dr. Jothilekshmi M., Dr. Sreeja J.

**Co-ordination**

Dr. I.G. Shibi and Team SLM

**Design Control**

Azeem Babu T.A.

**Production**

December 2023

**Copyright**

© Sreenarayanaguru Open University 2023

# Message from Vice Chancellor

Dear

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum ‘access and quality define equity’. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centers around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavors.

Sreenarayanaguru Open University rests on the practical framework of the popularly known “blended format”. Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning experience. The post graduate programme in Sanskrit has a unique blend of language and literature. The focus of the programme is on enhancing the capabilities of the learners to undergo a deeper comprehension of the sociology of the forms in literature although the required credits are in place to learn other aspects of Sanskrit literature. Care has been taken to expose the students to recent trends in Sanskrit literature. We assure you that the university student support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.

Wish you the best.



Regards,

Dr. P.M. Mubarak Pasha 01.12.2023

# CONTENTS


| | |
|---|---|
| **Block -1** साहित्यदर्पणम् भागः1 | 1 |
| **Unit-1** काव्यलक्षणसामान्यपरिचयः परिच्छेदः1(काव्यस्वरूपम्) | 2 |
| **Unit-2** साहित्यदर्पणं परिच्छेदः-6 (सामान्यपरिचयः) | 27 |
| **Unit-3** साहित्यदर्पणम् परिच्छेदः-6 (दृश्यश्रव्यभेदौ रूपकभेदाः च) | 43 |
| **Unit-4** साहित्यदर्पणं परिच्छेदः- 6 (वृत्तिः, प्रस्तावना, पताकास्थानम्) | 54 |
| **Block-2** साहित्यदर्पणम् भागः 2 | 68 |
| **Unit-1** साहित्यदर्पणम् परिच्छेदः– 6 (अर्थोपक्षपकः, अर्थप्रकृतयः) | 69 |
| **Unit-2** साहित्यदर्पणम् परिच्छेदः - 6 (पञ्चसन्धयः वृत्तयः च) | 82 |
| **Unit-3** साहित्यदर्पणम् परिच्छेदः - 6 (भाषाविभागः) | 123 |
| **Unit-4** साहित्यदर्पणम् परिच्छेदः - 6 (प्रकरणम्) | 129 |
| **Block- 3** साहित्यदर्पणम् भागः 3 | 135 |
| **Unit-1** साहित्यदर्पणम् परिच्छेदः- 6 (भाणं,व्यायोगः,समवकारः) | 136 |
| **Unit-2** साहित्यदर्पणम् परिच्छेदः 6 (डिमः, ईहामृगः, अङ्कः) | 145 |
| **Unit-3** साहित्यदर्पणम् परिच्छेदः - 6(वीथी, प्रहसनम्)) | 152 |
| Unit- 4 साहित्यदर्पणं परिच्छेदः – 6(उपरूपकाणि) | 168 |
| **Block - 4** कुवलयानन्दः | 186 |
| **Unit-**1 अलङ्कारपरिचयः | 187 |

**Unit- 2** उपमा, रूपकम्, अनन्वयः, उल्लेखः, स्मृतिः,भ्रान्तिः,सन्देहः, अपह्नुतिः 192

**Unit- 3** उत्प्रेक्षा, अतिशयोक्तिः, तुल्ययोगिता, दीपकम्, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, स्वभावोक्तिः 200

**Unit- 4** समासोक्तिः, परिकरः, श्लेषः, अप्रस्तुतप्रशंसा, व्याजस्तुतिः, विरोधाभासः, काव्यलिङ्गं, अर्थान्तरन्यासः 210

**Model Question Paper (SET – A)** 220

**Model Question Paper (SET – B)** 222

# साहित्यदर्पणम् भागः 1

# BLOCK 1

UNIT 1

# काव्यलक्षणसामान्यपरिचयः

# परिच्छेदः-1(काव्यस्वरूपम्)

## Learning Outcomes

- काव्यस्य उत्पत्तिं,भेदं च अवगच्छति।
- काव्यस्य लक्षणं, स्वरूपं च ज्ञायते।
- संस्कृतसाहित्ये सौन्दर्यशास्त्रस्य ज्ञानम् अवगच्छति।
- वाक्यं रसात्मकं काव्यं इति काव्यलक्षणम् विशदयति।

## Background

संस्कृतसाहित्ये काव्यानां अद्वितीयं स्थानमस्ति। ततः साहित्यं नाम किमिति चिन्त्यताम्। तत्र शब्दार्थयोः सहितभावः एव साहित्यं इति उच्यते। कवेः कर्म काव्यम् इति काव्यपदस्य व्युत्पत्तिः। काव्यं दृश्यं श्रव्यञ्चेति द्विधा विभज्यते। श्रवणयोग्यं काव्यं श्रव्यकाव्यम्। दर्शनयोग्यं काव्यं दृश्यकाव्यञ्च। दृश्यकाव्यानां श्रवणयोग्यत्वमप्यस्ति। रघुवंशादीनि श्रव्यकाव्यानि, शाकुन्तलादीनि दृश्यकाव्यानि च। दृश्यकाव्यानां रङ्गमञ्चेऽभिनयद्वारा आविष्कारेणैव दर्शनयोग्यत्वसिद्धिः। दृश्यंकाव्यम् अभिनेयं भवति। तत्र च नटादौ रामादिस्वरूपारोपो भवति। अत दृश्यकाव्यं 'रूपकम्' इत्युच्यते। तत्र च श्रव्यकाव्यम्गद्य- पद्य-भेदेन द्विधा विभज्यते। **'श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा'**। (सा०द०६३१३) काव्यादर्शे दण्डी काव्यं त्रेधा विभजते- **'गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम्'**। पद्यं चतुष्पदी तच्च वृत्तं ,जातिरिति द्विधा। पुनः मिश्रकाव्यं अथवा चम्पूकाव्यम्। गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते। गद्यरूपेण पद्यरूपेण वा रसप्रकाशनपरतया प्रयुक्तानि वाक्यान्येव काव्यमिति उच्यन्ते।

गद्यकाव्येऽपि काव्यलक्षणं सर्वथा प्रस्फुरतीति गद्यबन्धोऽपि काव्यम् उच्यते। 'शब्दार्थौसहितौ काव्यम्' (भामह१.१६), 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनःक्वापि' (काव्यप्रकाश१.४), 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' (रसगङ्गाधर), 'वाक्यं रसात्मकं काव्यम्' (सा०द०१.३), इत्यादिषु लक्षणेषु रसात्मकत्वं, सगुणत्वम्, रमणीयार्थप्रतिपादकत्वं च काव्येऽपेक्ष्यन्ते। एते गुणा यथैव पद्यात्मके काव्ये वर्त्तन्ते, तथैव गद्यकाव्येऽपि। रसभावगुणालंकारादयो यथा पद्यकाव्ये उपलभ्यन्ते तथैव गद्यकाव्येऽपि एवमुभयोः साम्यं लक्ष्यते। अस्मिन् भागे विश्वनाथाचार्यस्य गते काव्यलक्षणं किमिति पठामः।

## Keywords

काव्यलक्षणं, शब्दार्थं, गद्यकाव्यम्,चतुर्वर्गफलप्राप्तिः, ध्वनिः, अलङ्कारः,काव्यस्योपादायत्वं, अव्याप्तिः, रसाद्यनुगमः, वक्रोक्तिः, रसादिरूपमात्रध्वनिः, काव्यस्यात्माध्वनिः, वाक्यं रसात्मकं काव्यम्, भावः, दोषाः, गुणाः।

## Discussion

### प्रथमः परिच्छेदः- काव्यस्वरूपम्

साहित्यदर्पणस्य प्रथमपरिच्छदे मङ्गलाचरणं, काव्यप्रयोजनं, काव्याङ्गं, काव्यफलं, काव्यलक्षणं, काव्यस्वरूपं, गुणस्वरूपं रीत्यलङ्काराणां प्रतिपादनश्च ।

**ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः सांमुख्यमाधत्ते-**

**शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी।**
**अपहृत्य तमः सन्ततमर्थानखिलान्प्रकाशयतु।।१।।**

**अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति काव्यफलान्याह-**

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।२।।**

व्याख्या- अल्पबुद्धीनामपि काव्यादेव चतुर्वर्गप्राप्तिः अनायासं लभते। तेन काव्यलक्षणमत्र प्रतिपाद्यते।

**चतुर्वर्गफलप्राप्तिर्हि काव्यतो 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इत्यादि कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव।**

**उक्तम् च(भामहेन) -**

**'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।। इति।**

व्याख्या- काव्यफलानि इति- धर्मार्थकाममोक्षभेदेन चतुर्वर्गाणाम् अनेकतयातत्प्राप्तीनामपि देशकालपुरुषभेदेन अनेकत्वत्काव्य फलानीति। प्रकृतोऽयं ग्रन्थो वृक्षस्थानीयः। अस्य तु शाखास्थानीयं सर्वमेव काव्यं ,

तथा च शाखादिसाद्गुण्येन वृक्षस्य साद्गुण्यमिव काव्यस्य फलैरेवास्य फलत्वमिति।

रसास्वादनिबन्धनः प्रीत्यतिशयः काव्यस्य फलम्

अथ काव्यस्य स्वरूपप्रतिपादनम्– यस्मात् कारणात् परिणतबुद्धीनाम् अपि अनायासात् काव्यादेव, काव्यरचनापठनाद्युपायादेवेत्यर्थः, एवकारेण दुरुह वेदादिशास्त्र व्यवच्छेदः चतुवर्गो धर्मार्थकाममोक्षसमूह एवं फलं तस्य प्राप्तिः भवतीति। तेन हेतुना काव्यस्य स्वम् असाधारणं ज्ञाप्यतेऽनेनेति परमार्थतस्तु रसास्वादनिबन्धनः प्रीत्यतिशयः काव्यस्य फलमित्यवधेयम्।

काव्यस्य चतुर्वर्गसाधनत्व निरूपणम्

काव्यस्य चतुर्वर्गसाधनत्वमुक्त्या निरूपयति। रामादि चतुर्वर्गकामेन रामादिवत् प्रवृत्तितव्यं रावणादिवत् न प्रवर्त्तितव्यं परदारहरणादावित्यर्थः। कृत्यं विहितकर्म अकृत्यं निन्दितं परदारापहरणादिकं कर्म तयोः प्रवृत्तिनिवृत्तौ तयोरुपदेशः तज्जनकं तदेव द्वारं व्यापारस्तेन, काव्यतो रामायणादेश्चतुर्वर्गप्राप्तिः अतिप्रसिद्धैव। अतस्तन्निरूपणाय यत्न विशेषो नावश्यक इति। एवञ्च तथाविधकाव्योपदेशात् कस्मिन् कर्मणि प्रवर्त्युदयेन तदनुष्ठानाद्धर्मप्राप्तिः तथाश्चार्थप्राप्तिश्च कामावाप्तिः, तद्धर्म फलाननुसन्धानाच्च मोक्ष इति स्पष्टमेव। काव्यात् चतुर्वर्गफलप्राप्तिरित्यवधेयम्। युक्तया चतुर्वर्गसाधनत्वमुपपाद्य सम्प्रति तत्रार्थे प्राचीनसम्मतिमुपपादयितुम् इति। साधुकाव्यस्य निषेवणं करणं मननं ज्ञानञ्च कर्तृ', धर्मार्थकाममोक्षेषु तदुपायभूतेषु वैचक्षण्यं विशिष्टज्ञानम्, कलासु गीतवाद्यनृत्यादि शैवतन्त्रोक्तचतुःषष्टिप्रकारविद्यासु च वैचक्षण्यं दर्शनश्रवणादिना विलक्षणज्ञानं कीर्त्तिं रचनाजनितं श्रवणोत्पन्न वाक्पटुतादिजनितञ्च कालिदासादेरिव यशः, प्रीतिं परमानन्दञ्च करोति।

**किञ्च काव्याद्धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना, 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति' इत्यादि वेदवाक्येभ्यश्च सुप्रसिद्धैव। अर्थप्राप्तिश्च प्रत्यक्षसिद्धा। कामप्राप्तिश्चार्थद्वारैव। मोक्षप्राप्तिश्चैतज्जन्यधर्मफलाननुसंधानात्, मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च।**

अर्थप्राप्तिः

व्याख्या- **अर्थप्राप्तिरिति-** श्रीहर्षादेर्धावकादीनामिव धनप्राप्तिः लोके प्रसिद्धः। धावक नामा कविः श्रीहर्षनृपनाम्ना रत्नावलीनाम्नीं नाटिकां निर्माय बहुधनं लब्धवानित्युद्द्योतादौ स्पष्टम्। अपि च किरातार्जुनीयमहाकाव्यप्रणेतारं भारवि 'सहसा विदधीत न क्रियाम्' एतत्पद्यनिर्माणे लक्षपरिमितं द्रव्यममिलदिति परम्परा श्रूयते।

**कामप्राप्तिरिति** - कामः स्रक्चन्दनवनितादिसम्भोगः, तस्य प्राप्तिः अर्थद्वारैव, अर्थेन स्रगादीनां सम्भवात्। तथा चोक्तमन्यत्र- धर्मादर्थस्ततः कामः कामात्सुखसमुन्नतिः' इति। इह तु काव्येन कामप्राप्तौ अर्थो व्यापारमात्रमिति काव्यस्य नान्यथासिद्धत्वम्।

मोक्षप्राप्तिः

**मोक्षप्राप्तिरिति-** इहापि पूर्ववदेव काव्यादित्यनुषञ्जनीयम्। काव्यजन्यस्य धर्मस्य यत्फलं स्वर्गादि तस्याननुसन्धानात् निर्माणकाले कवेः, श्रोतुरभिलाषविरहात्, न खलु कोऽपि कविः स्वर्गाद्युद्देशेन काव्यं करोति शृणोति वा। एवञ्च निष्कामेण सम्पद्यमानो धर्मो मोक्षायैव भवति। यदुक्तं भगवता 'युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्' इति। अनेकश्रुतिस्मृत्यादीनां प्रतिपादनात् मोक्षं ब्रह्मज्ञानेनैव भवतीति श्रूयते न पुनः काव्यादिति काव्यमन्यथासिद्धमिति चेत् अत्र मोक्षोपयोगीति। मोक्षोपयोगिवाक्यं 'तरति शोकमात्मवित्' इत्यादिमोक्षजनकं ब्रह्मज्ञानप्रतिपादकोपनिषदादिवाक्यं तत्र व्युत्पत्याधायकत्वात् नानाविध शब्दार्थज्ञानजननद्वारा दृढतरज्ञानोत्पादकत्वात् ।

**चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेवपरिणतबुद्धीनामेव जायते। परमानन्दसंदोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव।**

**ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीय इत्यपि न वक्तव्यम्। कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वेऽकस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्?**

**किञ्च काव्यस्योपादेयत्वमग्निपुराणेऽप्युक्तम्-**

> **'नरत्व दुर्लभं लोके, विद्या तत्र सुदुर्लभा।**
> **कवित्वं दुर्लभं तत्र, शक्तिस्तत्र सुदुर्लभा।।' इति।**
> **'त्रिवर्गसाधनं नाट्यम्' इतिच। विष्णुपुराणेऽपि-**
> **'काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च।**
> **शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः।।' इति।**

**तेन हेतुना तस्य काव्यस्य स्वरूपं निरूप्यते। एतेनाभिधेयं च प्रदर्शितम्। तत्किंस्वरूपं तावत्काव्यमित्यपेक्षायां कश्चिदाह- 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनःक्वापि' इति।**

**व्याख्या-** इहापि 'हि' इत्यस्य तथा हीत्यर्थः। वेदा ऋग्यजुःसामाथर्वाख्याः शास्त्राणि मीमांसादीनि तेभ्यः, नीरसतया काव्यतुल्यरसमुन्यतया,

'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि'

दुःखादेव न तु काव्यवत्सुखादित्येवम्। परिणतबुद्धीनामेव शास्त्रान्तरपरिशीलनात् परिपक्वबुद्धीनामेव न तु सुकुमारमतीनां इत्येवशब्दार्थः। चतुर्वर्गफलप्राप्तिर्जायत इति योजना। तथा च परिणत बुद्धीनां वेदशास्त्रेभ्यश्चतुर्वर्गप्राप्तिः सुखान्न भवति, सुकुमारमतीनां तु दुःखादपि न भवतीति भावः। पुनः किन्तु परमानन्दो रसादिरूपः तत्सन्दोहो विगलितवेद्यान्तरसन्ततिः तज्जनकतया, सुखादेव न वेदादिवद् दुःखादित्यर्थः। सुकुमारबुद्धीनामपि सुखैकप्रवणानां राजपुत्रादीनामपि न केवलं परिणतमतीनामित्यर्थः। काव्यादेव चतुर्वर्गफल्याप्तिर्जायत इति योजनः। एवञ्च न वयं वेदादिशास्त्राणां चतुर्वर्गसाधनत्वं व्यवच्छेदयामः

किन्तु वेदादिशास्त्रेभ्यः परिपक्वमतीनामेव कष्टसृष्टया सुकृतादिप्राप्तिसत्वेऽपि सुकुमारबुद्धीनान्तु कथमपि सुकृतादिप्राप्तिर्न भवतीति तेषां पक्षे चतुर्वर्गसाधनतायां वेदादिव्यबच्छेद इति प्रतिपादयामः।

नन्वेवं यदि भवताऽपि वेदादिशास्त्राणां धर्मादिसाधनत्वं स्वीकृतम्, तर्हि परिणतबुद्धिभिः 'स्वाध्यायोऽध्येतव्यः' इत्यादि निःसन्दिग्धवेदादिशास्त्रसत्वे प्राकृतलोककृतकाव्येषु चतुर्वगसाधनत्वे सन्देहोदयात् किमर्थं परिश्रमं करिव्यन्ति, न खलु ते सुकुमारमतयः अथवा मन्दमतयो येन काव्येषु स्वप्रवृतिं विदध्युरित्याशङ्कते। यत्नः करणीयः। सुकृतादिप्राप्त्यर्थं प्रवृत्तिः क्रियेत। उक्तामाशङ्कां परिहरति- न वक्तव्यं वाच्यम्। काव्यात्तावद्विनापि दुःखं रसास्वादचतुर्वर्गप्राप्तिश्च भवति, वेदशास्त्रेभ्यस्तु दुःखादेव सुकृतादिप्राप्तिरिति वेदाद्यपेक्षया काव्येऽधिकसमादर इत्युत्तरं लौकिकदृष्टान्तेनेति। अत्र कटुकपदं 'काकेभ्यो दधि रक्ष्यताम्' इति वाक्ये दध्युपघातकपरं दधिपदमिव तिक्तकषायादिद्रव्यपरम् सितशर्करापदञ्च सुस्वादुद्रव्यमात्रपरं च बोध्यम् । तथा च रोगोपशमक्षमे तिक्तकषायादिद्रव्ये सत्यपि यदि सुस्वादुद्रव्येण तदुपशमः सम्भवेत्तर्हि यथा रोगिणस्तिक्तकषायादिद्रव्यमपहाय रोगो-पशान्त्यर्थं सुस्वादुद्रव्यमेव सेवन्ते। तथा चतुर्वर्गसाधनक्षमाः सर्व एव नीरसतया च वेदादिशास्त्रमपहाय सुयोधतया'एक शब्दः सुप्रयुक्तः' इत्याद्यर्थवादात् 'काव्यं विरचनीयम्' 'काव्यं ज्ञातव्यम्' इति कल्पनीय विविज्ञापितितया च वेदादिवन्निःसन्देहेनैव चतुर्वर्गसाधनेषु काव्येषु प्रवर्त्तेरन्नित्यभिप्रायः।

अथ युक्त्या काव्यस्योपादेयत्वं प्रदर्श्य सम्प्रति तत्राप्तवचनमपि प्रमाणयितुम् इति। उपादेयत्वं धर्मादिसाधनोपायत्वेनोत्कृष्टबुद्धया हेतुत्वम्। उक्तं भगवता व्यासेनेति।लोकेऽस्मिन् जगति मानवशरीरधारित्वं दुर्लभं बहुपुण्यसापेक्षत्वेन दुःखलभ्यम्। तत्र नरत्वे सत्यपि शास्त्रज्ञानं सुदुर्लभा बहुतरपुण्यसापेक्षत्वादति दुर्लभा। तत्र विद्यायां सत्यामपि कवित्वं रसात्मकयत्किञ्चिद्वाक्यनिर्मातृत्वं सहृदयत्वं च दुर्लभं

बहुतमपुण्याधीनत्वात्। तत्र कवित्वे सत्यपि शक्तिः कवित्वबीजरूपः संस्कारविशेषः सुदुर्लभा पूर्वपूर्वापेक्षयाऽधिकपुण्यजन्यत्वादतिदुष्प्रापा। इह पूर्वपूर्वापेक्षया वस्तुनः उत्तरोतरस्य ग्राह्यत्वं प्रदर्शितम्।

नाट्यम् अभिनेयप्रधानं नाटकादि, त्रिवर्गो धर्मार्थकामस्तस्य साधनं जनकम्। तथा च लोकानां चित्ताकर्षकतया नाटकादेर्दर्शनश्रवणादिभिर्धर्मस्ततोऽर्थस्ततश्च काम इत्यभिप्रायः। समानन्यायात् नाट्यपदेन श्रव्यकाव्यस्यापि संग्रहः। 'इति चेत्यस्य 'आग्नेयपुराणेऽप्युक्तमिति पूर्ववाक्येन सह सम्बन्धः। इह हि नाटकादेर्दर्श-नवशादिभिरुत्पद्यमानस्य धर्मफलस्याननुसन्धानात् मोक्षोऽपि भवतीत्यवधेयम्।

काव्यस्य चतुर्वर्गसाधनत्वेऽग्निपुराणं प्रमाणयित्वाऽनिवृत्तो विष्णुपुराणमपि प्रमाणयितुम्। ये केचिद् दृश्यरूपाः श्रव्यरूपा वा काव्यालापाः कविपाठकैरुच्चार्यमाणा रसव्यञ्जकाः शब्दार्था इत्यर्थः, अखिलानि गीतगोविन्दप्रभृतीनि च एते शब्दमयस्य महात्मनो विष्णोः अवयवाः, एषामपि शब्दमयत्वात्। तथा च समस्तानां काव्यालापानां गीतकानां च शब्दमयस्यावयविनो विष्णोरवयवत्वेन तेषां दर्शनश्रवणादिभिरुपासनया चतुर्वर्गप्राप्तिरवश्यं भवति। एवञ्च सति 'त्रिवर्गसाधनं नाट्यम्' इत्यनेन काव्यस्य धर्मार्थकामानामेव साधनत्वमुक्तं न तु मोक्षस्येत्याक्षेपसमाधानमपि जातम्। कारिकास्थं चतुर्वर्गफलप्राप्तिरित्यंशं व्याख्याय, स्वरूपमितरव्यावर्त्तको धर्मः लक्षणमित्यर्थः। तेन चतुवर्गफलप्राप्तिरित्यादि मूलग्रन्थेन, अभिधेयकाव्यस्वरूपादि, अभिधायकश्चायं ग्रन्थः, चकारेण प्रयोजनसम्बन्धयोर्लाभः सम्बन्धश्चानयोरभिधेयाभिधायकत्वरूपः।

**काव्यस्य प्रयोजनं** तु चतुर्वर्गप्राप्तिः, अनया च सह काव्यस्य जन्यजनकत्वरूपः परम्परासम्बन्धः, एतज्जिज्ञासुरधिकारी। एवञ्चानुवन्धचतुष्टयस्य स्फुटतया निर्देशोऽभिव्यक्तो भवति। अथ यदि प्राचीनं काव्यलक्षणं निर्दुष्टं चेत्तदर्वाचीनं लक्षणान्तरम् अनावश्यकमिति प्राचीनलक्षणजातं दूषयितुं काव्यलक्षणं पृच्छति।

काव्यस्य प्रयोजनं चतुर्वर्गप्राप्तिः

अदोषौ श्रुतिकट्वादिसमग्रदोषरहितौ, सगुणौ माधुर्याद्यन्यतमगुणयुक्तौ, अनलङ्कृतौ अस्फुटालङ्कारावित्यर्थः। तथा च सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिरित्यभिप्रायः। एवम्भूतौ शब्दार्थौ, आस्वादव्यव्यञ्जकत्वस्योभयत्राप्यविशेषात् लक्ष्यतावच्छेदस्य व्यासज्यवृत्तित्वाच्च तत् काव्यम्। एवञ्च शब्दं विना काव्यत्वासम्भवेन शब्दप्रत्ययकालेऽर्थप्रत्ययस्यऽप्यावश्यकत्वान्न कश्चिद्विरोधः। तथा च सति दोषाभाववत्वे सति गुणालङ्कारशालि शब्दार्थत्वं काव्यत्वमिति मम्मटोक्तं काव्यलक्षणं फलितम् ।

एतच्चिन्त्यम्। तथाहि- यदि दोषरहितस्यैव काव्यत्वाङ्गीकारस्तदा-

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राऽप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसकुलं, जीवत्यहो रावणः।
धिग्धिक्छक्रजितं, प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः। इति।

अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात्। प्रत्युतध्वनि (स)त्वेनोत्तमकाव्यताऽस्याङ्गीकृता, तस्मात् अव्याप्तिर्लक्षणदोषः।

काव्यस्य लक्षणदोषम्

**व्याख्या-** एतत् लक्षणदूषणं- एतत् काव्यलक्षणमित्यर्थः, चिन्त्यं दूष्यत्वेन भावनीयम्। दोषमुपपादयति - काव्यसमिति, अङ्गीकरोति । 'तदा' इत्यस्य 'अस्य श्लोकस्य' इत्याद्युत्तरेण सम्बन्धः। न्यक्कारो ह्ययमेव इत्युदाहरणश्लोकं हनूमन्नाटके रावणस्योक्तिरेव। अयमेव तिरस्कारः यत् मे बहवः शत्रवः। तत्रापि असौ रामः तापसः। सः तापसः लङ्कायामेत्य एक एव सन् राक्षसकुलं निश्शेषेण व्यापादयति। तथापि रावणोऽहं जीवामि। शक्रजितं मेघनादं धिक्। हा कष्टम्। प्रबोधितवथः कुम्भकर्णेन वा किं फलं संजातम्? स्वर्गरूपक्षुद्रग्रामविधूनन व्यर्थस्फीतैः एभिः बाहुभिः किं फलम्? किमपि फलं न इत्याशयः।

द्वितीयो न्यक्कारः

उक्तलक्षणेऽव्याप्तिदोषमुद्भावयितुं लक्ष्यं प्रदर्शयति इति । इह 'एव' शब्दो 'हि' शब्दश्चोभयमप्येकार्थं सूचयति । अत्र 'अस्मद् शब्देन वक्तुः पूर्वकृता लौकिकचरितादिना (देवेन्द्रविजयादिना) तथा सम्बन्धवाचकषष्ठी विभक्त्या शत्रुभिः सह स्वसम्बन्धस्यानौचित्यं प्रकटितं भवति, तेन वक्तुः हार्दिकक्रोधोऽवगम्यते। एक शत्रुसत्तायामपि यस्य निर्वेद उत्पद्यते तस्यैव मे रामलक्ष्मणसुग्रीवादयोऽनेक एव रिपवः सञ्जाता इति न विद्यते निर्वेदपरिसीमेति 'अरयः' इत्यत्र बहुवचनेन ध्वन्यते। रिपुः प्रबलश्चेत्स्यान्तदा नैवंविधंदुःखमित्यत - तत्रापि तेष्वरिष्वपि असौ तुच्छ एको रामनामा, तापसो नितान्त निर्धनः, न तु पौरुपवान्, अयमपि द्वितीयो न्यक्कारः।

'असौ' पदेन विशेषहीनदशा चैवं प्रकारेणाभिव्यक्ता भवति यं तातो निजगृहान्निःसारितवान्, यो हि प्रतिवनं निराश्रितः इतस्ततः परिभ्रमति, यस्य भोजनाय कापि न व्यवस्था तथा शरीराच्छादनाय च किञ्चिद्वस्त्रमपि नास्ति, प्रियाविरहे रात्रिन्दिवं यो रोदिति तथा

तपोभिरतिकृशोऽस्ति स इति। 'अत्र' इति सर्वनाम्ना सन्निकटस्यापि किञ्चितमशक्यत्वात् स्वस्य नितान्ताकर्मण्यत्वं सूच्यते। स तापस एव राक्षसकुलं न स्वेकं न वा राक्षसान् निःशेषेण हिनस्ति। अयं **तृतीयो न्यक्कारः**। तिङ्प्रत्ययेन नासौ निष्क्रियो वर्त्तत इति ध्वन्यते। 'अहो' शब्देन च रावणे मृते सति इत्थम्भूतव्यापारे किमपि नादभुतमासीत्। शक्रम् इन्द्रमपि शक्रजिम्मेघनादः। तं धिक् धिक् नितान्तमेव निन्दामीत्यर्थः। इह धिग्धिगिति वीप्सिताव्ययेन तापसमपि हिंसितुमसमर्थत्वादिन्द्रजितोऽऽप्यकर्मण्यत्वं प्रतीयते। किं पदेन च भुजवैयर्थ्यं वृथापदेन तदुच्छूनत्ववैयर्थ्यश्चोक्तमिति न पौनरुक्त्यम्। विधेयस्य वाक्यार्थे प्रधानस्य अविमर्शः अप्रधानतया निर्देशो विधेयाविमर्शः, अयमेवाविसृष्टविधेयांश इति कथ्यते, तल्लक्षणं तु- 'विधेयस्यांशस्य विमर्शाभावेन गुणीभूतत्वमविमृष्टविधेयशत्वम्' इति ग्रन्थकृदेवाह। उद्देश्यविधेययोः पौर्वापर्यभावो नियन्त्रितः। तथा 'वृथोच्छूनैःइत्यत्र वृथास्वं विधेयं तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृदिति पदगतो विधेयाविमर्श इति द्विरूपो विधेयाविमर्शः। इह यो विशेषः स प्रतिपादयिष्यते। काव्यत्वं न स्यात् स्वन्मते दोषरहितशब्दार्थयोरेव काव्यत्वाभ्युपगमादित्यभिप्रायः ।

तृतीयो न्यक्कारः।

अथ यदि काव्यत्वमस्य नोपपद्यते लक्षणागमनात्तदाऽपि का हानिरित्याक्षेपसमाधानायेति। प्रत्युत वैपरीत्येन। अस्य श्लोकस्य ध्वनित्वेन व्यङ्ग्यार्थनिष्पद्यमानत्वेन उत्तमकाव्यता स्वीकृता 'इदमुत्तममतिशयिनि व्यङ्गये वाच्याद् ध्वनि कथितः' इत्युक्त्या त्वयैवेति। यद्वा ध्वनिकारादिभिः पूर्वाचार्यैरिति। तस्मादुक्तदोषविद्यमानेऽपि काव्यत्वाङ्गीकारात्, अव्याप्तिस्तन्नाम्ना लक्षणस्य निरुक्तकाव्यलक्षणस्य दोष इतरेतरभेदानुमानेऽसाधकत्वप्रयोजकः।

**ननु कश्चिदेवांशोऽत्रदुष्टो न पुनः सर्वोऽपीति चेत्, तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः, यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्यंशाभ्याम् उभयतः आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात्। न च कंचिदेवांशं काव्यस्य दूषयन्तः श्रुतिदुष्टादयो दोषाः, किं तर्हि सर्वमेव काव्यम्। तथाहि काव्यात्मभूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते। अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थाऽपि न स्यात्।**

व्याख्या- ननु विधेयाविमर्शदोषस्तावदांशिकस्तेन सर्वं काव्यं न दुष्टं किन्तु यत्किञ्चिदेव, एवञ्च निर्दोषांशे गुणालङ्कारसद्भावेन काव्यत्वं

स्यादेवेत्याशयेनाव्याप्तिदोषं परिहर्तुं शङ्कते इति। अत्र 'कश्चिदेवांशो' न्यक्कारो ह्ययमित्यंशः 'वृथोच्छूनैः' इत्यंशश्च दुष्टो दोषघटितः, न पुनः सर्वोऽपि समस्तोऽपीत्यर्थः। तथा च निर्दोषांशे गुणालङ्कारसद्भावेन लक्षणसमन्वयात् काव्यत्वमस्त्येव, ध्वनेर्विद्यमानत्वेनोत्तम काव्यत्वमपीत्याशयः।

यत्र यस्मिन्नंशे दोषो विधेयाविमर्शसद्भावः, सोऽशोऽकाव्यत्वप्रयोजकः लक्षणसमन्वयाभावादित्याशयः। यत्र यस्मिन्नंशे निर्दोषे भागे ध्वनिः स ध्वनिमानंशः उत्तमकाव्यत्वप्रयोजकः, तलक्षणसमन्वयादित्याशयः।

नित्यदोषानित्यदोषत्व व्यवस्थाऽपि न स्यात्

अंशाभ्यां दुष्टादुष्टभागाभ्याम् उभयतः काव्यत्वाकाव्यत्वाभ्यामाकृष्यमाणं परस्परं व्यावर्त्यमानमिदं पद्यं काव्यमकाव्यं वा किमप्येकतरत् न स्यात्, उदासीनमेव स्यादन्योन्याभावस्य व्याप्यवृत्तित्वादित्यर्थः।

ननु यत्रैकस्यैव विषयस्य विरुद्धधर्मयोगो भवति तत्रैव विरोधः स्यात्, इह तु दोषस्य यदङ्गस्य दूषकत्वं तस्याकाव्यत्वं ध्वनेश्च यदङ्कस्योत्कर्षकत्वं तस्योत्तमकाव्यत्वमित्युभयोर्विषयभिन्नत्वान्न कश्चिद्विरोधः।

श्रुतिदुष्टादयो आदिपदाद्विधेयाविमर्शादेः परिग्रहः। दोषाः दोषपदवाच्याः। सर्वमेव काव्यं काव्यत्वेनाभिमतं वाक्यजातं दूषयन्तः श्रुतिदुष्टादयो दोषपदवाच्या भवन्तीत्यर्थः। तथा च दोषाणां परम्परया रसदूषकत्वेनैव सर्वदूषकत्वमक्षतमित्यभिप्रायः।

उक्तमर्थं प्रतिपादयति। काव्यात्मभूतस्य साररूपतया काव्यजीव-नाधायकभूतस्य रसस्य अनपकर्षकत्वे तेषां श्रुतिदुष्टादीनां दोषत्वं न स्वीक्रियते रसापकर्षकाणां दोषत्वात्, भवतेति शेष। तथा च 'रसापकर्षका दोषाः इति दोषसामान्यलक्षणात् एकस्मिन् भागे सन्तोऽपि दोषाः काव्यत्वाभिमततत्तन्निखिलवाक्यव्यापकं रसमपकर्षयन्तीति तेषामपि तत्तन्निखिलवाक्यव्यापकतया दोषत्वं स्वीक्रियते।

ननु स्वकीयोक्तदोषलक्षणेन भवान् कथमस्मदीयं काव्यलक्षणं दूषयति, मन्मते तु 'विरक्तिजनका दोषा'। एवं विधमेव किञ्चिद्दोषलक्षणं वक्तव्यम्, एवञ्च सति उदाहृतश्लोकस्यादिवाक्यस्थितेन दोषेण वाक्यान्तरस्थितस्य

काव्यत्वस्य दूरीकर्त्तुमशक्यत्वेन निरुक्तकाव्यलक्षणे भवत्प्रतिपादित दिशाऽव्याप्तिदोषाभावादित्यतः। अन्यथा रसापकर्षकत्वेऽपि दोषत्वास्वीकारे, नित्यदोषश्च्युत संस्कृतिप्रभृतयः तेषां सकलरसापकर्षकत्वात्, अनित्यदोषा दुश्रवत्वादयः तेषां रौद्रादिरसे गुणत्वात्।

**यदुक्तं ध्वनिकृता-**

**'श्रुतिदुष्टादयोदोषा अनित्या ये च दर्शिताः।**

ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः।। इति।।

किञ्च एवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसम्भवात्।

नन्वीषदर्थे नञः प्रयोग इति चेत्तर्हि 'ईषद्दोषौ शब्दार्थौ काव्यम्‘ इयुक्ते निर्दोषयोः काव्यत्वं न स्यात्। सति संभवे 'ईषदोषो' इति चेत्, एतदपि काव्यलक्षणे न वाच्यम्, रत्नादि लक्षणे कीटानुवेघादि परिहारवत्। नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः किन्तूपादेयतारतम्यमेव कर्तुम्। तद्वदत्र श्रुतिदुष्टादयोऽपि काव्यस्य।

दोषाणां नित्यत्वनित्यत्वयोः प्रामाणिकत्वं निरसति

व्याख्या- दोषाणां नित्यत्वानित्यत्वयोरप्रामाणिकत्वनिरासाय दर्शयति। ध्वनिकृता आनन्दवर्धनेन। केनचिद् व्याख्यात्र 'अभिनवगुप्तेन' इति व्याख्यातम्, तदविचारितमेव रमणीयं सहृदयप्रमाणादित्यवधेयम्। अनित्या दोषाश्च ये श्रुतिदुष्टादयः सूचितास्तेऽपि न वाच्यार्थमात्रे न च व्यङ्गथे शृङ्गारव्यतिरेकिणि वा ध्वनेरात्मभावे, किं तर्हि? ध्वन्यात्मनि व्यङ्गयरूपे शृङ्गारे उद्धतवाच्यक्रुद्धवक्तृकातिरिक्तस्थलीयशृङ्गाररस एव त्यागयोग्याः, न तु रौद्रादिरस इत्यर्थः। इति इत्थं प्रकारेण उदाहृताः कथिताः, अन्यथा हि तेषामनित्यदोषतैव न स्यात्। 'शृङ्गार' इत्युचितरसोपलक्षणार्थम्, वीरशान्ताद्भुतादावपि तेषां वर्जनात्। 'एव' कारदानेन विशेषतोऽयमभिप्रायः- केवलं यदि शृङ्गारो वाच्यः अथवा कस्याप्यङ्गं वा शृङ्गारादतिरिक्तः कश्चिरसो व्यङ्गयस्तदा श्रुतिदुष्टत्वायो दोषत्वेन नाभ्युपेयते, अभ्युपेयते तदैव यदा शृङ्गारः ध्वनेरात्मा भवेदिति। उक्तलक्षणेऽव्याप्तिदोषं प्रदर्श्य सम्प्रति असम्भवतादोषमपि प्रदर्शयितुम्। एवं निर्दोषयोरेव शब्दार्थयोः काव्यत्वस्वीकारे, काव्यं काव्यलक्षणम् अत्यल्पा विषया लक्ष्याणि यस्य तत्तथाभूतं स्यात् प्रायेणैव दोषसम्भवादित्यभिप्रायः। निर्विषयं निर्लक्ष्यमित्यर्थः। सर्वथा सर्वतोभावेन निर्दोषस्य शब्दार्थोभयस्येत्यर्थः। एकान्तमत्यन्तमित्यर्थः। एकान्तमिति असम्भवादिति गौणक्रियाया एव 'स्तोकं पाक' इतिवद्विशेषणमित्यवधेयम्। काव्यमात्रे यस्य कस्यापि दोपस्य सम्भवादित्याशयः। तथा च क्लिष्टत्वाक्रमत्वादिदोषाणां काव्यमात्रेऽपि सम्भवादुक्तकाव्यलक्षणेऽदोषत्वविशेषणदानेऽसम्भवतादोषो दुर्वार एवेत्यभिप्रायः। ईषदर्थे अल्पार्थे। तथा च अदोषावित्यत्र नञः ईषदर्थत्वकरणेन ईषदर्थत्वस्य च बलवद्दोषराहित्यरूपत्वाद् बलवद्दोषरहितौ शब्दार्थौ काव्यलक्षणे सति 'न्यक्कारो ह्ययमेव मे यदरयः' इति पद्ये विधीयमानं विधेयाविमर्शदोषत्येषदोषरूपत्वादेव

नाव्याप्तिश्च्युतसंस्कारतादीनामेव प्रवलदोषत्वात् इत्याशङ्कितुरभिप्रायः। यदि केनचिन्निपुणतरकविना निर्दोषं काव्यं निर्मातुं शक्यते तदावश्यं तत्राव्याप्तिः स्यादित्युत्तरयति। तर्हि नञ् ईषदर्थत्वस्वीकारे 'अदोषौ'भवति, एवञ्च ईषदल्पो दोषो ययोस्तौ एवम्भूतौ शब्दार्थौ काव्यमिति लक्षणे उक्ते सति निर्दोषयोः कदाचित्कविना दोषाभावेन रचितयोः शब्दार्थयोः काव्यत्वं न स्यात्, ईषद्दोषत्वरूपकाव्यलक्षणस्य तत्राव्यापनात्। अथोक्ताव्याप्तिपरिहाराय पुनः शङ्कते सति सम्भवे दोषस्येति। एवञ्च सदोषाणां मध्ये बलवद्दोषरहितौ शब्दार्थौ काव्यमित्यर्थः सम्पद्यते। तथा च निर्दोषयोः शब्दार्थयोरुक्तोदाहरणे च बलवदोषाभावस्य विद्यमानत्वान्नाव्याप्तिरिति भावः। तद्दूषयति, सति सम्भवे ईषद्दोषावित्यपीत्यर्थः, बलवद्दोषरहितत्वमपीति तात्पर्यम्। काव्यलक्षणे दृष्टान्तत्वेनावाच्यत्वं प्रतिपादयति आदिपदेन सुवर्णादीनां परिग्रहः। कीटेनानुवेधो दंशनम्। पुनरादिपदेन मलिनत्वादि परिग्रहः। तस्य परिहारः।

**उक्तं च-**

**'कीटानुविद्धरत्नादिसाधारण्येन काव्यतया।**
**दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः '॥इति।**

**किञ्च। शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम्। गुणानां रसैकधर्मत्वस्य 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः' इत्यादिना तेनैव प्रतिपादितत्वात्।**

व्याख्या- 'गुणालङ्कारयुक्त शब्दार्थत्वं काव्यत्वं इत्येव लक्षणं ब्रूयात् न तु दोषाभाववत्वे सतीति तत्र विशेषणमित्याशयः। हि यस्मात् रत्नस्य रत्नत्वं व्तावहर्त्तयितुं न शक्ताः। किन्तु अपि तु उपादेयमुत्कर्षः भावे यत्प्रत्यंयः। तस्य तारतम्यं वैषम्यं कर्त्तुमीशा इत्यन्वयः। दुष्टेष्वपि दोषवत्स्वपि यत्र येषु वाक्येषु रसादीनां रसतदाभासभावादीनाम् अनुगमः प्रतीतिः, स्पष्टः, बलवद्दोषजन्यवैरस्यातिशयानभिभूत इति तात्पर्यम्। तत्रेत्यध्याहार्यम्, तेषु वाक्येष्वित्यर्थः।

गुणालङ्कारयुक्त शब्दार्थत्वं काव्यत्वं इत्येव लक्षणं ब्रूयात्

अनुपपन्नत्वे हेतु-'आत्मनः शौर्यादय इवाङ्गिनः प्रधानस्य रसस्य ये धर्मास्ते गुणा' इत्यादिना ग्रन्थेन, तेनैव काव्यप्रकाशकारेणैव, उक्तिमात्रमेव परमतया न स्वीक्रियेतेति भावः, रसैकधर्मत्वस्य केवलरसवृत्तित्वस्य प्रतिपादितत्वात्। तथा च गुणानां रसमात्रवृत्तित्वात्तैर्विशिष्टौ शब्दार्थौ न सम्भवतः।

**रसाभिव्यञ्जकत्वेनोपचारत उपपद्यत इति चेत्? तथाऽप्ययुक्तम्। तथाहि- तयोः काव्यस्वरूपेणाभिमतयोः शब्दार्थयो रसोऽस्ति, न वा? नास्ति चेत्, गुणवत्त्वमपि नास्ति, गुणानां तदन्वयव्यतिरेकानुविधायित्वात्। अस्ति चेत्? कथं नोक्तं रसवन्ताविति विशेषणम्। गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यत इति चेत्? तर्हि सरसावित्येव वक्तुं युक्तम्, न सगुणाविति। नहि प्राणिमन्तो देशा इति केनाऽप्युच्यते। ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जको शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्राय इति चेत्? न, गुणाभिव्यञ्जकशब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्राधायकत्वम्, न तु स्वरूपाधायकत्वम्। उक्तं हि - 'काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत् 'दोषाः काणत्वादिवत्, रीतयोऽवयव संस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्' इति।**

व्याख्या- शब्दार्थयोः रसाभिव्यञ्जकत्वेन स्वाश्रयहेतुना उपचरता परम्परासम्बन्धेन उपपद्यते सगुणत्व विशेषणमिति । उक्तं अर्थं खण्डयति। उपचारतः सगुणौ शब्दार्थौ काव्यमिति यदुच्यते तदित्यर्थः। कुतः अयुक्तमिति- तयोरुपचारः सगुणयोः। रसोऽस्ति न वेति रसस्य सद्भाव एव काव्यत्वं तदभावे वेत्यर्थः। प्रथमस्य तुच्छतया द्वितीयं पक्षं निराकरोति। तर्हि तयोः गुणवत्वमपि नास्तीत्यर्थः। कुत इति- गुणानां तस्य रसस्य अन्वयव्यतिरेकयोरनुविधायित्वात्। प्रकृते रसस्य सत्वे गुणसत्ता, रसाभावे गुणाभाव इति। रसाभावे गुणानामप्यभावात् सगुणविशेषणयुक्तमिति भावः। रसोऽस्तीति प्रथमपक्षं दूषयति। स्ववृत्तितावच्छेदक-समवायसम्बन्धेनात्मनि सत्वेपि स्वव्यङ्ग्यत्वसत्वेन शब्दार्थयोः पुना रसोऽस्त्येव, नहि समवायेन स्वावयवे तिष्ठन्नपि संयोगेन भूतले न तिष्ठेद् घट इत्युच्यते चेदित्यर्थः। अत्र दूपणमाह-- तदा काव्यत्वेनाभिमतयोः शब्दार्थयोरसवत्वमिति विशेषणं कथं नोक्तं तस्यात्यन्तावश्यकत्वात्। तमृते काव्यत्वानङ्गीकाराच्चेत्यर्थः।

गुणवत्त्वस्य शब्दार्थयोः सगुणत्वस्य अन्यधानुपपच्या अन्वयव्यतिरेकाभ्यां सरसत्वाभावेनासम्भवादित्यर्थः। एतत् सरसाविति विशेषणं लभ्यते तात्पर्येणाधिगम्यते। यथा शौर्यादिमन्तो देशा इत्युक्तावन्यथानुपपत्या प्राणिमन्त इति लभ्यते तथा सगुणौ शब्दार्थौ काव्यमित्युक्तौ सरसावित्यवश्यं लभ्यत इत्यभिप्रायः इति चेत्? तर्हि शब्दार्थयोः सरसत्वविशेषणस्यावश्यकत्वे इत्यर्थः। सरसाविति शदार्थयोर्विशेषणं वक्तुं युक्तम्। उक्तमर्थ व्यतिरेकदृष्टान्तेन द्रष्टयति इति। हि यस्मात्, केनापि

सचेतसा, शौर्यादिमत्वान्यथानुपपत्त्या प्राणिमत्वबोधसम्भवेऽपि 'प्राणिमन्तो देशा' इत्युच्यमाने सति शौर्यादिमन्तो देशा' इति नोच्यते किन्तु 'प्राणिमन्तो देशा' इत्येवोच्यते लाघवात् स्पष्टोक्तेश्चेत्यर्थः। तथा च 'सरसौ शब्दार्थौ काव्यम्' इत्येव वक्तुमुचितं न तु 'सगुणौ' लाघवात् स्पष्टवाक्यत्वाच्चेति भाव।

अथ शब्दार्थयोः सगुणत्व विशेषणस्याभिप्रायान्तरमाशङ्कते इति। तथा च माधुर्यौजःप्रसादाख्या ये गुणास्तदभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्य उत्कर्षाधायकत्वादित्युपदेशसूचकमेव शब्दार्थयोः सगुणत्व विशेषणं न तु काव्यलक्षणघटकमित्याशयः। उक्ताशयं दूषयति। उत्कर्षमात्राधायकत्वं रसादिमत्तया प्रतीतिजनकत्वम्। न तु स्वरूपाधायकत्वं काव्यत्वप्रयोजकत्वम्, तस्मात्तत्काव्यलक्षणे न वक्तव्यमिति भावः।

**एतेन 'अनलङ्कृती पुनःक्वापि' इति यदुक्तम्, तदपि परास्तम्। अस्यार्थः- सर्वत्र सालङ्कारौ क्वचित्त्वस्फुटालङ्कारावपि। तत्र सालङ्कार शब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात्।**

**एतेन 'वक्रोक्तिः काव्यजीवितम्' इति वक्रोक्तिजीवितकारोक्तमपि परस्ताम्। वक्रोक्तेरलङ्कारभूपत्वात्।**

व्याख्या- 'अनलङ्कृती पुनः क्वापि ' इति काव्यलक्षणस्य विशेषणमपि निरस्यति इति। एतेन प्राचीनैरलङ्कारादीनां कटककुण्डलादिसामान्येनोक्तत्वेन हेतुना। लक्षणे लक्ष्यप्रदर्शने च दोषं निरूपयितुं तन्मतसिद्धमस्य विशेषणस्यार्थं प्रतिपादयति। हि तथाहि सर्वत्रेत्यनेन तन्मते काम्यत्वेनाभिमतयोः शब्दार्थयोः यथाकथञ्चिदलङ्कारस्य सद्भावः परमावश्यक इति व्यज्यते। तत्र भवदुक्तकाव्यलक्षणघटकयोरित्यर्थः, सालङ्कारशब्दार्थयोः काव्ये उत्कर्षमात्रस्य न तु स्वरूपस्येत्यर्थः, आधायकस्याजनकत्वात्। तथा च काव्यलक्षणे शब्दार्थयोः सगुणत्व विशेषणवत्सालङ्कारत्व विशेषणमप्ययुक्तिमदित्यभिप्रायः। किञ्च अत्र 'तददोषावितिलक्षणे 'शब्दार्था'विति विशेष्यमप्ययुक्तम्।

काव्ये रसाद्यपेक्षयाऽप्यलङ्कारस्य मुख्यत्वं स्वीकुर्वतो वक्रोक्तिजीवितकारस्य मतं निराकर्त्तुम् इति। एतेन काव्येऽलङ्कारस्य कटककुण्डलादिवोत्कर्षमात्राधायकत्वेन हेतुनेत्यर्थः। वक्रा विचित्रा उक्तिर्वक्रोक्तिः, वैचित्यमलङ्कार इति सामान्यलक्षणमिति भावः। काव्यस्य जीवितं रसाद्यपेक्षया प्रधानमिति तात्पर्यम्। इति वक्रोक्तिजीवितकारोक्तं(कुन्तकः) अपि निराकृतमवगन्तव्यमिति। तत्कारणं, वक्रोक्तेर्वाक्यगतवैचित्र्यस्य अलङ्काररूपत्वात्।

तथा चालङ्काररूपायाः काव्ये उत्कर्षमात्राधायकत्वात् सापि तस्य जीवनं नैव भवितुमर्हति। न हि कोऽप्यप्रमत्तः कटककुण्डलादीनलङ्कारान् पुरुषस्य जीवनानि कथवितुं न लज्जत इत्यभिप्रायः।

एवं काव्यलक्षणं दूषयित्वा काव्यप्रकाशकृता अस्फुटालङ्कारोदाहरणे स्फुटालङ्कारं दर्शयति। यः कौमारहरः इत्यस्मिन् श्लोके। यः कौमारहर आसीतिति ,अधुनापि स एव हि उपभोक्ता पुमान्, वरः परिणेता (विवाहकर्ता) वर्तत इति। अत्रैकार्थाभ्याम् एव हि शब्दाभ्यां तज्जने उपपतेरत्यन्तासम्भवित्वं द्योत्यते। ता एव यासु चैत्रक्षपासु सुरत कृतस्तत्सजातीय एवेत्यर्थः। ते च तस्मिन् रतोत्सवे ये कदम्बानिला आसन् तत् सजातीय एवेत्यर्थः, उन्मीलिताभिस्तत्कालं प्रस्फुटिताभिः मालतीभिर्वासन्तिकाभिः तत्संस्पर्शैरित्यर्थः, सुरभयः शोभनगन्धाः प्रौढाः रत्युद्दीपनादिप्रागल्भ्यशालिनः, अतो मन्दत्वेऽविरोधः कदम्बानिला धूलिकदम्बवनसञ्चारिवाता अधुनाऽपि वान्तीत्यर्थः। अत एव तदनिलार्थं

अपि उत्कण्ठा नैव सङ्गच्छत इत्यभिप्रायः ।सा चैवास्मि तादवस्थ्येनाभिनवयौवना वर्त्ते,न तूत्कण्ठाहेत्ववस्थान्तरं प्राप्ता येनोस्कण्ठा प्रादुर्भवतीत्याशयः। तथापि तादृशतत्तसुरतसामग्र्य सत्येऽपि, तत्रेत्यस्य त्रिष्वपि सप्तम्यन्तविशेषणेष्वन्वयः, तत्र रेवारोधसि नर्मदानदीतीरे वेतसीवेष्टिततरुः वेतसतरुस्तस्य तलेऽधोदेशे, सुरतव्यापाराः सम्भोगानुकूलचेष्टरूपा लीलाः कुसुमभरणादिकाः प्रसाधनादिकाः स्मिताश्लेषचुम्बनादिकाश्च तासां विधौ सम्पादने, चेतोऽन्तःकरणं कर्तृ समुत्कण्ठते उत्सुकं भवतीत्यर्थः। एतेन तत्कालीनसुरतात्कश्चिदनिर्वचनीय एवानन्द आसीदिति प्रतीयते।

**यच्चक्वचिदस्फुटालङ्कारत्वे उदाहृतम्-**

**यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-**
**स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।**
**सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ**
**रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते। इति।**

**एतच्चिन्त्यम्। अत्र हि विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वम्।**

सन्देहसङ्करालङ्कारस्य स्फुटत्वम्

व्याख्या-स्फुटालङ्कारं दर्शयितुम् इति। एतदुक्तोदाहृतं चिन्त्यं स्फुटालङ्कारशालित्वेन विचारणीयम्। तद्दर्शयति- अत्र अस्मिन् पद्ये विभावनाविशेषोक्तिनिरूपितस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वं स्पष्टम्। तथा च कारणाभावेऽपि कार्योम्पतिर्विभावनेति विभा-वनालङ्कारलक्षणम्। प्रकृते च सुरतोपकरणादीनामुपभुक्तत्वरूपस्य कारणस्याविद्यमानत्वेऽप्यनुत्कण्ठारूपस्य तत्कार्यस्योत्पत्ति

कथनाद्विभावना। एवं कारणस्य विद्यमानत्वेऽपि कार्याभावकथनं विशेषोक्तिरलङ्कारः। प्रकृते च सुरतोपकरणः उपभुक्तवरूपस्य कारणस्य विद्यमानत्वेऽपि अनुत्कण्ठारूपस्य तत्कार्यस्याभाव कथनाद्विशेषोक्तिः। ननु यत्र कारणाभावबोधकः साक्षात् नञ्प्रयोगस्तत्रैव विभावनालङ्कारस्य स्फुटत्वम्, यथा 'अनायासकृशं मध्यम् इत्यादौ।

**एतेन-**

> **अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।**
> **रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति।।**

**इत्यादीनामपि काव्यलक्षणत्वमपास्तम्। यत्तु ध्वनिकारेणोक्तम् 'काव्यस्यात्मा ध्वनिः-' इति तत्किं वस्त्वलङ्काररसादि लक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा, उत रसादिरूपमात्रो वा? नाद्यः-पहेलिकादावतिव्याप्तेः। द्वितीयश्चेदोमिति ब्रूमः।**

काव्यस्यात्मा ध्वनिः

व्याख्या-अथ सरस्वतीकण्ठाभरणे भोजदेवेन 'अदोषम्' इत्यादिपद्ये कण्डतो लक्षणप्रयोजन दर्शिते, तत्र प्रयोजनं निर्विवादतया तत्परित्यज्य केवलं तल्लणं दूषयति इति। एतेना तददोषाविति लक्षणस्य काव्यलक्षणत्वाभावकथनेन 'अदोषम्' इत्यादीनां सरस्वतीकण्ठाभरणोक्तानामपि काव्यलक्षणत्वमपास्तमित्युत्तरेणान्वयः। अदोषं गुगवत्, अलङ्कारैरलङ्कृतं रसान्वितश्च काव्यं कुर्वन् विदधत् कविः कीर्तिं प्रीतिमानन्दं च विन्दति। एवंविधस्यैव परमोत्कृष्ट काव्यत्वादित्याशयः। विशेषतश्चात्र सरसाविति वचने श्रुत्यर्थत्वेन सगुणाविति वचनं समनन्तरोक्तरीत्या निरर्थकमित्यवधेयम् । आनन्दवर्धनाचार्येण' ध्वनिः ध्वन्यस्यर्थः काव्यस्यात्मा सारभूतः' इत्युक्तमिति। शब्दवाच्यार्थापेक्षयाऽधिकचमत्कारितया प्रतीयते योऽर्थः स ध्वनिरिति योगमर्यादया व्यङ्गयविशेषो ध्वनिरित्याख्यायते। तत्र दोषः- वस्तु अर्थमात्रम्, अलङ्कारो विच्छितिरूपोऽर्थ एव, रसः शृङ्गारादि वस्त्वलङ्काररसादयो लक्षणानि स्वरूपाणि यस्य सः। आदिपदाद् भावतदाभासादयोऽसंलक्ष्यक्मभेदा गृह्यते। रसादिरूपमात्र इति मात्रपदेन वस्त्वलङ्काररूपयोर्व्यावृतिः।

**ननु यदि रसादिरूपमात्रो ध्वनिः काव्यस्यात्मा, तदा-**

> **अत्ता थात्रनिमज्जति, अत्राहं, दिवसकंप्रलोकय।**
> **मा पथिक।रात्र्यन्धक! शय्यायां मम निमङ्क्ष्यसि।।**

**इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेत् ? न – अत्रापि रसाभासवत्तयैवेति ब्रूमः, अन्यथा 'देवदत्तो ग्रामं याति' इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। अस्त्विति चेत्? न, रसवत एव काव्यत्वाङ्गीकारात्।**

व्याख्या- द्वितीयः रसादिरूपमात्रध्वनिः काव्यस्यात्मेति यदि वदेत् तद् स्वीक्रियेत इत्यर्थः। तदा ओमिति ब्रूमः वयमपि तत्पक्षं स्वीकुर्मः इत्यर्थः, 'वाक्यं रसात्मकं काव्यम्' इत्यग्रेऽभिधीयमान लक्षणस्यैवास्मत्सम्मतत्वात् इत्यभिप्रायः। ओमिव्यङ्गीकारार्थमव्ययम्। मतद्वयं प्रत्येव तृतीयपक्ष आशङ्कते रसादिरूपमात्र एव न तु वस्त्वादिरूप इत्यर्थः।

'अत्ता अत्र निमज्जति, अत्राहं दिवसकं प्रलोकय।

मा पथिक! रात्र्यन्ध्यक! शय्यायां मम निमंक्षयसि॥ इति।

अव्याप्तिः

**अव्याप्तिः**- वस्तुमात्रस्य मच्छय्यास्थानमभ्रान्तमागच्छेत्याद्यर्थमात्रस्य व्यङ्गत्वे ध्वनित्वे रसरूपध्वन्यभावे चेत्यर्थः, कथं काव्यव्यवहारो रसादिरूपमात्रध्वनेः काव्यत्ववादिनस्तवेति। रसाभासवत्तयैव कुलटायाः परनायकविषयाया रतः प्रकटनात् शृङ्गाररसाभासरूप ध्वनिविद्यमानत्वेनैव न केवलं वस्तुमात्रस्य व्यङ्गत्वेनेत्यर्थः काव्यव्यवहार इति ब्रूम इत्यर्थः। तथा च नाव्याप्तिरत्र दोष इति बोध्यम्।

रसाद्यभावे अपि वस्त्वलङ्कारध्वनिसद्भावेन काव्ययाभ्युपगमे 'देवदत्तो ग्रामं याति' इति वाक्येऽतिव्याप्तिः स्यादिति तदुद्भावयति।

**काव्यस्य प्रयोजनं हि रसास्वादसुखपिण्डदानद्वारा वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रादीनां विनेयानां 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इत्यादि कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरन्तनैरप्युक्तत्वात्। तथा च आग्नेयपुराणेऽप्युक्तम्- 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति।**

**व्यक्तिविवेककारेणाऽप्युक्तम्- 'काव्यस्यात्मनि अङ्गिनि, रसादिरूपे न कस्य- चिद्विमतिः' इति। ध्वनिकारेणाऽप्युक्तम्- 'नहि कवेरिति वृत्तमात्रनिर्वाहेणात्मपदलाभः, इतिहासादेरेव तत्सिद्धेः' इत्यादि।**

व्याख्या- **काव्यस्य प्रयोजनम्**- रसास्वादमुखसन्तानप्रदानद्वारा। तथा च शब्दप्रधानेषु दुरूहेषु वेदेषु अर्थप्रधानेषु पुराणादिषु चायासबहुलेषु विमुखानां सुकोमलमतीनां हि गुणीभूतशब्दार्थेषु रसास्वादप्रधानेषु प्रथमं

तापसास्वादसुखोद्देशेन प्रवृत्तिस्ततः काव्यार्थानां कृत्याकृत्य प्रवृत्तिनिवृत्युपदेशपरतावधारणं भवतीति भावः।

काव्यस्य प्रयोजनम्

एतस्मिन् विषये प्राचीनमतं स्फुटं प्रदर्श्य अधुना आर्षमतमपि प्रमाणयति। वाचो वैचित्र्यं प्रधानं गुणाद्यपेक्षया उत्तमं यत्र तथाविधेऽपि, अत्र काव्ये रस एव न खल्वकारादिरित्यर्थः जीवितं जीवनाधायकम् ।

व्यक्तिविवेककारो महिमभट्टाचार्यः आत्मभूते, अतएव अङ्गिनि अलङ्कारादिसमस्तापेक्षया प्रधाने रसादिरूपे, आदिपदेन रसाभासादीना परिग्रहः। रसादीनां काव्यात्मना स्वीकारे न कस्यापि विमतिर्वर्तत इत्यर्थः। अन्यत्राऽप्यभिहितं तेनैव- 'नहि केचित् काव्यात्मनो रसादेरभावं भाक्तात्वं वा अभ्युपगच्छन्ति मुख्यवृत्या च काव्यात्मशब्दवाच्यो रसादिरेव युक्तः। तदभावे प्रतीयमानार्थान्तरसंस्पर्शे ऽप्यर्थापत्यादिवाक्यवत् काव्यस्य निर्जीवतापतेः' इति।

इतिवृत्तमात्रनिर्वहेण केवलसमाचारावलीरूपेण, कविनात्मपदलाभो न कवित्वपदोपलब्धिः। इतिहासादेर्महाभारतादेरेव सकाशात् तत्सिद्धरितिवृत्तनिर्वाहसिद्धेः। तथाच रसवद्वाक्येन वर्णनयैव कवित्वपदप्राप्तिः। इत्थञ्च रसवद्वाक्यस्यैव काव्यत्वम्, रस एव च काव्यस्यात्मेति फलितम्। एतेन वस्तुध्वन्यादेः काव्यत्वाभिधानं विरुद्धमिति विभावनीयम्।

**ननु तर्हि प्रबन्धान्तर्वर्तिनां केषांचिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्? न, रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन, प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात् तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसद्भावाद्दोषाभावादलङ्कारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्याद्गौण एव।**

**व्याख्या-** रसवद्वाक्यस्य काव्यत्वाभ्युपगमेऽपि अव्याप्तिमाशङ्कते। प्रबन्धान्तर्वर्त्तिनां रघुवंशमेघदूतादि सन्दर्भान्तर्गतानां नीरसानां केवलवस्त्वलङ्कारप्रधानानां वर्णितराजजनपदपर्वतादिपाषाणाश्च वैवस्वतो मनुर्नाम माननीयो मनीषिणां प्राप्यावन्तीनुदयनकथाको विधावृद्धान् इत्यादिपद्यानामुपलक्षणत्वेन नीरसानां गद्यानामपि, काव्यत्वं न स्याद्रसवत्वाभावादित्यर्थः। एवञ्च रसवद्वाक्यस्य काव्यत्वाभ्युपगमे अव्याप्तिरिति भावः।

प्रबन्धान्तर्वर्त्तिनां नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्यर्थः। तत्र कारणम् रसवत्पद्यं वक्ष्ययमाणं 'शून्यं वासगृहम्' इति पद्यम्। तत्र च परिचुम्ब्ये इत्यादिना सरसपदानि, तेषामेव साक्षाद्रसव्यञ्जकत्वात् शून्यमित्यादीनि तु नीरसपदानि, तेषां साक्षाद्रसव्यञ्जकत्वाभावात्। एवं मेघदूते रसवत्वं कश्चित्कान्ताविरहगुरुणा' इत्यादि विप्रलम्भशृङ्गारादिमत्पद्यं तदन्तर्गतानां नीरसानां वसतिम्'

इत्यादिपदानाम्, तेषां रसव्यञ्जकत्वाभावात् । प्रयन्धान्तर्वर्तिनां नीरसानां पद्यानामप्येवमेव व्यवस्थेति बोध्यम्।

**यत्तु वामनेनोक्तम्- 'रीतिरात्माकाव्यस्य' इति, तन्न, रीतेः सङ्घटनाविशेषत्वात्। सङ्घटनायाश्चावयवसंस्थानरूपत्वात्, आत्मनश्च तद्भिन्नत्वात्। यच्चध्वनिकारेणोक्तम्--**

**'अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।**

**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।' इति।**

**अत्रवाच्यात्मत्वं 'काव्यस्यात्माध्वनिः'- इति स्ववचन-विरोधादेवापास्तम्। तत्किं पुनः काव्यमित्युच्यते-**

**वाक्यं रसात्मकं काव्यम्-**

वाक्यं रसात्मकं काव्यम्

व्याख्या- संघटनाविशेषत्वात् गुणाभिव्यञ्जकशब्द विन्यासरूपत्वात्। तदुक्तं तेनैव 'विशिष्टा पदरचना रीतिर्विशेषो गुणात्मा' इति। ननु रीतेः संघटना विशेषरूपत्वेऽपि काव्यात्मत्वाभ्युपगमे को दोष इति। अवयवसंस्थानरूपत्वात्, काव्यशरीरस्य वाक्यस्य अवयवाः पदानि तेषां संस्थानं समुचितस्थाने निवेशस्वरूपत्वादित्यर्थः। आत्मनश्च = प्रकृते स्वीकृतस्य रसस्य च तद् भिन्नत्वात् अवयवसंस्थानभिन्नत्वात्। तथा च यथा प्राणिनः शरीरस्य स्थाने हस्तपादाद्यङ्गसन्निवेशः,तथा काव्यशरीरस्य वाक्यस्य यथास्थाने पदविशेषसन्निवेशो हि रीतिः कथं काव्यात्मा भवितुमर्हति? कथमपि नेत्यर्थः। सहृदयैर्मनस्विभिः श्लाध्योऽतिप्रशंसनीयः योऽर्थः काव्यस्यात्मा शरीरस्य जीव इव निरूपितः इति ,तस्य काव्यात्मभूतस्यार्थस्य वाच्यप्रतीयमानाख्यौ उभौ द्वौ भेदौ स्मृतौ कथितौ। तथा च वाच्यः अभिधेयस्वरूप एको भेदः, अपर प्रतीयमानः केवल लोकप्रतीतिसाक्षिको लक्ष्यव्यङ्ग्योभयात्मको भेद इति। काव्यात्मनः सहृदयश्लाघ्यस्यार्थस्य द्वौ भेदौलक्ष्यव्यङ्ग्यरूपाविति यथाश्रुतोऽर्थो लभ्यते। दूषयति- वाच्यस्य अभिधेयार्थस्य लक्ष्यार्थस्य च आत्मत्वं काव्यात्मत्वमुक्तम्। पूर्व 'काव्यस्यात्मा ध्वनिः' इत्यादिकारिकायां व्यङ् यार्थस्यापि काव्यत्वमभीप्सितम्। इत्येवं स्ववचनस्य विरोधाद् विसंवादादेव अपास्तम्, नैतदर्थं मया युक्त्यन्तरं प्रदर्शनीयमित्यर्थः। तथा च एकविषय एव मिथो भिन्नार्थवचनोपस्थापनेन प्रतिपादयितुरुन्मत्तताऽवगमात् क्वचिदपि विश्वासो न स्यादित्याशयः। एतेन केवलरसादिरूपव्यङ्ग्यार्थस्य काव्यात्मत्वमभिलषितचेत्तदा तदेव स्वमतमिति ध्वनितम्।

स्वाभिमतं काव्यलक्षणं प्रतिपादयति- रसात्मकं वाक्यं काव्यमित्यन्वयः। रसपदेनासंलक्ष्यक्रमभेदानां सर्वेषां परिग्रहः। तथा च

व्यञ्जकतासम्बन्धेन रसादिमद्वाक्यत्वं काव्यत्वमिति काव्यसामान्यलक्षणम्।

व्यञ्जकतासम्बन्धेन रसादिमद्वाक्यत्वं काव्यत्वमिति काव्य-सामान्यलक्षणम्

अथ प्रसङ्गात् 'शब्द एव काव्यमिति मत्वा कृतानि चिरन्तनाचार्याणां काव्यलक्षणानि प्रदश्यन्ते। तत्र काव्यादर्शे दण्डिना काव्यदीपिकायां कान्तिचन्द्रेण च 'इष्टार्थव्यवच्छिन्ना पदावलिः' इति काव्यलक्षणं कृतम्। एवं लङ्कारशेखरे तद्वृतिकारकेशवमिश्रेण- न च 'काव्यं रसादिमुद्वाक्यं श्रुतं सुखविशेषकृत्' इति, भोजेन सरस्वतीकण्ठाभरणे निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्। रसात्मकं कविः कुर्वन् कीर्त्ति प्रीतिश्च विन्दति॥' इति। जयदेवेन चन्द्रालोके - 'निर्दोषा लक्षणवती सरीतिर्गुणगुम्फिता। सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्॥' इति, पण्डितराजजगन्नाथेन 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' एत्येवंप्रकारेण काव्यलक्षणानि कृतानि। 'वाक्यं रसात्मकं काव्यम्' इत्यादि काव्यलक्षणश्चिन्त्यम्। वस्वलङ्कारप्रधानानां काव्यानाम् काव्यत्वापत्तेः। न चेष्टापत्तिः, महाकवि सम्प्रदायस्याकुलीभावप्रसङ्गात्। काव्यानुसारेण हि लक्षणव्यवस्था, न तु वैपरीत्येन। वर्णितानि च महाकविभिर्जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि, कविवाग्विलसितानि च। आस्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकम्, तच्च शब्देऽर्थे चाविशिष्टम्। तत्रापि रसोद्बोधकत्वाङ्गीकारात्। अर्थे अपि दृश्यकाव्य इव काव्यत्वम्।

**रसस्वरूपं निरूपयिष्यामः। रस एवात्मा साररूपतया जीवनाधायको यस्य, तेन विना तस्य काव्यत्वाऽभावस्य प्रतिपादितत्वात्। 'रस्यते इति रसः' इति व्युत्पत्ति-योगाद्भावतदाभासादयोऽपि गृह्यन्ते। तत्र रसो यथा-**

**शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै.**
**निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।**
**विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं**
**लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥**

रस्यते आस्वादयते इति रसः

व्याख्या- रस एव वस्त्वलङ्काररूपो प्रतीयमानोऽर्थ इत्यर्थः। आत्मा साररूपतया निरतिशयानन्दस्वभावाद् गुणादिसर्वापेक्षया श्रेष्ठरूपतया जीवनाधायकः उपादेयताप्रयोजको यस्य तत् रसात्मकमिति। रस्यते आस्वाद्यते इति रसः, 'रस-आस्वादनस्नेहनयोः' इति व्युत्पत्तियोगाद् अवयवार्थानुसारेणास्वादविषयत्वलाभादित्यर्थः। तत्र तेषु

रसभावतदाभासादिषु मध्य इत्यर्थः, रसः शृङ्गाररसः। तस्यान्यरसेभ्यो मुख्यत्वात्प्रथमं निर्देशः।

अमरुशतककाव्ये प्रथमावतीर्णमदनविकारमुग्धावर्णनपरं शून्यं वासगृहमित्यादि पद्यम्। बाला नवविवाहिता वधूः, केलिभवनं सखीजनादिरहितं विलोक्य निश्चलसखीसत्त्वाशङ्कया विशेषेण दृष्टा, निःशब्दं च यथा स्यात्तथा अन्यथा पतिनिद्राभङ्गः स्यादिति भावः, शयनात् किञ्चित् अपरकायेन स तु सर्वतः पतिनिद्राभङ्गेऽपि पार्श्वपरिवर्तनेन समाधातुं शक्यत्वादिति भावः, उत्थाय निद्राव्याजं प्रियाया अनुरागकार्यपरीक्षार्थं छलनिद्राम्, उपागतस्य आश्रितस्य पत्युः न तु प्रियस्य, अपूर्वसमागमेनानुद्भिन्नरसत्वाद् मुखं दीर्घकालं यावद् बुद्धिवैभवमिति तात्पर्यम्, निर्वर्ण्य अनुरागातिशयात् निद्रानिश्चयार्थं च स परीचयेत्यर्थः, विश्वासयुक्तं यथा स्यात्तथा, एतावताऽप्यभङ्गेन निद्रायां वास्तविकत्वभ्रमादिति भावः परिचुम्य परितः कपोलयोर्लोचनप्रान्तयोः चुम्बनं कृत्वा पत्युस्तं कपोलदेशं जातपुलकाम् आत्मनश्चुम्बनादुत्फुल्लरोमाङ्किताम् पुलकस्य सर्वाङ्गीणत्वेपि गण्डस्थल एव दर्शनात् ,लज्जया त्रपया नम्रमुखी नतानना स्थिता इत्यर्थः, हसता तत्र सर्वं रहस्यमयगतमथवा पूर्वं मत्प्रार्थनयाऽपि न प्रवृत्ताऽसि सम्प्रति कथमिति या व्याजनिद्राफलं त्वरितमेव लब्धमिति वा हासः प्रियेण तेन स्वामिना, चिरं लज्जापगमसम्भोगस्वीकारपर्यन्तमिति चुम्बिते तिसम्बन्धः।

**अत्र हि संभोगशृङ्गाराख्यो रसः।**

**भावो यथा महापात्रराघवानन्दसन्धिविग्रहिकाणाम् –**

> **यस्यालीयत शल्कसीम्नि जलधिः, पृष्ठे जगन्मण्डलं,**
> **दंष्ट्रायां धरणी, नखे दितिसुताधीशः, पदे रोदसी।**
> **क्रोधे क्षत्रगणः, शरे दशमुखः, पाणौ प्रलम्बासुरो,**
> **ध्याने विश्वमसावधार्मिककुल, कस्मैचिदस्मै नमः।**

**अत्र भगवद्विषया रतिर्भावः।**

**व्याख्या-** एतैर्विभावानुभावव्यभिचारिभावः साधारण्येनाभिव्यक्तः सामाजिक रतिभावः शृङ्गाररसरूपं प्राप्नोति।

संभोगशृङ्गाराख्यो रसः

अत्र को नाम रस इति अस्योपपत्तिः पूर्वमेवाभिहिता, विशेषस्तु रसविवेचनप्रकरणे प्रतिपादयिष्यते। भावो यथा-महापात्रराघवानन्दसन्धिविग्रहिकस्य पूर्वजो वंशधरः। महापात्र इति राजदत्तोपाधिः, महामन्त्री इत्यपि। अत्र भगवतो दशावतारवर्णनम्। यस्य नारायणस्य मत्स्यावतारे शल्कसीम्नि शरीरचर्म्मैकभागे जलधिः (समुद्रः)

अलीयत (अयुज्यत), समुद्रस्य तन्मात्रसम्बन्धात्। यस्य नारायणस्य कूर्मावतारे पृष्ठे जगन्मण्डलम् अलीयत लग्नमभवत्, तत्रैव जगतोऽवस्थानात्। यस्य वराहावतारे दंष्ट्रायां दशनमण्डले धरणी (पृथिवी) अलीयत। लघुवस्तुवदवातिष्ठत्। समुद्रनिमग्नाया धरण्या दंष्ट्रयोत्तोलितत्वात्। एतेन शल्कसीमपृष्टदशनानामत्यधिकविशालत्वं ध्वनितम्। यस्य नरसिंहावतारे नवे करजे दितिसुताधीशो दैत्यपतिर्हिरण्यकशिपुः अलीयत लयं प्राप्नोत् नखेनैव व्यापादितत्वात्। यस्य वामनावतारे पदे चरणे रोदसी द्यावापृथिव्यौ अलीयेतां लीने अभवताम्। पद्भ्यामेव द्यावापृथिव्योर्व्याप्तत्वात्। इह 'अलीयत' इत्यस्य वचनविपरिणामेन सम्बन्धः। यस्य परशुरामावतारे क्षत्रगणः क्षत्रियवर्गः अलीयत लयमगच्छत्, कोपेनैव विनाशितत्वात्। यस्य रामावतारे शरे बाणे दशमुखो रावणः आलीयत लयं प्राप्नोत् शरेणैव विध्वंसितत्वात्। यस्य बलरामावतारे पाणौ हस्ते प्रलम्बासुर एतन्नामदैत्यः अलीयत लयमलभत, हस्तेनैव व्यापादितत्वात्। यस्य बौद्धावतारे ध्याने विश्वं जगत् अलीयत लीनमभवत्, ध्यानेन गोचरीकृतत्वात्। यस्य च भगवतः कल्किनामावतारे अधार्मिककुलं म्लेच्छसमूहः अलीयत तन्मात्रेण विध्वंसितत्वात्। इह कल्क्यवतारस्य भविष्यत्वेऽपि 'धाता यथापूर्वमकल्पयत्' इत्यादिश्रुतेः पूर्वकल्पाभिप्रायेणातीतप्रयोगः। कस्मैचिद् विशेषतः प्रदर्शयितुमसम्भवात्यादनिर्वचनीयाय अस्मै नारायणाय पुरुषायेत्यर्थः, नमोऽस्त्विति शेषः। दशावतारस्यान्यत्र वर्णनं त्वेवम्-

'मत्स्यः कुर्मो वराहश्च नरसिंहोऽथ वामनः।

रामो रामः रामश्च बौद्धः कल्की च ते दश।' इति।

अस्मिन्नुदाहृते पद्ये, (क) भगवान् नारायण एव विषयो यस्याः सा तथोक्ता रतिरनुरागो भावः भावपदवाच्यः। तथा च भगवानालम्बनम्, तस्यालौकिकचारित्र्यमुद्दीपनम्, तेन च स्वात्मपकर्षनिवेदनम् अनुभावः, तदभिव्यङ्गयाःस्मृतिहर्षादयः सञ्चारिणो भावाः तदिति प्रतीयमाना भगवद्विषया रतिः सहृदयानां चेतसि कमपि चमत्कारं भावयतीति भावपदव्यपदेश्याऽसौ (रतिः) काव्यत्वबीजम्। अस्यापि लक्षणं प्रतिपादयिष्यते। इदं मध्यमकाव्यमिति केचित् ।

**रसाभासो यथा-**

**मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।**

**शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः।।**

**अत्र सम्भोगशृङ्गारस्य तिर्यग्विषयत्वाद्रसाभासः।**

**एवमन्यत्। दोषाः पुनः काव्ये किं स्वरूपाः? इत्युच्यन्ते-**

**दोषास्तस्यापकर्षकाः।**

**श्रुतिदुष्टापुष्टार्थत्वादयःकाणत्वखञ्जत्वादय इव, शब्दार्थद्वारेण देहद्वारेणेव, व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात्काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते। एषां विशेषोदाहरणानि वक्ष्यामः।**

भावपदव्यपदेशाऽसौ (रतिः)काव्यत्व बीजम्

व्याख्या- रसाभासोदाहरणम्- कालिदासीय-कुमारसम्भवे तृतीयसर्गे वसन्तवर्णनमिदम्। द्वौ रेफौ रेफयुक्तौ अवयवौ यस्य स द्विरेफो भ्रमरशब्दः। 'शब्दधर्मेणाऽप्यर्थस्य व्यपदेश' इत्युक्तः लक्षणया भ्रमरशब्दवाच्यो भ्रमररूपोऽर्थो ज्ञेयः। स्वां प्रियां भ्रमरीम् अनुवर्त्तमानः पक्षवायुना शुश्रूषमाणः सन् ,पुष्पमेव एकं पात्रं भाजनं तत्र, मधु तत्कुसुमरसं पपौ। कृष्णसारो मृगविशेषश्च शृङ्गेण स्पर्शेन आत्मनः सङ्कुचिते नयने यया तां मृगीं स्वां प्रियां हरिणीम् गात्रकण्डूयनेन सेवितवानित्यर्थः।

नन्वत्र सम्भोगशृङ्गारस्य विद्यमानत्वाद्रसाभासः कथमिति। तिर्यग्विषयत्वात् मानवेतरप्राणिगतत्त्वात्। रसाभासः रसस्य न्यग्भावित्वेन स्फुरणम्। अन्यद्भावाभासादि एवमूह्यमित्यर्थः। रसाभासलक्षणं भावाभासलक्षणमुदाहरणञ्च तृतीयपरिच्छेदे प्रतिपादयिष्यन्ते। दोषा इति तस्य काव्यस्येत्यर्थः, सर्वनामतत्पदस्य पूर्व परामर्शित्वात् वाक्यं रसात्मकं काव्यम्' इति काव्यस्य विधेयत्वेनाभिहितत्वाच्च। एतच्च वृत्तिकारोऽपि 'काव्यस्यापकर्षका उच्यन्ते' इत्यनेन स्वयमेवानुपदमुक्तवान्। तथा च दोषास्तस्य काव्यस्य अपकर्षका रसाद्यपकर्षोत्पादनद्वारा अपकर्षोत्पादकाः वर्त्तन्त इत्यर्थः।

काणत्वखञ्जत्वादयः शरीरधर्मा इति साक्षात् सम्बन्धेनात्मानम् अपकर्षयितुमसमर्था भवन्ति, अतस्ते यथा शरीरद्वारेण स्वाश्रयाश्रितस्वरूपपरम्परासम्बन्धेनात्मानमपकर्षयन्ति। तथा काव्यस्य शरीरभूतयोः शब्दार्थयोः धर्माः श्रुतिदुष्टत्वादयस्ते साक्षात्सम्बन्धेन रसादीनपकर्षयितुमसमर्था भवन्त्यपि शब्दार्थद्वारेण स्वायाश्रितत्वरूपपरम्परासम्बन्धेन रसादीनपकर्षयन्ति। अपि च यथात्मगता मूर्खत्वादयः एवात्मानमपकर्षयन्ति, तथा रसादिगता व्यभिचारिभावादेः स्वशब्दवाच्यस्यादयो दोषाः साक्षाद्वृत्तितावच्छेदक स्वरूपसम्बन्धेनैव रसादीनपकर्षयन्तीति तात्पर्यम्। रसमपकर्षयन्तो रसस्य न्यूनत्वं बोधयन्तः। तथा सति रसस्योत्कर्षेण काव्यस्योत्कर्षः, रसस्थापकर्षेण च काव्यस्य चापकर्ष इति फलितम्।

रसाभासः रसस्य न्यग्भावित्वेन स्फुरणम्

**गुणादयः किं स्वरूपा इत्युच्यते-**

**उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः।।३।।**

**गुणाः शौर्यादिवत्, अलङ्काराः कटककुण्डलादिवत् रीतयोऽवयवसंस्थानविशेषवत्, देहद्वारेणेव शब्दार्थद्वारेण तस्यैव**

काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते। इह यद्यपि गुणानां रसधर्मत्वं तथापि गुणशब्दोऽत्र गुणाभिव्यञ्जक शब्दार्थयोरुपचर्यते। अतश्च 'गुणाभिव्यञ्जकाः शब्दारसस्योत्कर्षकाः' इत्युक्तं भवतीति प्रागेवोक्तम्। एषामपि विशेषोदाहरणानि वक्ष्यामः।

गुणालङ्काररीतयः

**व्याख्या-** काव्ये दोषजिज्ञासानिवृत्यनन्तरं श्रोतुर्गुणाद्यवस्थितिप्रकार इति। गुणादयः काव्ये किंस्वरूपाः किमाकारेण सन्तो वद्यन्त इति पूर्ववद्विवरणम्। तथा च तस्य काव्यस्य उत्कर्ष हेतवः उत्कृष्टजनका इत्यर्थः। शौर्याः नामात्मगतः शत्रुविजयायुद्योगः, आदिपदेन सत्साहसादीनां परिग्रहः। एवञ्च गुणाभिव्यञ्जकशब्दार्थरहितमपि व्यङ्ग्यं सम्भवति तदपेक्षया गुणाभिव्यञ्जकशब्दार्थयोः काव्योत्कर्षकत्वमुपपन्नमित्याशयः। सगुण विशेषखण्डनावसरे 'गुणाभिव्यञ्जक शब्दार्थवत्वस्यापि काव्ये उत्कर्षमात्राधायकत्वम्' इत्यनेनेत्यर्थः।

# Summarised Overview

श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणो नाम प्रथमः परिच्छेदः। विश्वनाथमते काव्यलक्षणं तु 'वाक्यं रसात्मकं काव्यम्'इति। इतरेषामाचार्याणां मतानि संसुच्य स्वमतम् स्थापयति। चतुर्वर्गफलप्राप्तिः काव्यादेव जायते। काव्यस्य,ग्राह्यत्वं सर्वैरप्यङ्गीकृतम्। न्यक्कारौ ह्ययमेव इत्यस्मिन् श्लोके उत्तमकाव्यलक्षणं वर्तते। श्रुतिदृष्टादयः दोषाः काव्ये व्यक्तव्याः। अलङ्काराः काव्ये उत्कृष्टतां वर्धयन्ति। वक्रोक्तिः काव्यजीवितम् इति कुन्तकमतं विश्वनाथः नाङ्गीकृतवान्। वक्रोक्तिरलङ्कार एव। काव्यस्य प्रयोजनं रसास्वादनमेव। रसादिमात्ररूप एव काव्यस्यात्मा। काव्यस्यात्माध्वनिरिति आनन्दवर्धनः। रसप्रतीतिजनकं वाक्यमेव काव्यमिति विश्वनाथः। आनन्दवर्धनस्य काव्यलक्षणात् ईषद्भेदः। शून्यं वासगृहं विलोक्य यस्यालीयत शल्कसीम्नि इत्यादिषु श्लोकेषु रसात्मकत्वं भावात्मकत्वं च वर्तते। श्रुतिदुष्टापुष्टार्थादयः दोषाः काव्यस्य शोभां नाशयन्ति किन्तु गुणालङ्काररीतयः काव्यस्योत्कर्षहेतवः भवन्ति।

# Assignments

1. काव्यस्वरूपं विशदयत।
2. साहित्यदर्पणे प्रतिपादितं काव्यलक्षणानि विशदीकुरुत।
3. रसस्वरूपं निरूपयत।
4. काव्यस्य चतुर्वर्गसाधनत्वं प्रतिपादयत।
5. मम्मटदिशा काव्यलक्षणं काव्यभेदान् च लिखत।
6. काव्यफलानि लिखत।
7. अर्थप्राप्तिं प्रतिपादयत।
8. मोक्षप्राप्तिं प्रतिपादयत।
9. काव्यस्यलक्षणदोषं प्रतिपादयत।
10. गुणालङ्कारस्वरूपं लिखत।
11. काव्यस्य प्रयोजनं प्रतिपादयत।

## Suggested Readings


1. कविराजद्विजेन्द्रनाथशास्त्री,संस्कृतसाहित्यविमर्शः, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन वाराणसी।
3. T.K.Ramachandra Iyer, A Short History of Sanskrit Literature R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018


## References


1. Sahityadarpanam, Acharya Krishna mohan Sastri, Chaukhambha Samskrita Samsthan, Varanasi.
2. Sahityadarpanam, Ed. Devadetta Kausika, Bharathiyavidyaprakasan, NewDelhi
3. Sahityadarpanam, Ed. Saligramasastri, Motilal Banarsidass, New Delhi.


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# साहित्यदर्पणं परिच्छेदः-6 (सामान्यपरिचयः)

## Learning Outcomes

- संस्कृतसाहित्ये साहित्यदर्पणस्य प्राधान्यम्।
- साहित्यदर्पणे चतुर्विधाभिनयभेदान् प्रत्यभिजानाति।
- साहित्यदर्पणे नाटकविभागस्य ज्ञानम् अवगाह्यते।
- काव्यस्य रचनाशैली परिचयः।

## Background

कविराजस्य विश्वनाथस्य साहित्यदर्पणम् हि काव्यशस्त्रस्य विश्वकोश एव। विश्वनाथस्य हि कृतयः साहित्यदर्पणम्,काव्यप्रकाशदर्पणम्,राधवविलासमहाकाव्यं, कुवलयाश्वचरितकाव्यं, प्रभावतीपरिणय-नाटिका, चद्रकलानाटिका, नरसिंहविजयकाव्यं, प्रशस्तिरत्नावलीचेति।

साहित्यदर्पणो हि काव्यशास्त्ररत्नभूतो ग्रन्थः। अत्र हि दशपरिच्छेदाः सन्ति। प्रथमे काव्यविवेकः, द्वितीये शब्दशक्तयः, तृतीये रसनिरूपणम्, चतुर्थे ध्वनिविवेकः, पञ्चमे व्यञ्जनावृत्तिनिरूपणं, षष्ठे काव्यविभागः, सप्तमे दोषप्रपञ्चः, अष्टमे गुणनिरूपणं, नवमे रीतिनिरूपणं, दशमे शब्दार्थलङ्कारविचारः चेति। काव्यशास्त्रविषये वस्तुतस्तु विश्वनाथः मम्मटमेवानुसरति, किन्तु मम्मटमित्यत्र दूषयत्यपि। विशेषतः काव्यप्रकाशसम्मतं काव्यपरिभाषां सर्वात्मना दोषयति स्थापयति च स्वसम्मतं लक्षणं 'वाक्यं रसात्मकं काव्यम्' इति। साहित्यदर्पणे षष्ठे परिच्छेदे अनेके विषयाः सन्ति। तत्र वर्तमानानां कतिपयानां विषयाणां परिचायनाय प्रविशामः।

# Keywords

साहित्यदर्पणं, अलङ्कारं, रसनिरूपणं, अभिनयं, रीतिनिरूपणम्, नाचकं ख्यातवृत्तम्, भारति, अर्थोपक्षेपकाः, सन्धि, मुखं, प्रतिमुखं. गर्भः, विमर्शः, निर्वणं, वृत्ति, कौशिकी, सात्वती, आरभटी, नाटकभाषा।

# Discussion

तत्र वस्त्वलङ्काररसादिरूपेषु त्रिविधेषु ध्वनिषु रसध्वनेरेव मुख्यत्वमितरयोस्तु गुणीभूतत्वम्। चतुर्थपरिच्छेदे चासंलक्ष्य क्रमन्यङ्ग्यध्वनेरुदाहरणेषु रसभावावेव प्रदर्शितौ, न तु मम्मटवद्ध्वनेरन्तर्गतं तयोर्विस्तरेण वर्णनं कृतम्। रसवर्णनं तृतीयपरिच्छेदे सविस्तरेणातिसरलपद्धत्या प्रदर्शितम्। अपि च काव्यानन्दं ब्रह्मास्वादसहोदरत्वं निरूपितम् ।

काव्यानन्दं ब्रह्मस्वादसहोदरत्वम्

काव्यं दृश्यं श्रव्यञ्चेति द्विधा विभज्यते। श्रवणयोग्यं काव्यं श्रव्यकाव्यम्। दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रियते। रूपकाणामाशयं रसभावादिकञ्च अन्यूनतया सहृदयेषु संक्रामयितुं- सहृदयचित्तं कथावस्तुनोऽभिमुखं नीयन्ते इत्यत एव अभिनयसंज्ञाऽत्र प्रसज्यते। चतुर्विधा अभिनयाः सन्ति। ते च –1. आङ्गिकः 2. वाचिकः 3. आहार्यकः 4. सात्त्विकः– इत्येते। अभिनेयं रूपकमिति पर्यायाद्रूपकसंज्ञा हेतुं इति। तद् दृश्यकाव्यम्, रूपाणां समादिस्वरूपाणाम् आरोपात्देशाभिनयाभ्यां तदारोपस्यानेन बोधनाद्हेतोः रूपकमुच्यते। एवञ्च रूपयति अन्यस्य रामादेः रूपेणान्यान्नटाननुकरोतीति रूपकम्। नाटकम्, प्रकरणम्, भाणः, व्यायोगः, डिमः, समवकारः, ईहामृगः, अङ्कः, वीथी, प्रहसनम् इति संज्ञकानि दशविधानि रूपकाणि स्युः इति। दशविधं नाटकमभिधायाष्टादशविधं उपरूपकमभिधातुमाह।

## नाटकलक्षणम्

नाटकं ख्यातवृत्तं स्यात्

नाटकं ख्यातवृत्तं स्यात् इत्यादिना नाटकलक्षणमारभते। ख्यातवृत्तादयः दृश्यकाव्यस्य विशेषणम्। एवं च एतादृश यत् दृश्यकाव्यं तत् नाटकमित्यर्थः। नाटयति विचित्रं रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्त्तयतीति नाटकम्। मुख-प्रतिमुखादि पञ्चसन्धि समन्वितं भवति नाटकम्। 'धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः' इत्युक्तलक्षणो नायकस्य गुणविशेषो

विलासः। ऋद्धिरभ्युदयः। धैर्य गाम्भीर्य प्रियप्राप्त्यादीनां ग्रहणम्। तत्तद्गुणवत्ता तु नायकद्वारेव काव्यस्येति ज्ञेयम्। नानाविधविभूतिर्नायकाभ्युदयः। सुखदुःखसमुद्भूतिशृङ्गारवीरादि बहुतररसैः निरन्तरं व्याप्तं भवेत्। धीरोदात्तः नायकः। शृङ्गार वीर अङ्गी प्रधानरसो भवेत्। 'उत्कर्षहेतवे एक एव रसोऽङ्गात्वे निवेशनीय' इत्यर्थः। यत्तु - 'शृङ्गारवीरशान्तानां मध्ये यः कश्चिदेक एव रसो नाटके प्रधानतया निबद्धव्यः' इत्युक्तम्। अन्ये सर्वे रसाः अङ्गं प्रधानभावेनावस्थातुं शक्ष्यन्तीत्यर्थः। तत्र नाटके पूर्व प्रथमं पूर्वरङ्गः। स च नटाभिनयरूपरङ्गद्वारादि सूत्रधारनिष्क्रमणान्तक्रियाकलापः, तदाख्यं मङ्गलाचरणमित्यर्थः। ततः पूर्वरङ्गात् परं सामाजिकसमूहः सभा। तस्याः पूजा प्रशंसा, ततः कवेः संज्ञायाः यथारुचि कवेर्गोत्रं मातापितृणां परिग्रहः, नाटकस्य संज्ञा स्वरूपादिकथनमिति सम्बन्धः। अनन्तरम् आमुखं प्रस्तावना। यथाक्रममेतानि कविना निबद्धव्यानीत्यर्थः। कुशीलवाः सूत्रधारादिनटाः। रङ्गे नाट्यशालायां सम्भाव्यमाना ये विघ्ना नटादि दुरदृष्टजन्योपद्रवास्तदुपशान्तये नाट्य प्रयोक्तव्याः नटाश्रयः संस्कृतप्रायः भारतीवृत्तिः प्रयोक्तव्या।

भारतीवृत्तेर्भेदाः – प्ररोचना,वीथी, प्रहसनम्,आमुखं च

भारतीवृत्तेर्भेदं दर्शयति- प्ररोचना, वीथी, प्रहसनम्, आमुखञ्च एतान्यङ्गानि। अत्र एषु चतुर्षु अङ्गेषु। प्ररोचना श्रेषठा। प्रकर्षेण रुच्युत्पादनं यस्यां सेत्यन्वर्थेयं संज्ञा। सर्वेषां प्रशंसया प्रकृतनाटिकाभिनये श्रोतॄणां प्रवृत्युन्मुखीकरणात् प्ररोचना।
वीथीप्रहसने - तद्द्वयं मुखरूपकविशेषौ नाटकप्रभेदौ। तौ च संस्कृतेनैवेति तद्द्वयं भारत्या अङ्गम्। एते सूत्रधारेण स्वकार्योत्थैः स्वस्वकर्त्तव्य विषयम् आश्रित्यैवोपयुक्ताः प्रस्तुतं काव्यविषयं सूचयन्तीति चित्रैर्बहुविधैर्वाक्यैः यत्र अन्योन्यम् सम्यग्भाषणं कुर्वते तत्तु आमुखं विज्ञेयम्।

उद्धात्मकः,कथोद्धातः, प्रयोगातिशयः, प्रवर्त्तकः, अवगलितं च

ईदृश्याः प्रस्तावनायाः पञ्चभेदाः। ते उद्धात्मकः, कथोद्धातः, प्रयोगातिशयः, प्रवर्त्तकः, अवगलितं च। यत्र नराः अज्ञातार्थान् अन्यैः पादैः अर्थज्ञानाय पयुज्यते तत् उद्धात्यको नाम प्रस्तावनाभेदः। अथ द्वितीयं प्रस्तावनाभेदं प्रतिपादयति। सूत्रधारस्य वाक्यंम् अर्थं वा गृहीत्वा पात्रोपस्थितिर्यत्र स कथोद्धातः। अस्य पूर्वार्धं एव लक्ष्यम् उत्तरार्द्धस्य पताकाघटकत्वात्, अतश्च द्वितीयार्थस्य तत्रैवोपयोगः। एकस्मिन् प्रयोगे यदि अन्यः प्रयोगः प्रयुज्यते तेनैव हि तत्पूर्वविषयविचारस्यातिक्रमणं विधाय अन्यस्य विषयस्य विचारो विधीयते चेत् प्रयोगातिशयो नाम तृतीयः प्रस्तावनाभेदः स्यात्। सूत्रधारो यत्र प्रवृत्तं कालं (वसन्तादिसमयविशेषम्) आश्रित्य वर्णयेत्, तदाश्रयश्लेषादिद्वारा प्रवेशो भवति तत् प्रवर्त्तकं नाम तुरीयप्रस्तावनाभेदोऽवगन्तव्यः। पञ्चममवलगिताख्यं प्रस्तावनाभेदलक्षणं निरूपयति- यत्र प्रयोगे प्रस्तावनायाम् एकस्मिन् विषये समावेशात् अन्यद् उपमान कार्य

सूत्रधारेण सूच्यते तद् अवलगितमिति कथितम्। इतिवृत्तस्य भेदद्वयं- तयोरेकम् आधिकारिकज्ञानम् अपरं प्रासङ्गिकं च।

अर्थोपक्षेपकाः- अर्थान् सरसवस्तूति उपस्थापयन्ति ये ते अर्थोपक्षेपका पञ्चविधाः। ते विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः अङ्कमुखः च इति। वृत्तानामतीतानां वृत्तान्तभागानां संक्षिप्तार्थः, अङ्कस्यादौ प्रयोजितो विष्कम्भः। शुद्धसङ्कीर्णभेदेन द्विविधो विष्कम्भकः। प्रवेशक इति- अङ्कद्वयस्य अन्तर्मध्ये संस्कृतेतरभाषया नीचेन नीचाभ्यां नीचैर्वा पात्रैः प्रयोजितो रूपकांशविशेषः अप्रत्यक्षानर्थान् सामाजिक हृदये प्रवेशयति। अत्र नीचत्वं हि संस्कृतेतरभाषित्वादेव, तेन सख्यादिभिश्च प्रवेशकस्य प्रयोजितत्वम्। तृतीयमर्थोपक्षेपकं लक्षयति- जवनिका नटानां वेशस्थानम्। तस्या अन्तराले संस्थितैः पात्रैः कस्यचिद्वस्तुविशेषस्य सूचना सा चूलिका। अङ्कः अङ्कान्तरम् अवतरति एष सः अभिन्नत्वेन सः अङ्कावतारम्। अथ पञ्चममर्थोपक्षेपकं लक्षयति- एकस्मिन् सर्वेषामङ्गानां विषयसूचनद्वारा मुखं तेषां प्रथममित्यङ्कमुखम्। तच्चबीजार्थस्य व्यापकं लक्ष्यमाणार्थप्रकृतिविशेषस्य सूचकं भवेत्। अङ्कान्ते प्रविष्टः पात्रविशेषैरित्यर्थः। भिन्नस्य परिवर्त्तिनः अङ्कस्य अर्थसूचनात् विषयद्योतनात् अङ्कास्यम् अङ्कमुखं स्यात्।

विष्कम्भकः, प्रवेशक, चूलिका, अङ्कावतारः अङ्कमुखः च

## अर्थप्रकृतयः

'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् इत्युक्तदिशा सन्धिलक्षणं प्रकारान्तं तन्निरूपणायैव तद् घटकार्थप्रकृतीः निरुपयति। प्रक्रियते प्रयोजनं साध्यते आभिरिति प्रकृतयो हेतवः। तथा बीजं, बिन्दुः, पताका, प्रकरी, कार्यं च, एताः अर्थप्रकृतेः कारणानि इति।

बीजं, बिन्दुः, पताका, प्रकरी, कार्यं च

**बीजम्** - यत् अल्पमात्रं समुद्दिष्टम् आदौ अङ्कुरितं अवान्तरकार्याणि जनयति तथा फलस्य नायकमुख्योद्देश्यस्य प्रथमो हेतुः, तत् धान्यबीजवत् यत् वीजम् अभिधीयते।

**बिन्दु** - बिन्दुरूपांमर्थप्रकृतिं निरूपयति। सकलवृत्तान्तानां विच्छेदे समाप्तत्वेन लब्धविश्रामे अच्छेदस्य अविरामस्य कारणं विन्दुः। जले तैलबिन्दुवत्प्रसारितत्वात् बिन्दुरिति व्यपदेशः। केवलं बीजं मुखसन्धावादावेव निबध्यते,बिन्दुस्तु तदनन्तरमिति भेदः।

**पताका** - पताकारूपामर्थप्रकृतिं निरूपयति। व्यापि निर्वहणपर्यन्तं स्थायि वृत्तान्तः पताका इत्यभिधीयते।

**प्रकरी** - नायकवृत्तान्तस्य प्रकर्षं जनयतीति प्रकरी मता। पताकायां प्रासङ्गिकवृत्तस्य बहुदेशवृत्तित्वम् अस्यान्तु, प्रदेश विशेषवृत्तित्वमिति भेदः।

**कार्यम्** - यत् स्वशक्त्या शक्यम्, यस्य च सिद्ध्यौ समापनं सामग्रीसमवधानं तत्कार्यम् इति सम्मतम् ।

## कार्यस्य पञ्च अवस्थाः

आरम्भः,
यत्नः,प्राप्त्याशा,
नियताप्तिः ,
फलागमः

अस्य कार्यस्य पञ्चावस्था भवन्ति। आरम्भः, यत्नः प्राप्त्याशा, नियताप्तिः , फलागमः एताः पञ्च फलार्थिभिः प्रारब्धस्य कार्यस्य अवस्थाः। तत्र **आरम्भः**- मुख्यफलस्य नायकमुख्योद्देश्यस्य निष्पत्तये यत् उत्कटरागः आरम्भो भवेत्।

**यत्नः**--प्रयत्न इति। फलावाप्तौ नायकस्य नायिकाया वा प्रधानफलप्राप्तिविषये अतित्वरान्वितो व्यापारः।

**प्राप्त्याशा** -- हेतुसद्भावश्च उपायस्य प्रतिबन्धकस्य शङ्का च ताभ्यां तथोक्ताभ्यां, प्राप्तेः प्रधानफललाभस्य आशा प्राप्त्याशा भवेत्।

**नियताप्तिः**-- अपायस्य अभावतो निश्चिता फलप्राप्तिस्तु नियताप्तिर्भवेदिति शेषः।

**फलागमः**- यः समग्रफलोदयः फलसिद्धिः। सा फलयोगः फलागमो नाम अवस्था स्यात्। इयमवस्था पूर्वोक्तचतुरवस्थाभिः निष्पाद्या।

सन्धि लक्षयितुमवतारयति- पञ्चभिरवस्थाभिः आरम्भादिभिः योगात् इतिवृत्तस्य रूपकीयवृत्तान्तस्य पञ्चप्रकार एव भागा अंशाः पञ्च सन्धयः स्युः। एकस्य प्रधानफलस्य अन्वये घटकत्वसम्बन्धे सति अन्तरैकार्थसम्बन्धः सन्धिः। सन्धीयत इति सन्धिः। तथा च आरम्भ अवस्थायुक्तः बीजसमुत्पत्तिः मुखसन्धिः, यत्नयुक्तः प्रतिमुखसन्धिः, प्राप्त्याशायुक्तो गर्भसन्धिः, नियताप्तियुक्तो विमर्शसन्धिः, फलागमयुक्तः उपसंहृतिः निर्वहणसन्धिः इत्यर्थः । बीजस्य समुत्पत्तिर्भवति तद् मुखमिव मुखसन्धिः कथितम्। यत्र मुखसन्धौ उत्पत्या प्रवर्तते इति तस्य फलस्य मुख्यकारणं तस्य अनुरागरूपबीजस्य, तत्प्रतिमुखं मुखस्याभिमुख्येन वर्त्तत इति प्रतिमुखं नाम सन्धिः। पूर्वसन्धिद्वये किञ्चित् प्रकाशं नीतस्य मुख्यसाधनस्य सन्धौ मुहुः तिरोभावानुसन्धानवान् समुद्भेदः अभिव्यक्तिः भवति सा गर्भसन्धिः। यथानियमं विप्रकीर्णाः कविना यथास्थानमुपन्यस्ताः यत्र सन्धौ एकार्थं उपनीयन्ते कविनैव उपस्थाप्यन्ते तत् निर्वणम् उपसंहारसन्धिः। निर्वाणम् उपसंहृतिरिति पर्यायवाचका इति नार्थान्तरम् ।

मुखसन्धिः,प्रतिमुख
सन्धिः,गर्भसन्धिः,
विमर्शसन्धिः.निर्वह-
णसन्धिः

## मुखसन्धेर्द्वादशाङ्गानि

उपक्षेपः, परिकरः, परिन्यासो, विलोभनम् , युक्तिः, प्राप्तिः, समाधानं, विधानं, परिभावना, उभेदः, करणं, भेद एतान्यङ्गानि द्वादशसंख्यकानि भवन्ति।

**उपक्षेपलक्षणम्**- काव्यार्थस्य समुत्पत्तिः संक्षेपेण प्रथमोपस्थितिः, उपक्षेप इति स्मृतः।

**परिकरलक्षणम्** - समुत्पन्नस्य अर्थस्य बाहुल्यं पूर्वपिक्षया अतिशयेन सूचनं परिकरः।

मुखसन्धेर्द्वादश
अङ्गानि

**परिन्यासलक्षणम्-** तस्य काव्यभिधेयरूपस्येतिवृत्तस्य निश्चयापत्तिः परिन्यास इति।

**विलोभनलक्षणम्** - गुणानां सौन्दर्य्यादीनाम् आख्यानं विलोभनं नामाङ्गम् इति।

**युक्तिलक्षणम्** - कर्त्तव्यविषयाणां युक्तिप्रदर्शनम् सिद्धान्तबुद्धवा योगो युक्तिमाङ्गम्।

**प्राप्तिलक्षणम्-** सुखागमः पात्रविशेषस्य आनन्दावाप्तिः प्राप्तिः नमाङ्गम्।

**समाधानलक्षणम्-** बीजस्य 'अल्पमात्रं समुद्दिष्टम्' इत्यादि पूर्वोदितस्वरूपस्य,यदागमनं समाधानम्।

**विधानाङ्गलक्षणम्** - सुखदुःखाभ्यां कृतो विहितोऽर्थः विषयस्तद्विधीयत इति विधानं तन्नामाङ्कं स्मृतम्।

**भावनालक्षणम्** - कौतूहलपूर्विकाः वचनानि तु परिभावना नामाङ्गम्।

**उद्भेदलक्षणम्** - बीजार्थस्य 'अल्पमात्रं समुद्दिष्टम्' इत्याद्युक्तस्वरूपस्य आदिकारणस्य प्ररोहः उद्भेदः स्यात्।

**करणलक्षणम्** - प्रकृतार्थस्य समारम्भः करणं नामाङ्गम्।.

**भेदलक्षणम्-** संहितानां सम्मिलितानां भेदनं पृथक्करणमिति भेदो नामाङ्गम्।

## प्रतिमुखसन्धेः त्रयोदशाङ्गानि

विलासादीनि त्रयोदशाङ्गानि प्रतिमुखे सन्धौ स्युरित्यर्थः। विलासः, परिसर्पः, विधुतं, तापनं, नर्म, नर्मद्युतिः, प्रगमनं,विरोधः, पर्युपासनं,पुष्पं, वज्रं,उपन्यासः, वर्ण संहार इत्यपि।

**विलासलक्षणम्** – रतिलक्षणस्य भावस्य यो हेतुभूता भोगः विषयः प्रमदा पुरुषो वा तदर्था समीहा विलासः।

**परिसर्पलक्षणम्-** अभीष्टस्य नष्टस्य अदर्शनं गतस्य सतः अनुसरणमन्वेषणं परितः सर्पणमन्वेषणं परिसर्पस्तन्नामाङ्गम्।

**विधुतलक्षणम्** - प्रथमतः कृतस्य अनुनयस्य अपरिग्रहः, धृतमात्मनि धारिताद्विपरीतमिति विधुतं नामाङ्गम्।

प्रतिमुखसन्धेर्द्वादश अङ्गानि

**तापनलक्षणम्** - तापनं नामाङ्कं भवेत्। अतो ह्येकं मरणमेव केवलं शरणम् उपायान्तरादर्शनादिति भावः। अत्र सागरिकाया कामव्यथापाकरणोपायादर्शनात् तापनम्।

**नर्मलक्षणम्** -परिहासवचः उपहासवाक्यं नर्म नामाङ्गम्।

**नर्मद्युतिलक्षणम्** - परिहासजा परिहासे सत्यपि जाता धृतिधैर्य्यन्तु नर्मणो द्योतनं नर्मद्युतिर्नामाङ्गम्।

**प्रगमनलक्षणम्** - उत्कृष्टतरोत्तरस्वरूपं प्रकर्षेण उत्कृष्टरूपेण गमनं यस्य तत् प्रगमनं नामानं स्यात्। अत्र मया नामेत्यादेरुकृष्टतरोत्तरवाक्यत्वात् प्रगमनम्।

**विरोधलक्षणम्** - व्यसनप्राप्तिर्विपत्प्राप्तिः सम्पत्प्राप्तेविरोधित्वात् विरोधो नामाङ्गम्।
**पर्युपासनलक्षणम्** - कुद्धस्य शान्तये पुनरनुनयः प्रसादनं पर्युपासनम्। अविहितस्याविचारितकर्मणः शान्तये पुनरनुनयात्पर्युपासनम्।.
**पुष्पलक्षणम्**- विशेषवचनम् उत्कर्षविशेषबोधकं वाक्यम् पुष्पवत् चित्तापकर्षणात् पुष्पं नामाङ्कम्।
**वज्रलक्षणम्**- अत्र राजानं प्रति देव्यै निवेदयिष्यामि इति वचनस्य साक्षात् कठोररूपत्वात् वज्रम् भवति।
**उपन्यासलक्षणम्** - प्रसादनं प्रसन्नताजननम् नामाङ्गम्।
**वर्णसंहारलक्षणम्** - चत्वारो वर्णा एव चातुर्वर्ण्यम्। तस्य चातुर्वर्ण्यस्य ब्राह्मणक्षत्रियविट्शूद्रस्य, उपगमनम् उपस्थितिरेकं मेलनमिति यावत्, वर्णानां संहारो मेलनं यत्र स वर्णसंहारो नामाङ्गमिष्यते।

## गर्भसन्ध्यङ्गनिरूपणम्

त्रयोदश गर्भसन्ध्यङ्गानि

गर्भसन्धेः त्रयोदशाङ्गानि -अभूतहरणं, मार्गः, रूपं, उदाहरणं, क्रमः, सङ्ग्रहः अनुमानं, प्रार्थना, क्षिप्तिः, त्रोटकं, अधिबलं, उद्वेगं, विद्रवम् इत्यादि।
**अभूताहरणम्** - व्याजाश्रये छलसंबद्धं वाक्यम्। अभूतस्य- असत्यस्य आविष्करणं यत्र तत् अभूताहरणं नामाङ्गम्।
**मार्गः** - स्वाति तस्वार्थस्य यथार्थकर्त्तव्यविषयस्य कथनं मृग्यते इति मार्ग नामाङ्गम्।
**रूपम्** – वितर्कवत्वाक्यं रूपम्।
**उदाहरणम्** - उत्कर्षसूचनं वाक्यम्।
**क्रमम्** -'निर्विकारात्मके चित्ते भावस्य तत्वोपलब्धिः क्रमं नामाङ्गं स्यात्। समाधानार्थसम्पन्नः संग्रहः। लिङ्गात् ऊहः अनुमानम्। रतिहर्षोत्सवादीनामानन्दः प्रार्थना।
**क्षिप्तिः** –रहस्यार्थेप्स्य उद्भेद उत्पत्तिसूचनन्तु क्षिप्तिर्नामाङ्गं स्यात्।
**तोटकम्** - क्रोधव्यञ्जक वचनं, तोटयति वा परचित्तास्थ्यं भेदयतीति त्रोटकं नामाङ्गम्।
**अधिबलम्**- छलेन व्याजेन यः अभिसन्धिः अभिप्रायपरिज्ञानं बलं यत्तत् अधिबलं नामान्नम्।
**उद्वेगम्** - उद्विज्यते हृदयमनेनेति उद्वेगो नामाङ्गं परिकीर्तितः। नृपादीत्यादिपदेन शत्रुप्रभृतीनां परिग्रहः।
**विद्रवम्** - शङ्कया अनिष्टसम्भावनया यः सम्भ्रमः व्याकुलता ,विशेषेण कम्पनं यत्र स विद्रवो नामाङ्गं मतः।

### विमर्शसन्ध्यङ्गानि

त्रयोदश विमर्शसन्ध्यङ्गानि प्रतिपादयत

विमर्शसन्धेः त्रयोदशाङ्गानीति- विमर्शसन्धौ त्रयोदशाङ्गानि सम्भवन्तीत्यर्थः।अपवादः, संफेटः, व्यवसायं, द्रवं, द्युतिः, शक्तिः, प्रसङ्गः, खेदः, प्रतिषेधः, विरोधः, प्ररोचना, आदानं, छादनं च।

**अपवादम् -**दोषस्य प्रख्या कथनम् अपवादो नाम अङ्गम्।

**संफेटम् -** रोषेण भाषणं सम्फेटनामाङ्गम्।

**व्यवसायम्-** प्रतिज्ञा हेतुः साधननिर्देशः कारणनिर्देश इति। शोकावेगात् कोधावेगादेश्च सम्भवा पूज्यस्यव्यतिक्रान्तिः

**द्रवः-** यस्य कस्यचित् तर्जनं भर्सनम् उद्वेजनं भयोत्पादनं वा सन्देहजनकत्वेन प्रकाशनं युतिर्नामा प्रोक्ता।

**शक्तिः-** विशेधस्य विवादस्य प्रशमनं समापनं पुनः शक्तिसाध्यत्वात शक्तिः नामङ्गम्।

**प्रसङ्गम् -** गुरोः पित्रादिगुरुजनस्य कीर्तनम्।

**खेदम् -** मनसा शोकादिमानसिकस्य चेष्टया शारीरिक व्यापारेण वा समुत्पन्नः श्रमः स्मृतः।

**प्रतिषेधम् -** ईप्सितार्थस्य अभिलषितविषयस्य प्रतिबन्धः प्रतिषेध इति नाम्नाङ्गम् इष्यते। प्रतिषेधो बाध इति नार्थान्तरम्।.

**प्ररोचना-** संहारार्थस्य उपसंह्रियमाणप्रयोजनस्य प्रदर्शिनी प्रतिपादिका प्रोत्साहना प्ररोचयति विश्रामाय रुचिमुत्पादयतीति प्ररोचना नामाङ्गं स्यात्।

**आदानम् -** कार्याणां कर्मणां सग्रहः सङ्कलनम् आदानम् नामाङ्गम्।

**छादनम्-** कायार्थं कर्त्तव्यविशेषसम्पादनाय यत् खलु अपमानस्य सहनं भवेद् तत्पुनः छाद्यते संव्रियतेऽनेनेति छादनं नामाङ्गम् स्युः।

### निर्वहणसन्धेः चतुर्दशाङ्गानि

चतुर्दश निर्वहणसन्ध्यङ्गानि

निर्वणाख्या उपसंहारसन्धौ सन्धिर्विबोध इत्यादीनि चतुर्दशाङ्गानि। तत्र सन्धिरूपाङ्गं लक्षयति - वीजस्य मुखसन्धावुपचितस्य बीजार्थस्य उपगमनं पुनःप्राप्तिः।

**विबोधः -** कार्यमार्गणं कर्त्तव्यविषयस्य गवेषणम्, विबोधो नामाङ्गं भवेत्।

**प्रथनम् -** कार्याणां कर्त्तव्यविषयाणाम् उपन्यासः प्रकृतसन्दर्भे योजनम्। प्रथनं नामाङ्गं मतम्।

**निर्णयः-** अनुभूतार्थस्य प्रत्यक्षादिना पूर्वं ज्ञातविषयस्य कथनं पुनः निर्णीतविषयकत्वान्निर्णयो नामाङ्गं भवेत्।

**परिभाषणम् -** परिवादसूचकं भाषणं परिभाषणं नामाङ्गम्।

**कृतिः -** लब्धैरर्थैः शमनं शोकादिनाशनं चेतसः स्थिरीकरणमित्यर्थः, कृतिर्नामाङ्गं स्यात्।

**प्रसादः -** शुश्रूषा करादिना सेवा। प्रसीदत्यनेनेति प्रसादो नामाङ्गं स्यात्।

**आनन्दः-** अभिलषितप्राप्तिजन्या आनन्दो नाम भवेत्।

**समयः -** दुःखस्य निर्याणम् अपगमः समयो नामाङ्गं भवेत्।

**उपगूहनम्-** यत् अद्भुतस्य विस्मयस्थायिभावात्मकानाम् उपगूहनं नामाङ्गं भवेत्।

**भाषणम् -** सन्तोषजनकं वचनं दानादि च भाषणं नामाङ्गं स्यात्।

**पूर्ववाक्यम् -** परेण यथोक्तकटुवाक्यस्य स्मरणं मुखसन्ध्याद्युक्तवाक्यदर्शनं वा पूर्ववाक्यं नामाङ्गं विज्ञेयम्।

**काव्यसंहारः-** वरप्रदानस्य सम्प्राप्तिरुपस्थितिः काव्यसंहारो नामाङ्गम् इष्यते।

**प्रशस्तिः -** नृपस्य देशस्य देवतादीनां च शान्तिः स्वस्त्ययनम् प्रशस्तिमङ्गम् अभिधीयते।

### वृत्तीः -

वृत्तीः- कौशिकी,सात्वती,आरभटी.भारती

नाटकवृत्तीः प्रदर्शयितुं इति - शृङ्गारे रसे प्रतिपादिका वृत्तिः कौशिकीत्यर्थः। वीरे रसे प्रतिपादिका वृत्तिः सात्वतीत्यर्थः। रौद्रबीभत्सप्रतिपादिका वृत्तिः आरभटीत्यर्थः। सर्वत्र अन्येषु रसेषु भारती नाम वृत्तिः स्यात्।

### कौशिकीवृत्तिः

कौशिक्यारभटी चैव सात्वती भारती तथा।
मध्यमारभटी चैव तथा मध्यमकौशिकी।

कौशिकीवृत्तीः नर्म, नर्मस्फूर्जः, नर्मस्फोटः, नर्मगर्भश्च

श्लक्ष्णेन मनोरमेण नेपथ्यविशेषेण नायिकादिभूषणविशेषेण चित्रा शोभातिशयशालिनी स्त्रीबहुला विपुलानि नृत्यगीतानि कैशकीवृत्यां सन्ति। कामेन हेतुना य उपभोगः तथा चारुभिर्विलासैः पूर्वोक्तस्वरूपैर्युक्ता या वृतिः सा कौशिकी स्यात्। अस्य अङ्गानि चत्वारि इति। नर्म, नर्मस्फूर्जः, नर्मस्फोटः, नर्मगर्भश्च- इत्येतानि।

**नर्मः -** प्रियजनस्य सामाजिकादेरिति यावत्, आवजनं प्रीत्याधानं। वैदग्ध्येन नैपुण्येन क्रीडनं नर्म स्यात्। नर्म त्रिविधं शुद्ध केवलं केवलहास्येन विहितम्, शृङ्गारहास्येन विहितम्, सभयहास्येन विहितश्चेत्यर्थः। अथ द्वितीयं

**नर्मस्फूर्जः-** सुखमारम्भे यस्य सः, भीतिरन्तेऽवसाने यस्य सः, नर्मणा स्फूर्जते, देदीप्यते इति नर्मस्फूर्जः स्यात्।

**नर्मस्फोटः -** ईषत्प्रकाशितैर्भावैः सूचितो अल्पो रसः शृङ्गारो यत्र स। नर्मणः स्फोटः अभिव्यक्तिर्यत्र स नर्मस्फोटोमतः।

**नर्मगर्भः-**प्रच्छन्नीभूय तिष्ठतः नेतुर्नायकस्य व्यवहुतिव्यवहारः नर्मगर्भः स्यात्।

### सात्वतीवृत्तिः-

कौशिकी वृत्तिनिरूपणानन्तरं सात्वती निरूप्यते इति। शौर्यं बलम्, त्यागो दानसामर्थ्यम्, दया कृपा, आर्जवम् अकौटिल्यम् तैः बाहुल्यवती वीरे रसे

शृङ्गारस्यानुषङ्गिकत्वेन क्षुद्रत्वम्, विगतशोका तया साद्भूता या वृत्तिरिति। अस्याः चत्वारो भेदाः इति -- उत्थापकः, सांघात्यः, संलापः, परिवर्त्तकश्चेति। शत्रोः प्रतिपक्षस्य प्रतिनायकस्येत्यर्थः, उत्तेजनकरी

उत्थापकः, सांघात्यः, संलापः, परिवर्त्तकश्च

**उत्थापकः** - उत्साहातिशयजनकक्रोधोत्पादिनी वचनम् उत्थापयति उत्थापको नाम सात्वतीभेद उच्यते।

**सांघात्यः-** मन्त्रस्य, वित्तस्य, अदृष्टस्य शक्त्यादिः वा सङ्घभेदनंसैन्यसमूहादिसहायानां पृथक्करणं साङ्घात्यो नाम सात्वतीभेदः स्यात्।

**संलापलक्षणम्-** नानाभावानाम् समाश्रयः अनेकविधभावप्रकाशक इत्यर्थः।

**परिवर्तकः** - प्रारब्धात् अन्यानां कार्याणां करणम् आचरणम्, परिवर्त्तको नाम सात्वतीभेदो भवेत्।

## आरभटीवृत्तिः

विस्मयजनक व्यापारविशेषेण वधबन्धनप्रभृतिभिः व्यापारैः संयुक्ता औनत्योपेतावृत्तीः आरभटी। तस्या आरभट्याः वस्तूत्थापनम्, सम्फेटः, संक्षिप्तिः, अवपातनः च इति चत्वारो भेदाः प्रकीर्तिताः।

वस्तूत्थापनम्, सम्फेटः, संक्षिप्तिः, अवपातनः च

**वस्तूत्थापनम्** - मायया इन्द्रजालेन च वस्तूत्थापनं नाम आरभटीभेद उच्यते।

**सम्फेटः**- क्रुद्धौ तौ सत्वरौ शीघ्रयुक्तौ अन्योन्यं समाघातः प्रहारोक्तिस्तु सम्फेटो नाम आरभरीभेदः।

**संक्षिप्तिः** -- विलक्षणवस्तुनिर्माणकौशलेन इतर प्रकारेणापि या वस्तुनः पदार्थविशेषस्य संक्षिप्ता रचना संक्षिप्तिः भवेत्। तथा नेतुरेकस्य नृत्यपात्रस्य निवृत्तौ सत्यां भिन्नपात्रत्वेन ग्रहणंबोधश्चसंक्षिप्ति भवेत्।

**अवपातनम्-** प्रवेशः, त्रासो भीतिः, र्निष्क्रमणम्, हर्षः, पलायनश्च तेभ्यः सम्भवति यत्तत् अवपातनं नाम।

## भारतीवृत्तिः

'भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः इति अर्थः। सा च सर्वसाधारणी संस्कृतप्रचुरः कुशीलवप्रयुज्यः वाग्व्यापारः भवति।

## भाषानिरूपणम्

भाषानिरूपणम्

अत्र दृश्यकाव्ये उत्तममध्यमानाम् पण्डितानां पुरुषाणां संस्कृतं नाम भाषा भवेत्। तादृशीनाम् अनीचानां कृतात्मनां च योषितां स्त्रीणां सौरसेनी नाम भाषा कार्या। आसामुक्तप्रकाराणां योषितामेव तु गाथासु महाराष्ट्रीं भाषां प्रयोजयेत्। राजान्तःपुरचारिणां भाषा मागधी इति। राजसेवकानां राजपुत्राणां चेटानां राजवैश्यानां च अर्धमागधीभाषा। विदूषकस्य राजसुतोपमात्रादीनां प्राच्या गौडीया भाषा। द्राविडादिषु

तत्पात्रेषु द्राविडी भाषा। आभीरेषु जातिविशेषेषु आभीरीभाषा। पुक्कसादिषु चाण्डालविशेषेषु चाण्डालीभाषा। काष्ठोपजीविषु तक्षकादिषु आभीरीभाषा। पत्रोपजीविषु शाबरीभाषा लोहादिधातुजीवजातौ चर्मकारजात्यादौ च आभीरी शावरी वा भाषा। पिशाचानां वाग् भाषा पैशाची भवेत्। बालानां नपुंसकानां अधमदैवज्ञानाम् उन्मत्तानां आतुराणाञ्च सा सौरसेनी एव भाषा भवेत् क्वचित् संस्कृतमपि तेषां भाषा स्यात्।

## महानाटकलक्षणम्

नाटकप्रकरणात् महानाटकाख्यं नाटकप्रभेदं निरूपयति- नाटकमेवेत्यर्थः यदा सर्वैः समग्रैः –

> सहसैवार्थ सम्पत्तिर्गुणवत्युपचारतः।
> पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ।।

इत्यादिभिरुक्तिभिः पताकास्थानकः दशाभिःअङ्कैः च युतं भवेत् तदा धीरा बुद्धिमन्तो जनाः तत् महानाटकमूचिरे। एवं च पताकाचतुष्टययुक्तत्वे सति दशाङ्कयुक्तनाटकत्वमेव महानाटकत्वमिति लक्षणं फलितम्। नाटकप्रकरणभागादयो ये रूपकोपरूपकप्रभेदास्तत्र साङ्गोपाङ्गं नाटकलक्षणमभिधाय उद्देशक्रमात्प्रकरणाख्यं द्वितीयरूपकं निरूपयिति। नाटकलक्षणानन्तरं प्रकरणं निरूप्यते इत्यर्थः। प्रकर्षेण क्रियते नेता फलं वस्तु वा व्यस्तसमस्ततयाऽत्रेति प्रकरणं, तस्मिन् प्रकरणे तत्संज्ञके दृश्यकाव्ये वृत्तंतन्नाट्यवर्णनीयनायकचरितम्, लोकमात्रप्रसिद्धं मर्त्यलोकसम्भवयोग्यं, अत एव कविकल्पितं स्वप्रतिभामात्रेण निर्मितं न तु नाटकवत् पुराणादिप्रसिद्धम् भवेत् तथाचोक्तं महर्षिणा –

महानाटकलक्षणम्

> यत्र कविरात्मबुद्धया वस्तु शरीरं नायकं चैव ।
> औत्पत्तिकं प्रकुरुते प्रकरणमिति तद् बुधर्ज्ञेयम् ॥ इति ।

शृङ्गारसोऽङ्गी भवेत्। न तु नाटकवत् वीररसोऽप्यङ्गी भवेत् । नायकस्तु विप्रो अमात्योब्राह्मणातिरिक्तोऽपि राजसचिवः, अथवा वणिक् वा भवेत् नायकः धर्मकामार्थेषु तत्परस्तेष्वासक्तः, न तु मुक्तितत्परः, धर्मस्य स्वर्गसाधनत्वेन कामस्य पुत्रपश्वादिविषयकत्वेन, अर्थस्य भोगसाधनत्वेन गणनीयः भवेत्। तथा धीरप्रशान्तकः सामान्यगुणैर्भूयान् द्विजादिको स्यात्। तथा च कविकल्पितं लौकिकवृत्तान्तजन्यंइति वृत्तम्। प्रकरणे कुलस्त्रि, नायिका। क्वापि वेश्या। केषुचित् प्रकरणेषु कुलजा वेश्या च

तत्विशेषो गणिका। यदुक्तम्-

> आभिरन्यर्थिता वेश्या रूपशीलगुणान्विता।
> लभते गणिकाशब्दं स्थानं च जनसंसदि इति।

नायिका क्वचिच्च द्वयं कुलजा वेश्ये द्वे अपि नायिके उपलभ्येते इति शेषः। तथा चैनमेव परिष्कृत्योक्तम्।

काव्येन्दुप्रकाशे—

शुद्ध पूर्ण मिश्रमिति भेदात्रिविधं पुनः।
कुलस्त्रीनायिका शुद्धं गणिकानायिका परम् ॥
प्राधान्यमुभयोर्यत्र मिश्रं प्रकरणं विदुः ।।इति ॥

अनयोर्भाषाविषये तु सन्दारमरन्दे –तत्र वेश्या प्राकृतं तु कुलदा संस्कृतं वदेत्। इति तेन नायिकाभेदेन तस्य प्रकरणस्य त्रयो भेदाः प्रकारा भवन्ति। तत्र तेषु भेदेषु मध्ये तृतीय भेदः उभयनायिकावत् प्रकरणमित्यर्थः। कितवो धूर्त्तः द्यूतकरादयः तथा विटः चेटश्चपूर्वलक्षितः तैः सङ्कुलो व्याप्तः। अस्य प्रकरणस्य नाटकप्रकृतित्वादिति। यन्न समग्राङ्गोपदेशः सा प्रकृतिः इति जैमिन्युक्तलक्षणेन नाटके सर्वाङ्गोपदेशात् प्रकृतित्वेन तत एवातिदेशविधानात् प्रकरणादौ सन्ध्यङ्गाटकलक्षणादिकमवशिष्टं नाटकवदेव ज्ञेयमित्यर्थः। तथा च उक्तम्-विना विशेषं सर्वेषां लक्षणं नाटकवन्मतम् इति।

संस्कृतसाहित्ये प्राचीनतादृष्ट्या भाणस्यापि स्थानं नाटकवत् प्रतिष्ठितम्। भाणरचनायां वचोलाभः प्रयाससाध्यो भवति।

भाणः

भाणनामके रूपकभेदे धूर्तस्य नायकस्य नानावस्थात्मकं चरितं वर्णितं भवति। अत्र एक एवाङ्कः एक एव च अतीवकुशलः पण्डितो विटो वा नायकः भवति। एकाकी एवं आकाशभाषितं करोति। अतः एव अस्य भाण इत्यन्वर्थासंज्ञा भवति। भण्यते व्योमोक्त्या नायकेन स्वपरवृत्तं प्रकाश्यते इति भाणः। जनानां अनेकावस्थात्मकं चरित्रं वर्णितं भवति।

व्यायोगः

पुरुषाः यत्रासौ व्यायोगनामके रूपके पुराणेतिहासादिषु प्रसिद्धमितिवृत्तं भवति। विशेषेण आसमन्ताद् युज्यन्ते काव्यार्थ समारभन्ते अनेके पुरुषाः यतिरासौ व्यायोगः। स्त्रीनिमित्तमत्र युद्धं वर्जितं भवति। यथा परशुरामेण पितृवधकोपात् सहस्रार्जुनस्य वधः कृतः। व्यायोगनामके रूपके हास्य- शृङ्गार-शान्तेभ्यः अतिरिक्ताः ये करुण रौद्र-वीर-भयानाकादयो रसाः। तेष्वेव कश्चिदङ्गी रसो भवति। तथा चोक्तं साहित्यदर्पणे एव - हास्यशृङ्गारशान्तेभ्य इतरे अत्राङ्गिनो रसाः इति।

समवकारः

समवकीर्यते कविभिः निबध्यते इति समवकारः। लक्ष्मीटीकायाम् अस्यार्थोऽस्ति यत्र सङ्गतैः अवकीर्णैश्चार्यैः त्रिवर्गोपायैः पूर्वसिद्धैरेव क्रियते निबध्यते स समवकारः इति। समवकारे देवासुरयोः आश्रितम् इतिहासपुराणादिषु प्रसिद्धं इतिवृत्तं वर्णितमस्ति। यथा समुद्रमथनाख्ये समवकारे शिव-विष्णु-इन्द्रादीनां नायकानां विषपान लक्ष्मीप्राप्ति-ऐरावत- लाभादीनि फलानि।

डिमरूपके कथावस्तु ऐतिहासिकम्। माया-इन्द्रजाल सङ्ग्राम-क्रोध- उन्मत्तादीनां चेष्टाभिः सूर्य- चन्द्रमसोः च उपरागैः व्याप्तं कथावस्तु

डिमस्वरूपम्

डिमे भवति। रौद्ररसोऽङ्गी, चत्वारो अङ्काः, षोडशसंख्याकाः अत्यन्तमुद्धताः अत्र नायकाः भवन्ति। विष्कम्भकप्रवेशको अतिरिच्य कौशिकीवृत्तिरहिताः शान्तशृङ्गार हास्यानपहाय च भारत्यादयो वृत्तयः वीरबीभत्सरौद्रादयो रसाः च भवन्ति।

ईहामृगः

ईहामृगे चत्वारो अङ्काः भवन्ति । यत्र किमप्यैतिहासिकं किमपि कल्पितञ्च कथावस्तु भवति। अत्र शृङ्गाराभासः बाहुल्येन दृश्यते। दिव्याः मनुष्याः वात्र दश संख्याकाः पताकानायका अपि भवन्ति। केचित् षड्नायकाः इति कथयन्ति। अत्र मृगवदलभ्यां कामिनीं नायको अभिलषतीति हेतोः ईहामृगेति संज्ञा अन्वर्थतां भजते । अङ्कस्यापरं नाम उत्सृष्टाङ्क इत्यस्ति। अत्र एकोऽङ्को भवति। साधारणः पुरुषो नायकः, करुणरसः स्थायी, स्त्रीविलासादीनां बाहुल्यं ऐतिहासिकञ्च कथावस्तु भवति। जयपराजयौ, वाक्कलहः, निर्वेदः चात्र वर्ण्यन्ते ।

वीथी

वीथीनामके रूपके एकोऽङ्कः, मुखनिर्वहणे सन्धी, कौशिकी वृत्तिः, सर्वा अर्थप्रकृतयश्च भवन्ति । वीथीनाट्ये त्रयोदशअङ्गानि सन्ति। वीथ्यङ्गेभ्यः पृथक् उद्घात्यकस्य चर्चा प्रस्तावनायाः पञ्च भेदेषु वर्तते। तत्र प्रस्तावनायाः (आमुखस्य) ये उद्घात्यक-कथोद्घात प्रयोगातिशय-प्रवर्तकावलभितमिति पञ्चभेदाः तेषु उद्घात्यकावलगितयोः उल्लेखः वीथ्यङ्केष्वपि भवति।

प्रहसनम्

प्रहसने एकोऽङ्कः, कविकल्पितमितिवृत्तं भवति। साहित्यदर्पणे नामके ग्रन्थे तु त्रयो भेदाः कीर्तिताः - शुद्ध, सङ्कीर्ण, विकृतं च। विकृतं तु संकीर्णभेदे एव गतार्थं भवतीति पृथक् नोक्तम्। विकृतभेदे षण्डकञ्चुकीतापसादीनां वेषमाकलय्य नटादयः विकृतमभिनयं कुर्वन्तीति विकृतरूपप्रयुक्तभिनयात्मकत्वाद् विकृतं नाम प्रहसनमिदमुच्यते।

अङ्कः

दशरूपकेषु अन्यतमं भवति अङ्कः। अङ्के एकोऽङ्कः साधारणाः बहवो मनुष्याः नायकाः भवन्ति। करुणरसः स्थायीरूपेण वर्तते। बहूनि स्त्रीकथापात्राणि स्त्रीणां विलापः च वर्णितः। अङ्कं भाणवत् मुखप्रतिमुखसन्धीं भारतीकैशिक्यौ वृत्ती च। वाग्युद्धं प्रख्यातमितिवृत्तं च अस्ति।

उपरूपकाणि संस्कृतनाटकानां लघुप्रकाराः सन्ति। अस्मिन् नृत्यनाटकं, सङ्गीत, शारीरिक ईशारः च सन्ति। भावप्रकाशने विंशति लघुप्रकारस्य नाटकानां विस्तृतं वर्णनं कृतमस्ति ये उपरूपकशैल्या सन्ति। साहित्यदर्पणे अष्टादशविधानां नाटकानां वर्णनं सन्ति ते उपरूपकत्वेन निर्दिष्टाः। अग्निपुराणे दशरूपकाणां अतिरिक्तं सप्तदश लघुप्राकाराणां नाटकानां उल्लेखः अस्ति। उपरूपकाः भावात्मकाः भावाश्रिताः वा आसन्। रूपकाः नाटकस्य (नाट्यस्य) प्रमुखरूपाः इति मन्यन्ते, उपरूपकाः (नृत्यरचनाः) नाटकस्य लघुरूपाः सन्ति। यद्यपि नाटकस्य प्रमुखरूपाः वीथी, भाणम् इति उच्यन्ते तथापि तेषां स्वभावस्य आधारेण ते

अष्टादश उपरूपकाणि

उपरूपकेषु अपि वर्गीकृताः भवितुमर्हन्ति। अष्टादश उपरूपकाणि। नाटिका द्विविधा, नाटकप्रकरणयोः विषये व्यतिरिक्तेषु च सापेक्षतां धारयति उत्तरे सति प्रकरणिका इत्यपि उच्यते। एतेभ्यः रूपेभ्यः केवलं दीर्घता एव भेदः, नाटिका चतुर्णां कर्मणां प्रतिबन्धितः । त्रोटकः पञ्च, सप्त, अष्ट, नव वा कर्मभिः युक्तः भवितुमर्हति व्यापारः अंशतः मानवीयः अंशतः आकाशीयः च भवति। गोष्ठी एकस्मिन् अभिनये एकः खण्डः अस्ति, यत्र नाटकीयः व्यक्तित्वं च अस्ति। नवदशपुरुषाः, पञ्चषीणां वर्णनं दृश्यते, विषयः तु प्रेम्णः। सट्टकः यत्किमपि संख्यायां कृत्येषु अद्भुतं कथा, परन्तु भाषा सर्वथा प्राकृता भवेत्। नाट्यरासके मुख्यतया नृत्यगानयोः विषयाः प्रेम्णः आनन्दः च भवन्ति। प्रस्थाने मुख्यतया नृत्यगानमपि भवति तथा च प्रेम्णः आनन्दः च विषयाः सन्ति। पात्राणि -नायकः नायिका च दासाः तेषां च बहिष्कृतान् संगतिं करोति। गीतं, नृत्यं, संगीतं च अस्य मुख्यानि तत्त्वानि। उल्लाप्ये एकस्मिन् कर्मणि विषयः पौराणिकः। शृङ्गारं हास्यं करुणं च भावाः। गीतैः विच्छिन्नः संवादः। एषः प्रकारः उपरूपकः (काव्यः) काव्यपद्यैः संगीतवायुभिः च विच्छिन्ना। एकस्मिन् कर्मणि प्रेमकथा अस्ति। प्रेङ्घणे- युद्धविवादयोः उपचारः एकस्मिन् एव कर्मणि अस्ति। रासकः हास्यविनोदः पञ्चपात्रयुक्तः। नायकः मूर्खः नायिका च ख्याता। संलापके त्रयचत्वारःवाङ्काः। अस्य नायकः पाषण्डः। विषयाः तु- विवादः, हिंसा, युद्धं, वञ्चना च। श्रीगदिते एकस्मिन् कर्मणि मनोरञ्जनं अस्ति, यस्मिन् श्री देवीश्री, श्रीमती, सौभाग्यदेवी वा इत्यादिभिः सभ्कुलं च। अंशतः पठ्यते अंशतः गायते च।

शिल्पकः चतुरङकाः भवन्ति। यत्र मृतशरीराणि दान्ते तत्र दृश्यं स्थापितं भवति। नायकः ब्राह्मणः आत्मविश्वासयुक्तः वा प्रतिनायकः बहिष्कृतः चमत्कारः च। विलासिका- एकस्मिन् कर्मणि मनोरञ्जनं अस्ति, यस्य विषयः प्रेम्णः सामान्यरीतिः। दुर्मल्लिका- चतुरङ्का गर्भसन्धिरहिता च अस्ति, येषु प्रेत्यकस्मिन् नायकस्य मित्राणि च क्रमशः नेतृत्वं कुर्वन्ति। प्रकरणिका- अत्र विशिष्टवर्गः इति मन्यते, नाटिकेव भवत रूपकाणां अधः दृष्टः अवलोकितः। हल्लीशः- मुख्यतया एकस्मिन् एवं अभिनये गानस्य, नृत्यस्य च मनोरञ्जनं अस्ति। यस्य प्रतिनिधित्व एकः पुरुषः अष्ट, दश वा महिलाः कलाकाराः कुर्वन्ति। भाणिका एकस्मिन् कर्मणि हास्यखण्डः अस्ति, न तु अत्यन्तं स्पष्टतया विवचितम् कैशकीभारती वृत्तियुक्ता च भवति।

# Summarised Overview

अस्मिन् एकके साहित्यदर्प्पणस्य षष्ठ परिच्छेदस्य सामान्यः परिचयः कृतः। रूपकेषु प्रथम नाटकलक्षणं संसूच्य नटाश्रयः वृत्ती, भारती, आरभटीत्यादीः प्रतिपादयति। पञ्चसन्धिसमन्वितं भवेत् नाटकमित्यतः सन्धीनां सन्ध्यङ्गानां च स्वभावं विशदीकृतम्। रूपकाणां विशदीकरणानन्तरं उपरूपकाणां स्वभावमपि विशदीकृतम्।

## Assignments

1. प्रस्थावनायाः पञ्च भेदाः के? विशदयत।
2. नाटकलक्षणं किम्?
3. भारतीवृत्तेःभेदं लिखत।
4. अर्थप्रकृतेः पञ्च कारणानि लिखत।
5. कार्यस्य पञ्च अवस्थाः काः?
6. किं नाम सन्धिः ?कति सन्धयः?
7. गर्भसन्धिं विशदीकृत्य तस्यङ्गानि कानीति सूचयतु।
8. प्रसिद्धाः कति वृत्तयः? आरभटीं विशदयत।
9. रूपकेषु अङ्कं वीथीं च विशदयत।
10. उपरूपकाणि कति ? नामानि लिखन्तु।
11. भाषानिरूपणम्।
12. महानाटकलक्षणम्।

## Suggested Readings


1. कविराजद्विजेन्द्रनाथशास्त्री, संस्कृतसाहित्यविमर्शः, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन् वाराणसी।
3. T.K.Ramachandra Iyer, A Short History of Sanskrit Literature – R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018


## References


1. Sahityadarpanam, Acharya Krishna mohan Sastri, Chaukhambha Samskrita Samsthan, Varanasi.
2. Sahityadarpanam, Ed. Devadetta Kausika, Bharathiyavidyaprakasan, NewDelhi.
3. Sahityadarpanam, Ed. Saligramasastri, Motilal Banarsidass, New Delhi

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# साहित्यदर्पणम् परिच्छेदः- 6
# (दृश्यश्रव्यभेदौ रूपकभेदाः च)

## Learning Outcomes

- संस्कृतकाव्ये दृश्यश्रव्यभेदपरिचयः।
- संस्कृतकाव्ये रूपकभेदानां परिचयः।
- संस्कृते नाटकस्य उत्पत्तिं वर्धनं च जानाति।
- अलङ्कारशास्त्रावगतिः।

## Background

काव्यं दृश्यं श्रव्यञ्चेति द्विधा विभज्यते। श्रवणयोग्यं काव्यं श्रव्यकाव्यम्। दृश्यकाव्यानां रङ्गमञ्चेऽभिनयद्वारा आविष्कारेणैव दर्शनयोग्यत्वसिद्धिः। तेनैव तस्य रूपकमिति नामाप्यस्ति। रङ्गे नटैः चतुर्विधाभिनयद्वारा यत्प्रयुज्यते तदेव रूपकम्। रूपकेष्वन्यतमं प्रमुखञ्च भवति नाटकम्। नटेषु अनुकार्यपुरुषाणां (कथापात्राणां) रूपं आरोप्यत इत्यत नाटकादीनां रूपकसंज्ञा। तदुक्तं "तद्रूपारोपात्तु रूपकम्"। (सा. द. 6.1) इति साहित्यदर्पणकारेण विश्वनाथाचार्येण,"रूपकं तत्समारोपाद्दशधैवरसाश्रयम्। (दशरूपकं 1.7) इति दशरूपककारेण धनञ्जयेन च। रूपकाणि मुख्यतया दशधा विभज्यन्त इत्यपि। नाट्यशास्त्रानुरोधेन, रूपकाण्यधिकृत्यधनञ्जयेन विरचितः ग्रन्थः भवति दशरूपकम्। नाट्यविषये परमप्रामाणिको भवति नाट्यशास्त्रकारो भरतमुनिः। रूपकाणां रचनाविषये भरतमुनेः सिद्धान्ताः अतीव प्राधान्यम् अर्हति। काव्येषु तज्जीवातुत्भूतस्य रसस्योत्पत्तिमधिकृत्य "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" (ना.शा. 6.32) इति भरतमुनिना प्रोक्तं रससूत्रं प्रतिपादितम्। अद्यापि, न केवलं नाटकस्य, अपि तु समस्तस्यापि साहित्यप्रपञ्चस्य मार्गनिर्देशकं निकषायमाणञ्च विराजते। भरतमुनेः नाट्यशास्त्रे नाट्यस्योत्पत्तिं प्रतिपादितमस्ति। दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रियते। दशरूपकात्पूर्वं, भरतमुनेः नाट्यशास्त्रादन्योग्रन्थः रूपकशास्त्रेनोपलभ्यते। रूपकाणामाशयं रसभावादिकञ्च अन्यूनतया सहृदयेषु संक्रामयितुं- सहृदयचित्तं कथावस्तुनोऽभिमुखं नीयन्ते इत्यत एव अभिनयसंज्ञाऽत्रप्रसज्यते। चतुर्विधा अभिनयाः सन्ति। ते च– 1.आङ्गिकः 2.वाचिकः 3.आहार्यकः 4.सात्त्विकः – इत्येते। योऽभिनयः हस्तपादनेत्रादिभिः अङ्गैः क्रियते स एव आङ्गिकः अभिनयः। भाषणद्वारा वचोभिः क्रियमाण एव वाचिकाभिनयः। वस्त्रभूषणादीनां अनुकृतिद्वारा क्रियमाणोभवत्याहार्यकः। कथापात्राणां वेषभूषादीनाम् आहरणादेव आहार्यकसंज्ञा। सात्विकाभिनयः

स्तम्भ-स्वेदादिकानष्टौ सात्विकभावानाश्रित्यक्रियमाणोऽभिनयः। अस्मिन् एकके काव्यभेदः रूपकभेदान् च विस्तारयति।

## Keywords

दृश्यम्, श्रव्यम्, रूपकम्, नाट्यशास्त्रम्, नाटकम्, प्रकरणम्, अभिनयः रूपकभेदाः, उपरूपकभेदाः,नाटकलक्षणम्, अङ्कलक्षणम्, नाटकरचनापरिपठी, पूर्वरङ्गः, नान्दीलक्षणम्।

## Discussion

### षष्ठः परिच्छेदः

एवं ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्यश्रव्यत्वेन भेदद्वयमाह-

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधामतम्।

दृश्यं तत्राभिनेयं-

तस्य रूपकसंज्ञाहेतुमाह-

- तद्रूपारोपात्तु रूपकम्॥१॥

तद् दृश्यं काव्यं नटे रामादिस्वरूपारोपाद्रूपकमित्युच्यते। कोऽसावभिनय इत्याह-

भवेदभिनयोऽवस्थानुकारः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्यः सात्विकस्तथा॥२॥

व्याख्या- ध्वनिगुणीभूतव्यङ्ग्ययोर्भेदगणनैव संख्यातीतकाव्यभेदस्यापि प्राधान्येन व्यपदेशा भवन्ति इति न्यायेन-

'काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यश्चेति द्विधा मतम्'।

काव्यं पुनर्द्विविधा मतम्

इत्युक्तदिशा भेदद्वयस्यैव मुख्यत्वात्तत्तद्भेदप्रभेदादौ ध्वनित्वादेरक्षतत्वात् काव्यस्यान्येऽपि भेदोऽस्ति। द्रष्टुं योग्यं दृश्यं श्रोतुं योग्यं श्रव्यम्।अत्र श्रव्यदृश्यत्वेन इत्यभिधाय तथाकथनं तु प्रथमं दृश्यस्यैव निरूपयिष्यमाणत्वात्। दृश्यं दर्शनीयप्रधानम्, श्रव्यं श्रोतव्यमात्रम्, तयोर्भावो दृश्यश्रव्यत्वं तस्य भेदस्तेन तथेत्तेन काव्यं पुनर्द्विविधा मतम्।

एवञ्च काव्यं पूर्वोक्तभेदद्वयसमुदितेन मुख्यतचतुर्विधमित्यवगन्तव्यम्। तत्र अभिनेयम् अभिनययोग्यं अभिनीयमानं नायकादिचरितमित्यर्थः। काव्यं दृश्यमिति दृश्यकाव्यस्वरूपम्। एतेन नटाद्यभावेनाभिनय-योग्यत्वाभावात्श्रव्यकाव्ये नातिव्याप्तिरिति दर्शितम्। दर्शनात्मकचाक्षुषगोचरयोग्यत्वादस्य दृश्यमिति नाम।

## रूपकम्-

अभिनेयं रूपकम्

अभिनेयं रूपकमिति पर्यायाद्रूपकसंज्ञाहेतुं इति। तद्दृश्यकाव्यम्, रूपाणाम् आरोपाद्देशाभिनयाभ्यां तदारोपस्यानेनबोधनाद्हेतोः रूपकमुच्यते। एवञ्च रूपयति अन्यस्य रामादेः रूपेणान्यान्नटाननुकरोतीति रूपकम्। उक्तञ्च मन्दारमरन्दे-

'यथा मुखादीपद्मादेरारोपीरूपकं मतम्।
तथैव नायकारोपो नटे रूपकमुच्यते॥ इति।

यथा अनर्घराघवादि रूपकम्, रत्नावल्याद्युपरूपकं ज्ञेयम्। तत् अभिनेयापरपर्यायमिति। नटे अभिनेतरि रामादेर्नायकादेरारोपस्तस्मात्तं निमित्तीकृत्य प्रवृत्तत्वादितिभावः। तदारोपहेतुत्वेन प्राप्तमभिनयं पृच्छति। असौ दृश्यलक्षणघटकाभिनेयपदव्यङ्ग्य इत्यर्थः।

## अभिनयश्चतुर्विधः

अभिनयश्चतुर्विधः- आङ्गिकः, वाचिकः,आहार्यः, सात्त्विकः च

1. **आङ्गिकः**- अङ्गेन निष्पन्नः।
2. **वाचिकः**- वचसा प्रतिपाद्यः।
3. **आहार्यः**- आहारणीयमुकुटकेयूरादिरचनानिष्पाद्यः।
4. **सात्विकः**-स्तम्भभेदादिरूपः, सर्वत्र नटानामिति सम्बन्धः।

**नटैरङ्गादिभी रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयः। रूपकस्य भेदानाह-**

**नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः**
**ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥३॥**

**किञ्च –**

**नाटिका त्रोटकं गोष्ठि सट्टकं नाट्यरासकम्।**
**प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥४॥**

**संलापकं श्रीगदितं शिल्पकं च विलासिका।**
**दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥५॥**

**अष्टादश प्राहुरूपरूपकाणि मनीषिणः।**

**विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्॥६॥**

**सर्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणां च।**

व्याख्या- तत् चतुःसाधारणम् अभिनयलक्षणम्- अङ्गं, शरीरं, आदिशब्दात्, वचनपरिग्रहः। नाट्यशास्त्रे-

'विभावयति यस्माच्च नानार्थान् हि प्रयोगतः।

शाखाङ्गोपाङ्गसंयुक्तस्मादभिनयः स्मृतः।।' इति।

मन्दारमन्दरेपि-

उत्पादयन् सहृदये रसज्ञानं निरन्तरम् ।

अनुकर्तृ स्थितोयोऽर्थोभिनयः सोऽभिधीयते॥ इति।

अभिनयलक्षणम्

एवमभिनयं प्रदर्श्य रूपकं विशेषतः प्रदर्शयितुं प्रवृत्तस्तत्र तावत्तस्य भेदप्रतिपादनं प्रतिजानीते। आङ्गिको वाचिकश्चापि सात्विकाहार्य्राकाविति। स चतुर्धा कृतस्तत्रैराङ्गिकोङ्गक्रियोच्यते।

रागानुषङ्गि यद्वाक्यं नाट्ये वाचिक उच्यते।

सत्वक्रिया सात्विकः स्यादाहार्यो भूषणादिकः॥ इति।

नाटकम्, प्रकरणम्, भाणः, व्यायोगः, डिमः, समवकारः, ईहामृगः, अङ्कः, वीथी, प्रहसनम् इति संज्ञकानि दशविधानि रूपकाणि स्युः इति। दशविधं नाटकमभिधायाष्टादशविधरूपकमभिधातुमाह। नाटकमिति- प्रस्थानम्,उल्लाप्यम्, काव्यश्चेति त्रीणि। उपरूपकाणि (कर्म) मनीषिणो विद्वांसः (कर्तृ)। विशेषं प्रत्येकमवान्तरभेदम् लक्ष्म वक्ष्यमाणलक्षणम्। विशेषं विहाय सर्वेषां लक्षणं **नाटकवदेव** इत्यर्थः। मतं भरतादिभिः स्वीकृतम्। प्रकरणादीनां नवानां रूपकाणामित्यर्थः कारिकायां स्पष्टम्।

**तत्र-**

**नाटकं ख्यातवृत्तं स्यात्पञ्चसंधिसमन्वितम्।**
**बिलासदृध्यदिगुणवद्युक्तं नानाविभूतिभिः॥७॥**

**सुखदुःखसमुद्भूति नानारसनिरन्तरम्।**
**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः॥८॥**

**प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवा।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥९॥**

**एक एव भवेदङ्गी शृङ्गारो वीर एव वा।**
**अङ्गमन्ये रसाः सर्वे कोर्यो निर्वहणेऽद्भुतः॥१०॥**

रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्त्तयतीति नाटकम्।

**व्याख्या-** यति तेषु पूर्वमभिहितेषु नाटकादिपरेषु मध्य इत्यर्थः। ख्यातवृत्तादयः दृश्यकाव्यस्य विशेषणम् एवं च एतादृश यत् दृश्यकाव्यं तत् नाटकमित्यर्थः। नाटयति विचित्रं रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्त्तयतीति नाटकम्। केचित् तु- नमनार्थस्यापि नटेर्नाटकशब्दं व्युत्पादयन्ति। तत्र तु घटादित्वेन ह्रस्वाभावश्चिन्त्यः। यद्यपि कथादयोऽपि श्रोतृहृदयं नाटयन्ति तथाऽप्यङ्कोपायादीनां वैचित्र्यहेतुनामा तथा रञ्जकस्यमिति। ख्यातवृतं लोकेषु प्रसिद्धवृत्तान्तम्। पञ्चसन्धयः- मुख-प्रतिमुखादयो वक्ष्यमाणास्तैः समन्वितं संयुतम्। 'धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः' इत्युक्तलक्षणो नायकस्य गुणविशेषो विलासः ऋद्धिरभ्युदयः। आदिपदात् धैर्य गाम्भीर्य प्रियप्राप्त्यादीनां ग्रहणम्। तत्तद्गुणवत्ता तु नायकद्वारेव काव्यस्येति ज्ञेयम्। नानाविधविभूतिर्नायकाभ्युदयो येभ्यः तैः तथोक्तैर्युक्तम्। सुखदुःखसमुद्भूति शृङ्गारवीरादिबहुतररसैः निरन्तरं व्याप्तम्। तत्र नाटके अङ्काः परिच्छेदरूपाः वक्ष्यमाणाः, पञ्च आदयो येषां ते तथोक्ताः, तथा दश परे शेषा येषां ते तथोक्ताः। पुनः पचमाङ्कादल्पं दशमाङ्कादधिकं नाटकं न भवेदिति प्रदर्शितम्। उक्तं च दशरूपके---'पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्' इति।

पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्

प्रख्यातः वंशः रामायणमहाभारतादिप्रसिद्धः। राजर्षिः ऋषिवृत्तिदयादाक्षिण्यादिगुणवान्, राजा स चानभिषिक्तोऽपि रामजीमूतवाहनादीनामनभिपिकानामपि दर्शनात्। राजा च क्षत्रिय एवेति नामतः, तथा सति चन्द्रगुप्तस्य शूद्रत्वेन मुद्राराक्षसस्य नाटक व्याहन्येत। धीरोदात्तः पूर्वोक्तलक्षणः। दिव्योऽपि स्वात्मनि मनुष्यत्वाभिमानी वा शब्दादविव्यश्च तेन शाकुन्तले दुष्यन्तस्य नायकत्वं सङ्गच्छते। एकः शृङ्गार एव एको वीर एव वा अङ्गी प्रधानरसो भवेत्। 'उत्कर्षहेतवे एक एव रसोऽङ्गित्वेन निवेशनीय' इत्यर्थः। शृङ्गारो वीरो वेति कथनं तु समुचितरसबोधकम्। तेनोत्तररामचरिते करुणस्य प्रबोधचन्द्रोदये शान्तस्य चाङ्गित्वमक्षतमेव। एवञ्च नाटकेऽवान्तररससम्भवेऽपि तेऽङ्गान्येव। समस्तरसनिर्वाहकस्त्वेक एव प्रधानमिति भावः। उक्तञ्च ध्वनिकृता-

> प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने
> एको रसोऽङ्गीकर्त्तव्यस्तेषामुत्कर्षमिच्छता।' इति

यत्तु - 'शृङ्गारवीरशान्तानां मध्ये यः कश्चिदेक एव रसो नाटके प्रधानतया निबद्धव्यः' इत्युक्तं। अन्ये सर्वे रसाः अङ्गमप्रधानभावेनावस्थातुं शक्ष्यन्तीत्यर्थः।

> **चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः**
> **गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम्॥११॥**

**ख्यातं रामायणादि प्रसिद्धं वृत्तम्। यथा - रामचरितादि। सन्धयो वक्ष्यन्ते। नानाविभूतिभिर्युक्तमिति महासहायम्। सुखदुःखसमुद्भूतत्वं रामयुधिष्ठिरादिवृत्तान्तेष्वभियुक्तम्। राजर्षयो दुष्यन्तादयः। दिव्याः श्रीकृष्णादयः। दिव्यादिव्यः यो दिव्योऽध्यात्मनि नराभिमानी। यथा श्रीरामचन्द्रः।**

व्याख्या- कार्ये नायककर्मणि व्यावृता निरताः पूरुषाः चत्वारः पञ्च वा मुख्याः प्रधानाः निबद्धव्य इति । अत्र वाशब्दोऽनास्थायाम्। तेन कार्य पुरुषाः चत्वारः पञ्च वेति यदुक्तं ततो न्यूनाधिकतथाविधपात्रनिबन्धनेऽपि न दोषः।

नानाविभूतिभिः इति महासहायमित्याशयेनोक्तमिति भावः। एवञ्च महान्तः पुरुषाः सहाया यत्र तत्तथोकम् । यथा रामादेः सुग्रीवादयो, बैगा युधिष्टिरस्य भीमः, शाकुन्तलादौ च इन्द्रादयः। सुखदुःखेति। यथा वेणीसंहारे युधिष्ठिरस्य प्रथमं दुःखम् अनन्तरध सुखम्। यथा वा उत्तररामचरिते रामस्य प्रथमं सुखम् अनन्तरञ्च दुःखम्। दुष्यन्तादयोऽदिव्य नायकाः। श्रीकृष्णः केवलो दिव्य एव। नारायणत्वाद् दिव्यत्वम्।

**गोपुच्छाग्रसमाग्रमिति क्रमेणाङ्काः सूक्ष्माः कर्तव्याः इति केचित्। अन्ये त्वाहुः- यथा गोपुच्छे केचिद्वाला ह्रस्वाः केचिद्दीर्घास्तथेह कानिचित्कार्याणि मुखसंधौ समाप्तानि कानिचित्प्रतिमुखे। एवमन्येष्वपि कानिचित्कानिचित् इति।**

**प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः।**
**भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः॥१२॥**
**विच्छिन्नावान्तरैकार्थः किञ्चित्संलग्नबिन्दुकः।**
**युक्तो न बहुर्भिः कार्यैर्बीजसंहृतिमान्न च।।१३।**
**नानाविधानसंयुक्तो नातिप्रचुरपद्यवान्।**
**आवश्यकानां कार्याणामविरोधाद्विनिर्मितः।।१४।**
**नानेकदिननिर्वर्त्यकथया सम्प्रयोजितः।**
**आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा।।१५।।**

व्याख्या- कायं गोपुच्छाग्रं कर्तव्यं बन्धमासाद्य इति भरतमुनिवचनं व्याख्यातॄणां मतभेदं दर्शयितुम्। सूक्ष्मा अल्पाः,बाला लोमानि,कार्याणि नायककर्माणि, मुखसन्धै समाप्तानि, अतएव ह्रस्वानीत्याशयः। अन्वेष्वपि गर्भविमर्शनिर्वहणेषु सन्धिषु। कानिचितकानिचित् कार्याणि समाप्तानि इति।

बीजार्थख्यापकं च तत् इति अङ्गमुखलक्षणम्

पञ्चाधिक दशपराः तत्राङ्काः इत्युक्तत्वात् परिच्छेदरूपस्याङ्कस्य स्वरूपं दर्शयति- प्रत्यक्षवत् भासमानं नेतुर्नायकस्य नायिकायाः वा चरित्रं यत्र, साक्षात् निर्दिश्यमानः नायकव्यापार इत्यर्थः। भावो नायकनायिकयोराकूतम्। रसभाववत् उपलक्षणं तेन रसाभासादिपरिग्रहः,

तेन समुज्ज्वलः शोभितः। अगूढः शब्दश्रवणमात्रेणैव तत्कालेनायासबोध्यः शब्दर्थो यत्र।

"अवान्तरार्धविच्छेदे विन्द्रुः विच्छेदकारणात्। अवान्तरार्थविच्छेदेऽपि प्रसङ्गान्तरोक्त्या वस्तु बिन्दुसंज्ञकं भवति। बहुभिः कार्यैः प्रधानोद्देश्यैः न युक्तः। बीजं प्रथमार्थप्रकृतिः अभिनेतव्यप्रसङ्गस्याङ्कुर इत्यर्थः। संहृतिः निर्वहणाख्य सन्धिः। तयोः न अङ्के विधानम्, किन्तु अर्थोपक्षेपके। अत एव 'बीजार्थख्यापकं च तत् इति अङ्गमुखलक्षणमभिधास्यति। नानाविधाः बहुभिर्घटनाभिः संयुक्तः। नातिप्रचुरपद्यवानित्युक्त्या गद्यपद्यानां तारतम्येन निवेशनीयः।

**दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः।**
**विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा॥१६॥**

**दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरं च यत्।**
**शयनाधरपानादि नगराद्यवरोधनम्॥१७॥**

**स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः।**
**देवीपरिजनादीनाममात्यवणिजामपि॥१८॥**

**प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः।**
**अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः॥१९॥**

व्याख्या- प्रसिद्धोदाहरणेषु तथादर्शनात् तत्संख्याप्रतिपादनाच्च अवश्यमनुष्ठेयानां कार्याणां पात्रविशेषेषु प्राप्तानां सन्ध्यावन्दनादीनाम् अविरोधादपरित्यागात् रचितो भवेत्। अनेकदिननिवर्त्या या कथा वृत्तान्तस्तया न संप्रयोजितो भवेत्, किन्तु स्वल्पदिनसम्पाद्यया कथयैव सम्प्रयोजितो भवेदित्यर्थः। त्रिचतुरैः पात्रैः योग्यै राजमन्त्र्यादिभिर्जनै रित्यर्थः। वधं युद्धादिकं च यस्य कस्यचिन्मुखेनान्येन वा कविप्रतिभोत्थेन प्रकारेण प्रदर्शनीयम्। अन्ते समाप्तौ रङ्गगृहान्निर्गतानि निखिलानि समग्राणि पात्राणि नायकतत्सहायादयो यस्य सः अङ्क इति कीर्तितः। महर्षिणा भरतेनाङ्कपदस्येत्थं निरुक्तिः प्रदर्शिता--

'अङ्क इति रूढिशब्दो भावश्च रसैव रोहयस्यर्थान्।

नानाविधानयुक्तो यस्मात्तस्माद्भवेदङ्कः॥' इति।

**बिन्द्वादयो वक्ष्यन्ते। आवश्यकं संध्यावन्दनादि।**

**अङ्कप्रस्तावाद्गर्भाङ्कमाह-**

**अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान्।**
**अङ्को परः स गर्भाङ्कः सबीजफलवानपि॥२०॥**

**यथा बालरामायणे रावर्णप्रति कोहलः-**

श्रवणैः पेयमनकैर्दृश्यं दीर्घेश्च लोचनैर्बहुभिः।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम्॥

इत्यादिनाविरचितः सीतास्वयंवरो नाम गर्भाङ्कः।

तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम्।

कथनं कविसंज्ञादेनार्टकस्याऽप्यथामुखम्।।

कस्यचिदङ्कस्य अभ्यन्तरगतः तेन चास्य गर्भाङ्क इति नाम

व्याख्या- आदिना बीजादीनां परिग्रहः। सम्ध्यावन्दनादीति। रसान्तरप्रसक्तस्य नायकस्येति बोध्यम्। गर्भाङ्कः प्रधानाङ्कमध्येऽवान्तर विच्छेदरूपोऽपरोऽङ्कस्तलक्षणं दर्शयति। उक्तस्य लक्षणस्य यस्य कस्यचिदङ्कस्य अभ्यन्तरगतः तेन चास्य गर्भाङ्क इति नाम। रङ्गे सूत्रधारेण क्रियमाणं मङ्गलाचरणम्, आमुखं प्रस्तावना तलक्षणं वक्ष्यति। रङ्गद्वारा मुखे प्रथमाङ्गः। वक्ष्यते हि वृत्तवर्त्तिष्यमाणकथांशप्रदर्शकः अभिनयः विकभकः। स च मध्यविधजनप्रवर्त्तितः शुद्धः मध्यनीचाभ्यां प्रवर्त्तितः संकीर्णः, नीचजनमात्रप्रवर्त्तितः प्रवेशकः। तेषां तु सकलाङ्ग एव सम्भवः।

तत्रेति नाटके।

यन्नाटयवस्तुनः पूर्व रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते।।२२।।

प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि।
तथाऽप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ।।२३।।

तस्याः स्वरूपमाह-

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥२४॥

विघ्नोपशान्तये नान्दी अवश्यं कर्तव्या

व्याख्या- तत्र नाटके पूर्व प्रथमं पूर्वरङ्गः सच नटाभिनयरूपरङ्गद्वारादि सूत्रधारनिष्क्रमणान्तक्रियाकलापः, तदाख्यं मङ्गलाचरणमित्यर्थः। ततः पूर्वरङ्गात् परं सामाजिकसमूहः सभा, तस्याः पूजा प्रशंसा, ततः कवेः संज्ञायाः नाम्नः कवेर्गोत्रमातापितृणां परिग्रहः, नाटकस्य संज्ञा स्वरूपादिकथनमिति सम्बन्धः। अनन्तरं प्रस्तावना। यथाक्रममेतानि कविना निबद्धव्यानीत्यर्थः। कुशीलवाः सूत्रधारादिनटाः। रङ्गे नाट्यशालायां सम्भाव्यमाना ये विघ्ना नटादिदूरदृष्टजन्योपद्रवास्तदुपशान्तये निराकरणाय श्रमः। नाट्यं काव्योपनिबद्ध धीरोदास्थाद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिः। तदुक्तं दशरूपके -'अवस्थानुकृतिर्नाट्यम् इति। सर्वप्रथमं

यत् प्रकुर्वन्ति स्वसमाजनियमात् कविनिर्देशात् सामाजिकादेशाङ्का आचरन्ति, स पूर्वरङ्गम् उच्यते। अतः पुर्वरङ्गो नाम रङ्गोपद्रवनिवारकः नान्दीपाठगीतावादित्रादि नानाविधाङ्गविशेषो नाट्यादावनुष्टेयः कर्मविशेषः। यद्यपि अस्य पूर्वरङ्गस्य प्रत्याहारादिकानि बहूनि द्वाविंशतिसंख्याकानि अङ्गानि सन्ति तथापि विघ्नोपशान्तये नान्दी अवश्यं कर्तव्या।

## Summarised Overview

अस्मिन्नेकके काव्यस्य दृश्यश्रव्यभेदौ सूचितौ। अभिनयः कः इति संसुच्य रूपकभेदान् उपरूपकभेदान् च उक्त्वा नाटकलक्षणं विशदयति। तदनु अङ्कविशदीकरणम्। प्रक्त्यक्षनेतृचरिता रसभावसमुज्वलःइत्यस्य अन्तनिष्क्रान्तनिखिलपायोङ्कः इति कीर्त्तितः यावत्। गर्भाङ्कलक्षणं तदनु पूर्वरङ्गं, नायकस्यामुखं विघ्नशान्त्यन्तं नान्दी, नान्दीस्वरूपं च सूचयति।

## Assignments

1. काव्यप्रभेदौ कौ। विशदयत?
2. रूपकम् इति संज्ञायाः औचित्यं किम्?
3. को नाम अभिनयः? कति विधः?
4. रूपकस्य भेदाः के?
5. कति उपरूपकाणि? तानि च कानि?
6. नाटकलक्षणं किम्?
7. 'नान्दी कर्तव्या'-किमर्थम्?
8. नान्दीस्वरूपः कः?
9. अङ्गनिरूपणं विशदयत।

## Suggested Readings

1. कविराजद्विजेन्द्रनाथशास्त्री, संस्कृतसाहित्यविमर्शः, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम् ।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन वाराणसी ।
3. T.K.Ramachandra Iyer, A Short History of Sanskrit Literature – R.S.Vadyar&Sons, Kalpathy, Palakkad,2018.

# References

1. Sahityadarpanam, Acharya Krishna mohan Sastri, Chaukhambha Samskrita Samsthan, Varanasi.
2. Sahityadarpanam, Ed. Devadetta Kausika, Bharathiyavidyaprakasan, NewDelhi.
3. Sahityadarpanam, Ed. Saligramasastri, Motilal Banarsidass, New Delhi

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# साहित्यदर्पणं परिच्छेदः-6
# (वृत्तिः, प्रस्तावना, पताकास्थानम्)

## Learning Outcomes

- संस्कृतनाटके वृत्तिज्ञानम् अधिकृत्य जानाति।
- प्रस्तावनां तद्भेदान् चावगच्छति।
- अलङ्कारशास्त्रे पताकास्थानं गृह्णाति।
- अलङ्कारशास्त्रमधिकृत्य ज्ञानं सम्पादयति।

## Background

काव्यभेदं विविच्य ज्ञात्वा नाटकं रूपकभेदान् चाधिकृत्य सामान्यज्ञानं वयमार्जिताः। भाषायाः स्वरूपे वृत्तीनां प्राधान्यमस्ति। संस्कृतं प्रायेण भारते सर्वत्र प्रचलिता भाषा आसीत् इत्यतः प्रादेशिकभेदाः देशानुसारमागताः सन्ति। नाटकरचनायाम् अवश्यमावश्यकाः घटकाः संसूच्य दूरव्यापकं फलमुद्दिश्य सूचितं पताकास्थानकमपि सूचितकम्। तादृशानां कार्याणां पठनाय इदानीम् अस्माभिः यत्नः कार्यः। अतः तदर्थं यतामहे।

## Keywords

वृत्तिः, भारती, विदूषकः, सूत्रधारः, प्रस्तावनां, पताकस्थानकम्, प्रस्थावनाभेदाः, कथोद्घातः, प्रयोगातिशयः, प्रवर्त्तकम्, आमुखम्, पताकास्थानकभेदाः।

## Discussion

वृत्तिः नाम शरीरवाङ्मनसां विचित्रचेष्टा

वृत्तिः नाम शरीरवाङ्मनसां विचित्रचेष्टा। अलङ्कारशास्त्रे तु व्यापारात्मिका वृत्तिः। नायकादीनां प्रवृत्तिस्वरूपा वृत्तिः इति दशरूपके। वृत्तिः चतुर्था। सा भारती, सात्वती, आरभटी, कैशकी चेति। तासु भारती-

**ऋतुं च कञ्चित्प्रायेण भारतीं वृत्तिमाश्रितः।**

**स स्थापकः। प्रायेणेति क्वचिदृतोरकीर्तनमपि। यथा- रत्नावल्याम्। भारतीवृत्तिस्तु-**

**भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः॥२२॥**

व्याख्या- स स्थापकः भारतीं वृत्तिं अवलम्बमानः सन्काव्यार्थो दृश्यकाव्यवृत्तान्तः। तत्सूचकैः बोधकैः मधुरैः श्लोकैः रङ्गं प्रसाद्य प्रीणयित्व। रूपकस्य तत्कवेश्च आख्यां तथा निवासस्थानादिकं ऋतुं च कीर्त्तयेत्।भारतीवृत्तिः नटाश्रयः पुरुषविशेषप्रयोज्यः। स्त्रीवाचां प्राकृतत्वात् पुंसामप्यधमानां वचः प्राकृतत्वात् कारिकायां प्रायपदोपादानम्।

**संस्कृतबहुलो वाक्यप्रधानो व्यापारो भारती।**

**तस्याः प्ररोचना वीथी तथा प्रहसनामुखे।**

**अङ्गान्यवोन्मुखीकारः प्रशंसातः प्ररोचना ।।३०।।**

**प्रस्तुताभिनयेषु प्रशंसातः श्रोतॄणां प्रवृत्त्युन्मुखीकरणं प्ररोचना । यथा रत्नावल्याम्--**

**श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी,**
**लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।**
**वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-**
**र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः॥**

**वीथीप्रहसने वक्ष्येते।**

व्याख्या- प्रायपदस्यार्थो बहुल इति। एवञ्चाल्पप्राकृतभाषा संयुताऽपि भवेदिति सूचिता। वाक्यप्रधान इति- एतेनाल्पाल्पाङ्गिकाहार्य सात्विकाभिनयप्रकारोऽपि सम्भवितुमर्हतीति सूचितम्। व्यापारोऽभिनयः। इयं च भारती ऋग्वेदोत्पन्ना तथा च भरतः 'ऋग्वेदाद् भारती वृत्तिरिति। अस्याः स्वरूपं किञ्चिद्विशदीकृत्योक्तं तेनैव तथाहि-

'या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतवाक्ययुक्ता।

स्वनामधेये भरतैः प्रयुक्ता सा भारती नाम भवेत् वृत्तिः॥' इति।

भारती वृत्तिभेदाः - प्ररोचना, वीथी, प्रहसनम्, आमुखञ्च

भारतीवृत्तेर्भेदं दर्शयति- प्ररोचना, वीथी, प्रहसनम्, आमुखञ्च एतान्यङ्गानि। अत्र एषु चतुर्षु अङ्गेषु मध्य इत्यर्थः।

**प्ररोचना** – प्ररोचना नाम प्रकर्षेण रुच्युत्पादनं यस्यां सेत्यन्वर्थेयं संज्ञा। यद्यपि भावक एवात्र कविस्तथापि राज्ञः श्रीहर्षस्य प्रीतये तत्रैव कवित्वारोपः कृतः। एषा परिषदादिशब्दाः स्थलविशेषे तत्रत्यपुरुषविशेषे च उभयविधप्रयोगदर्शनात्। प्रकृते च तत्स्थाः पुरुषा ग्राह्याः,

'गुणग्राहिणी'ति विशेषणोपादानात्। लोके जनसमाजे वत्सराजस्य उदयनस्य इति। चरितञ्च हारि मनोहरम् मन आकर्षकमिति यावत् अस्तीति शेषः। वयं नाट्ये अभिनयकार्ये निष्णाताश्च, वयमिति 'त्यदादीनि' इत्येकशेषः। इह प्रकृतनाटिकाभिनयनविषये वान्छितफलप्राप्तेः सकलसभ्यजनप्रीत्युत्पादन रूपाभिलषितफललाभस्य पदं स्थानम्। किं पुनरधिकमुच्यत इत्यभिप्रायः मद्भाग्यस्य ममाष्टस्य उपचयो वृद्धिस्तस्मात्तथोक्तात्। अयं सर्वो गुणानां निपुणकवित्वादीनां प्रीत्युत्पादकधर्माणां गणः समूहः समुदितः। अत्र सर्वेषां प्रशंसया प्रकृतनाटिकाभिनये श्रोतॄणां प्रवृत्युन्मुखीकरणात् प्ररोचना।

**वीथीप्रहसने** -तदद्वयं मुखरूपकविशेषौ नाटकप्रभेदौ इति। स्वप्रसङ्गे वच्येते प्रतिपादयिष्येते। तौ च संस्कृतेनैवेति तद्वयं भारत्या अङ्गम्।

**नटौ विदूषको वापि पारिपार्श्विक एव वा।**
**सूत्रधारेण सहिताः संलापं यत्र कुर्वते।।३१।।**

**चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।**
**आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥३२।।**

**सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते। तस्यानुचरः पारिपार्श्विकः, तस्मात्किञ्चिदूनो नटः।**

**उद्धात्य (त) कः कथोद्वातः प्रयोगातिशयस्तथा।**
**प्रवर्तकावलगिते पञ्च प्रस्तावनाभिदाः।।३३।।**

**तत्र-**

**पदानि त्वगतार्थानि तदर्थंगतये नराः।**
**योजयन्ति पदैरन्यैः स उद्धात्य (त) क उच्यते॥३४॥**

व्याखा- 'नटा विदूषको वापि नटी वा पारिपार्श्विकः' इति मन्दारमन्दवचसा तु नट्या अपि ग्रहणविधेयम्। विदूषकः पूर्वोक्तस्वरूपः, परि समन्तात् सूत्रधारस्य पार्श्वे चरतीति पारिपार्श्विकः। एते सूत्रधारेण सहिता युक्ताः सन्तः स्वकार्योत्थैः स्वस्वकर्त्तव्यविषयम् आश्रित्यैवोपयुक्ताः प्रस्तुतं प्रकृतं दृश्य काव्यविषयम् सूचयन्तीति तैस्तथोक्तः चित्रैर्बहुविधैर्वाक्यैः यत्र अन्योन्यम् सम्यग्भाषणं कुर्वते तत्तु आमुखं विज्ञेयम्। प्रकृताभिनयस्य मुखे प्रारम्भे विधेयत्वादिति भावः। तथा नाम्ना प्रसिद्धया संज्ञया, प्रस्तावयति प्रस्तावनाऽपि विज्ञेया। एवं च अत्र

आमुखम्

सूत्रधारपदं तत्तुल्यत्वात् स्थापकपरमित्याशयः। तस्मात् सुधारादेवेत्यर्थः किञ्चित्स्वल्पगुणको नट विशेषः।

**यथा मुद्राराक्षसे सूत्रधारः-**

**'क्रूरमहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीन्।**

**अभिभवितुमिच्छति बलात्-'**

**इत्यनन्तरम्- '(नेपथ्ये।) आः, क एष मयि जीवति' चन्द्रगुप्तमभिभवितुमिच्छति। इति।**

**अत्रान्यार्थवन्त्यपि पदानि हृदयस्थार्थगत्या अर्थान्तरे संक्रमय्य पात्रप्रवेशः।**

व्याख्या- उदाहरति- मुद्राराक्षसे तदाख्ये विशाखदत्तविरचिते नाटके इत्यर्थः। क्रुरग्रहः इति-- चन्द्रग्रहणं भविष्यतीति प्रतिपादयतः स्थापकस्य उक्तिरियम्। क्रूरः अशुभफलदानेन दारुणः ग्रहः पापग्रह इत्यर्थः। स प्रसिद्धः केतुरेकशरीरत्वेनाभेदात् राहुरित्यर्थः। पक्षे तु केतुना मलयकेतुना 'नामैकदेशे नामग्रहणम्' इति न्यायात् सत्यभामेतिवत्, सह सकेतुः राक्षसः। इदानीं पूर्णमण्डलं परिपूर्णबिम्बं चन्द्रमसं चन्द्रम, पक्षे तु असम्पूर्णमण्डलम् अचिरराज्याधिरूढतया अव्याहताज्ञा भावेन अस्वाधीनप्रजामण्डलम्।

**सूत्रधारस्य वाक्यं वा समादायार्थमस्य था।**

**भवेत्पात्रप्रवेशश्चेत्कथोद्घातः स उच्यते।।३५।।**

**वाक्यं यथा रत्नावल्यान- द्वीपादन्यस्मादपि इत्यादि (३३२) सूत्रधारेण पठिते- ( नेपथ्ये ) साधु भरतपुत्र! साधु। एवमेतत्। कः सन्देहः? 'द्वीपादन्यस्मादपि- इत्यादि पठित्वा यागन्धरायणस्य प्रवेशः। वाक्यार्थौ यथा वेण्याम्-**

**निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन।**

**रक्तप्रसाधितभुवः अतविहाय स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥**

द्वितीयं प्रस्तावनाभेदम्

व्याख्या- अथ द्वितीयं प्रस्तावनाभेदं प्रतिपादयति। सूत्रधारस्य वाक्यं समादाय समग्रमेव सूत्रधारवाक्यमुच्चार्य्यं वा सूत्रधारवाक्यस्यार्थ समादाय पूर्वत्र वाक्यादानं वाक्यानुकरणम्, अत्रार्थादानं वाक्यानुकरणं विना तदर्थानुशीलनमिति भेदः। चेद्यदि पात्रस्य इति वृत्तान्तर्गतलोकस्य प्रवेशो भवेत्, तदा कथया सूत्रधारवाक्येन उद्घातः पात्रोपस्थितिर्यत्र स कथोद्यातो नाम द्वितीयः प्रस्तावनाभेदः कथ्यते। उद्घात्यके सूत्रधाराभिप्रेतार्थस्य पात्रेणार्थान्तरे संक्रमणम् ,अत्र तु तदभिप्रेतार्थस्यैव पात्रेण तत्वतो ग्रहणमित्यनयोर्भेदो ज्ञेयः। उदाहरति-- रत्नावल्यां तदाख्यायां श्रीहर्षनृपतिकृताय़ां नाटिकायामिति भावः। द्वीवादिति। सूत्रधारेण स्थापकेन नटनेति यावत् पठिते संस्कृतपाठानन्तरमित्यर्थः। एवं

यथा भवानाह - 'द्वीपादन्यस्मादपि इत्यादि तथेत्यर्थः। संदेहः संशयः। यौगन्धरायणस्य तदाख्यनगररक्षकस्य श्रीवत्सराजमन्त्रिण इत्यर्थः।

अत्र यौगन्धरायणमन्त्रिरूपपात्रस्य सूत्रधारवाक्यं पुनरनुकृत्य वेशात प्रथमः प्रकारः कथोद्घात इति ज्ञेयम्। वैरदहनः निर्वाणः अरीणां सन्धिविधानेन पाण्डुतनयाः आनन्दं प्राप्नुवन्तु, अनुरागेण वशीकृता पृथिवी, अत एव ततः सन्धिविधानेन भग्नो विग्रहः कलहो येषां ते तथोक्ताः सभृत्याः कुरुराजसुताः धार्त्तराष्ट्राः दुर्योधनादयश्च स्वस्थाः भवन्तु ,सन्धिविधानफलमुभयपक्ष एव जायतामिति। द्वितीयार्थस्तु-अरीणां शत्रूणां प्रशमात् निर्वाणवैरदहनाः पाण्डुतनयाः माधवेन सह नन्दन्तु। अस्य पूर्वार्धं एव लक्ष्यम् उत्तरार्द्धस्य पताकाघटकत्वात्, अतश्च द्वितीयार्थस्य तत्रैवोपयोगः। अत एव च उत्तरार्द्ध एव द्वितीयपताकास्थानके उदाहृतम्।

प्रथमः प्रकारः कथोद्घातः

**इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा - (नेपथ्ये) आः दुरात्मन्! वृथा मङ्गलपाठक!, कथं स्वस्था भवन्तु मयि जीवति धातराष्ट्राः? ततः सूत्रधारनिष्कान्तौ भीमसेनस्य प्रवेशः।**

**यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।**
**तेन पात्रप्रवेशश्चेत्प्रयोगातिशयस्तदा।।३६।।**

**यथा कुन्दमालायाम्-- (नेपथ्ये) इत इतोऽवतरत्वार्या। सूत्रधार-कोऽयं खल्वार्याह्वानेन साहायकमपि मे सम्पादयति। (विलोक्य) कष्टमतिकरुणं वर्तते।**

**'लङ्केश्वरस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन।**
**निर्वासितां जनपदादपि गर्भगुर्वी सीता वनाय परिकर्षति**
**लक्ष्मणोऽयम्॥**

**अत्र नृत्यप्रयोगार्थं स्वभार्याह्वानमिच्छता सूत्रधारेण 'सीतां वनाय परिकर्षति लक्ष्मणोऽयम्' इति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स प्रयोगमतिशयान एवं प्रयोगः प्रयोजितः।**

व्याख्या- लक्षणे लक्षणं इति-- तात्पर्यं गृहीत्वेत्यर्थः । एतद्वाक्यानुकरणं विना तदर्थानुशीलनेनैव 'आः' इत्याद्युक्तवन्तः भीमसेनस्य प्रवेश इत्यनन्तरं प्रथमार्थमादाय इति। अत्र द्वितीयः प्रकारः कथोद्घातः।

तृतीयं प्रस्तावना भेदं प्रयोगातिशय-लक्षणम्

**तृतीयं प्रयोगातिशयलक्षणम्-** एकस्मिन् प्रयोगे सति यदि अन्यः प्रयोगः प्रयुज्यते तेनैव हि तत्पूर्वविषयविचारस्यातिक्रमणं विधाय अन्यस्य विषयस्य विचारो विधीयते चेत् तेन द्वितीयप्रयोगेण पात्रस्य प्रवेशोऽस्ति तदा सः प्रयोगातिशयो नाम तृतीयः प्रस्तावनाभेदः स्यात्। लक्ष्ये लक्षणं सङ्गमयितुम्- यथा कुन्दमालायामिति। एतन्नामिकायां

नाटिकायामित्यर्थः। नटीरूपस्तु सूत्रधारेणावगतः स्वप्रयोगमतिशयानः प्रकृतार्थप्रतिपादनात्।

सीता लङ्केश्वरस्य गृहे दशमासपर्यन्तं स्थिता, अतस्तस्याः सतीत्वं सन्देह एवेत्यभिप्रायः, इति लोके यः अपवादः तस्मात् आकुलेन रामेण गर्भे भारभूतामपि जनपदात् अयोध्यातो निष्कासितां सीताम् अयं लक्ष्मणः आकर्षति। लक्ष्ये लक्षणं घटयन् प्रयोगातिशयपदयोगार्थं दर्शयति- नृत्यप्रयोगार्थं सूत्रधारस्य नृत्यरूपः स्वप्रयोगस्तदर्थमित्यर्थः। स्वभार्याया नाट्या आह्वानम्। स्वप्रयोगं स्वकृत्य- विषयं नृत्यम्, अतिशयान एवं अतिक्रामन्नेव प्रयोगः प्रयोजितः सीतालक्ष्मणयोः प्रदेश- रूपोऽन्यः प्रयोगः सूचित इत्यर्थ। नन्वेवमपि अन्येष्वप्युद्धात्यकादिषु प्रस्तावनाभेदेषु चतुर्षु सूत्रधारेण स्वप्रयोगमतिक्रम्य प्रयोगान्तरेणैव पात्रप्रवेशस्य द्योतितत्वात् प्रयोगातिशयातिप्रसङ्ग इति चेत्? मैवम् सामान्यविशेषाभ्युपगमात्। तथा च यत्र यत्र विशेषाणामुद्द्धाव्यकादीनामसम्भवस्तत्र तत्रैव प्रयोगातिशय इत्याशयः।

**कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत्।**
**तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्तकम्॥३७॥**

**यथा- 'आसादितप्रकट-' इत्यादि (३३२)। 'ततः प्रविशति यथानिर्दिष्टो रामः।**

**यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते।**
**प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः॥३८॥**

**यथा शाकुन्तले-सूत्रधारो नटीं प्रति। 'तवाऽस्मि गीतरागेण-'(३३३) इत्यादि। ततो राज्ञः प्रवेशः।**
**योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि।**

**अत्र आमुखे। उद्धात्य (त) कावलगितयोरितराणि वीथ्यङ्गानि वच्यमाणानि।**

तुरीयप्रस्तावनाभेदम्

व्याख्या- **तुरीयं प्रवर्त्तकलक्षणम्**--सूत्रधृक् सूत्रधारो यत्र प्रवृत्तं कालं (वसन्तादिसमयविशेषम्) आश्रित्य वर्णयेत्, तदाश्रय- श्लेपादिद्वारा प्रवृत्तकालवर्णनासूचितश्च पात्रस्य इति वृत्तान्तर्गतजनस्य प्रवेशो भवति। पात्रमभिनये प्रवर्त्तयतीति व्युत्पत्या प्रवर्त्तकं नाम तुरीयप्रस्तावनाभेदोऽवगन्तव्यः।

**पञ्चममवलगिताख्यं प्रस्तावनाभेदलक्षणम्** -- यत्र प्रयोगे एकस्मिन् विषये समावेशात् अन्यद् उपमानभूतपानप्रवेशसूचकरूपं कार्य प्रसाध्यते बुधैस्तदामुखं भवति। लक्ष्ये लक्षणं सङ्घटयति-यथा शाकुन्तल इति। अत्र गीतप्रशंसारूपप्रयोगे राज्ञः प्रवेशरूपमन्यत्कार्यं साधितम्। इत्यं प्रस्तावनारूपस्य उद्धात्यकादिपञ्चभेदमभिधाय तत्रैव प्रयोगे यथालाभं वीथ्यङ्गान्यपि प्रयोजनीयानी इति आशयेना- अत्र प्रस्तावनायां यथालाभं

यथासम्भवम् इतराण्यपि उद्घाव्यकावलगितयोरेवंतराणि तथा च उद्घात्यकावलगित भिन्नान्यपीत्यर्थः।

**नखकुट्टस्तु-**

**नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा।।३९।।**

**समाश्रित्यापि कर्तव्यमामुखं नाटकादिषु।**
**एषामाखभेदानामेकं कश्चित्प्रयोजयेत्॥४०॥**

**तेनार्थमथ पात्रं वा समाक्षिप्यैव सूत्रधृक्।**
**प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रयोजयेत्॥४१।।**

**वस्त्वितिवृत्तम् ।**

**इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते।**
**आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम्।।४२।।**

**अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः।**
**तस्येतिवृत्तं कविभिराधिकारिकमुच्यते॥४३॥**

**फले प्रधानफले । यथा बालरामायणे रामचरितम्।**

**अस्योपकरणार्थं तु प्रासङ्गिकमितीष्यते।**

**अस्याधिकारिकेतिवृत्तस्य उपकरणनिमित्तं यच्चरितं तत्प्रासङ्गिकम्। यथा सुग्रीङ्वादिचरितम्।**

आमुखस्य भेदम्

व्याख्या- आमुखस्य अमी पञ्चप्रभेदाः प्रविष्टपात्रसूचिताः पात्रान्तरप्रवेशघटिता उक्ताः। अथाप्रविष्टसूचितपात्रघटितोऽपि नखकुट्टाख्यः षष्ठः प्रभेद इति। नेपथ्योक्तं वाक्यं सूत्रधारेणाकर्णितं समाश्रित्य तथा आकाशे भाषितं यस्य तादृशं भूतं समाश्रित्य वा आमुखं समन्तान्मुखं कर्त्तव्यम् इत्थं आमुखस्य षट्भेदाः। सूत्रधार एषाम् उद्घात्यकादीनाम् आमुखभेदानां यं कश्चिदेकं भेद प्रयोजयेत्। तेन प्रयुक्तमुखभेदेन वृत्तान्तम् अथवा पात्रं समाक्षिप्य एव तादृशप्रस्तावनान्ते निर्गच्छेत्, ततः सूत्रधारंगमनानन्तरं वस्तु इति प्रयोजयेत् नाटकं रचयितुमारभेत।

इतिवृत्तस्य भेदद्वयम्

**इतिवृत्तस्य भेदद्वयम्** - बुधैस्तत्त्वविद्भिः, इदं नखकुट्टुकारिकोक्तं वस्तु इतिवृत्तं द्विविधं परिकल्प्यते। तयोरेकम् आधिकारिकज्ञानं तावदधिकारेण निवृत्तम्, तच्चाधिकारज्ञानाधीनमित्यधिकारं निरूपयति। प्रधानफले स्वाम्यं फलभोक्तत्वम् अधिकारः। अधिकारिणः इतिवृत्तं वृत्तान्त आधिकारिकम् उच्यते। उदाहरति-यथा बालरामायणे तदाख्ये राजशेखरकृते महानाटके इत्यर्थः। रामचरितमिति। तत्र हि रामः रावणादिवधफले स्वामी। तस्य चरितमाधिकारिकमिति तत्वम्।

उपकरणनिमित्तम् उपकरणमुपकारः, तन्निमित्तं तदर्थ- मित्यर्थः। सुग्रीवादिचरितस्य रामचरितसाहाय्ये निमित्तत्वात् प्रासङ्गिकमिति भावः। आदिना प्रतिनायकादेर्ग्रहणम्।

**पताकास्थानकं योज्यं सुविचार्यैह वस्तुनि॥४४॥**

**इह नान्त्ये**

**'यत्रार्थे चिन्तितेऽन्यस्मिस्तल्लिङ्गोऽन्यः प्रयुज्यते।**
**आगन्तुकेन भावेन पताकास्थानकं तु तत्।।४५।।**

**तद्भेदानाह –**

**सहसैवार्थसंपत्तिर्गुणवत्युपचारतः।**
**पताकास्थानकमिदं प्रथमं परिकीर्तितम्॥४६॥**

**यथा रत्नावल्याम्- 'वासवदत्तेयम्' इति राजा यदा तत्कण्ठपाशं मोचयति तदा तदुक्त्या 'सागरिकेयम्' इति प्रत्यभिज्ञाय 'कथं? प्रिया मे सागरिका?**

**अलमलमतिमात्रं साहवसेनामुना ते**
**त्वरितमयि ! बिमुञ्च त्वं लतापाशमेतम्।**
**चलितमपि निरोद्धुं जीवितं जीवितेशे!**
**क्षणमिह मम कण्ठे बहुपाशं निधेहि।।'**

नाटकस्यान्तरङ्गं पताकास्थानं- प्रथमं पताकास्थानकम्

**व्याख्या-** नाटकस्यान्तरङ्गं पताकास्थानमिति- कविना सम्यग्विचार्य्य इह नाट्ये वस्तुनि पताकास्थानकं योज्यं निबन्धनीयं रचनीयमित्यर्थः पताकास्थानकमिति।ननु किं तत् पताकास्थानमिति जिज्ञासायां तल्लक्षणं दर्शयति। यत्र स्थाने अन्यस्मिन् अर्थे चिन्तिते पदार्थत्वेन युध्यमाने सति आगन्तुकेन भावेन चिन्तितार्थसमानचिह्नकः अन्योऽर्थः क्रियते उपस्थाप्यत इति पताकावत् नाट्यस्य प्रसिद्ध्युत्पादकत्वात् पताकास्थानकमित्यभिधीयते। तद्भेदान्- यत्र सहसैव अतर्कितकारणेनैव उपचारतः प्रीत्यनुकूलव्यापारात् गुणवती अर्थसम्पत्तिः स्यात् तदिदं प्रथमं पताकास्थानकं परिकीर्तितम्।

वासवदत्ता वत्सराजोदयनस्य पत्नी। अत्र सन्दर्भ- (वासवदत्तावेशेन सागरिका आयास्यतीति कृतसङ्केते राज्ञि स्थिते तज्ज्ञात्वा सागरिकाया आगमनात्पूर्व वासवदत्तैवागत्य सङ्केतभङ्गं विधाय राजानं ह्वेपयित्वा प्रस्थिता। राजा च तामनुनेतुं पश्चाञ्चलितः। ततस्तद्वेषा सागरिका आगत्य राजानमप्राप्य निर्वेदाल्लतापाशेनात्मानं बध्वा तत्रैव मर्त्तुमारन्धः। राजा च वासवदत्तामनुनेतुं चलितः। पथि तां दृष्ट्वा वासवदतैवेयं म्रियत इति सागरिकायां वासवदत्ताभ्रमे पाशं मोचयितुं प्रवृत्त इति।) तदुक्त्या तस्या सागरिकाया उक्त्या 'सागरिकेयम्' इति प्रत्यभिज्ञाय कथमिति प्रश्ने प्रिया मे सागरिका इत्यनन्तरम् इत्याक्षेपो विधेयः। ते तव अमुना उद्बध्यमरणरूपेण अत्यन्तम् इदञ्च

साहसपदार्थाविमृश्यकारित्वक्रियाया विशेषणम्, साहसेन प्राणस्यागरूपेणाविमृश्यकर्मणा अलमलमिति, अयि! एवं प्राणत्यागार्थ गृहीतमेनं पुरोवर्त्तिनं लतायाः पाशः,त्वरितमाशु यथा स्यात्तथा त्यज, हे जीवितेशे! चलितमपि चञ्चलमित्यर्थः यद्वा गन्तुभुद्यतमपि इत्यर्थः। त्वत्-वियोगेन निरोद्धुम् इह अस्मिन् देशे एकान्त इत्याशयः, मम कण्ठे क्षणं, विधेदि। अत्र वासवदत्ताया अनुनयपूर्वकं सुरतं राज्ञोऽभिलषितम्, तदन्यस्याः सागरिकायाः अनुनयपूर्वकसुरतस्यानुष्टानमिति प्रतीयमानोऽर्थः।

**अत्र फलरूपार्थसंपत्तिः पूर्वापेक्षयोपचारातिशयाद् गुणवत्युत्कृष्टा।**

**वचः सातिशयं श्लिष्टं नानावन्वसमाश्रयम्।**
**पताकास्थानकमिदं द्वितीयं परिकीर्तितम्॥४७॥**

**यथा वेण्याम्-**

**'रक्तप्रसाधितभुवः क्षतविग्रहाच स्वस्था भवन्तु कुरुराजसुताः सभृत्याः।'**

**अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनान्नेतृ-मङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम्।**

**अथोपक्षेपकं यत्तु लीनं सविनयं भवेत्।**
**श्लिष्टप्र युत्तरोपेतं तृतीयमिदमुच्यते॥४८॥**

**लीनमव्यक्तार्थम्, श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतम्, सविनयं विशेषनिश्चयप्रास्या सहितं संपाद्यते यत्तृतीयं पताकास्थानकम्।**

व्याख्या- तथा चोदाहृते क्षणसमन्वयव्याजेन तदर्थं दर्शयति। फलरूपस्य कालादुद्देश्यभूतस्य अर्थस्य सागरिकासुरतस्य सम्पत्तिः उपलब्धिः पूर्वापेक्षया उपचारातिशयात् प्रीत्यतिशयोत्पादनात् गुणवती प्रशस्तगुणा। अत्र वासवदत्तामरणरूपेऽन्यस्मिन्नर्थे चिन्तिते आगन्तुकेन वासवदत्तामरणचिह्नाद्यङ्कितम्रियमाणसागरिकारूपार्थप्रयोग इति पताकास्थानसामान्यलक्षणं बोध्यम्।

द्वितीयं पताकास्थानकम्

द्वितीयं पताकास्थानलक्षणं दर्शयितुम् इति। सातिशयं श्लिष्टम् अनेकार्थबोधकानेकतरशब्दसहितम्, नानाबन्धः बीजप्रकाशननायक मङ्गलसूचनादिरूपः तत्समाश्रयं तद्विशिष्टम्, वचो वाक्यम् इदं द्वितीयं पताकास्थानकं कथितम्। सूत्रधारवचनमिदं क्रोधाद्भीमेना उक्तम्। अस्य पूर्वार्द्धस्य 'निर्वाणवैरदहनाः" इत्यस्य पताकाघटकत्वाभावादत्र ग्रन्थकृता तदुत्तरार्द्धमेवोपात्तम्। अत्र रक्तादिपदानामित्यर्थः आदिना प्रसाधितविग्रहयोः परिग्रहः। रुधिरशरीररूपौ अर्थौ हेतू यस्य तादृशस्य श्लेषस्य वशेन तद्वारा भीमक्रोधोपचितो युधिष्ठिरोत्साहो बीजं तस्य प्रयोजनं शत्रुमारणं प्रधानफलमिति यावद् तस्य प्रतिपादनात्

नेतुर्युधिष्ठिरस्य मङ्गलप्रतिपत्तौ नायकोत्साहजन्यशत्रु मरणानन्तरं राज्यप्राप्तिरूपमङ्गलज्ञाने, आगन्तुकेन प्रधानफलसूचने नायकमङ्गलज्ञानमिति द्वितीयं पताकास्थानकमिदम्। तथानुरक्ताद्यर्थे चिन्तिते शब्दरूपतल्लिङ्गेभ्यो रुधिराद्यर्थं आगन्तुकेन शब्देन प्रयोगात् पताकास्थान सामान्यलचणमपि। इदं पताकास्थानम् आमुखान्तर्गतं बोध्यम्।

तृतीयं पताकास्थानम्

तृतीयं पताकास्थानम् इति-यत्तु स्थानम् अर्थस्य प्रस्तुतवस्तुः सूचकं लीनमस्फुटार्थम्, सविनयं सनिश्चयम्, श्लिष्टेन उपयुक्तेन प्रत्युत्तरेण उपेतं युक्तश्च वचो भवेदित्यर्थः, इदं तृतीयं पताकास्थानम् उच्यते।

**यथा वेण्यां द्वितीयेऽङ्के-'कञ्चुकी-देव! भग्नं भग्नम्। राजा-केन? कञ्चुकी -भीमेन । राजा-कस्य १ कञ्चुकी- भवतः। राजा-आः! कि प्रलपसि? कञ्चुकी- (समयम्) देव! ननु ब्रवीमि। भग्नं भीमेन भवतः। राजा - धिग् वृद्धापसद ! कोऽयमद्य ते व्यामोहः? कञ्चुकी-देव! न व्यामोहः। सत्यमेव-**

**भग्नं भीमेन भवतो मरुता रथकेतनम्।**
**पतितं किङ्किणीकाणबद्धाक्रन्दमिव क्षितौ॥**

**अत्र दुर्योधनोरूभङ्गरूपप्रस्तुतसंक्रान्तमर्थोपक्षेपणम्।**

**द्व्यार्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।**
**प्रधानार्थान्तराक्षेपी पताकास्थानकं परम् ॥४९॥**

**यथा रत्नावल्याम्--**

**'उद्दामोत्कलिकां विपाण्डुररुचं प्रारम्भां क्षणा-**
**दायासं वनोद्गमैरविरलैरातन्वतीमात्मनः।**
**अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं**
**पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम्॥**

**अत्र भाव्यार्थः सूचितः। एतानि चत्वारि पताकास्थानानि क्वचिन्मङ्गलार्थं क्वचिदमङ्गलार्थं सर्वसन्धिषु भवन्ति। काव्यकर्तुरिच्छावशाद् भूयो भूयोऽपि भवन्ति।**

व्याख्या- उद्दामोत्कलिकादिविशेषणविशिष्टां सागरिकां प्रति वासवदत्तापरिग्रहपरिणयानन्तरमेव राज्ञः साभिलाषदृष्टिपातेन वासवदतामुखस्य कोपपाटलीकरणरूपो भाविविषयः प्रागेव प्रकटित इत्यर्थः। उद्दामोत्कालिकामित्यादिविशेषाणानां सुलिष्टत्वादिना 'द्व्यर्थ इत्यादेर्विशेषपताकास्थानलक्षणं बोद्ध्यम्। तथा कुसुमितलता दर्शनजनितविलम्बेन भाविनि वासवदत्तामुखस्य कोपपाटलीकरणरूपार्थे चिन्तिते आगन्तुकेन सागरिकापरिग्रहभावेन सकामदृष्टिपातादपि वासवदत्तामुखस्य कोपपाटलीकरणरूपार्थः प्रयुक्त इति पताकास्थानसामान्यलक्षणसत्वम्।

पताकास्थान सामान्यलक्षणम्

फलभूतार्थः प्रधानः तस्य हेतुभूतार्थस्तु अनुद्देश्यतया अप्रधानः। प्रकृतोदाहरणे उद्देश्यत्वेन प्रधानस्यैव सागरिकापरिग्रहस्य द्योतनम्, द्वितीयपताकास्थानोदाहरणे रक्तप्रसाधित भुवः' इत्यादौ राज्यप्राप्तिरूपफलं प्रति हेतुत्वादप्रधानस्य भीमसेनरोषवृद्ध युधिष्ठिरात्साहसस्य द्योतनमिति स्पष्टं भेदः। प्रथमे 'अलमलतिमात्रम्' इत्यत्र मर्त्तुं प्रवृत्तवासवदत्ताज्ञानादभिलषितसागरिकाप्राप्तेः उदद्दामोत्कलिकामित्यत्र भाविन्याः सागरिकाप्राप्तेश्चबोधनान्मङ्गलार्थता। 'रक्तप्रसाधितेत्यादौ तु कुरूणां मरणस्य 'भग्नं भीमेनेत्यादौ दुर्योधनोरुभङ्गस्य च बोधनात्तेषाममङ्गलार्थता।

**यत्पुनः केनचिदुक्तम्- 'मुखसन्धिमारभ्य सन्धिचतुष्टये क्रमेण भवन्ति' इति। तदन्ये न मन्यन्ते, एषामत्यन्तमुपादेयानामनियमेन सर्वत्रापि सर्वेषामपि भवितुं युक्तत्वात्।**

**यस्यादनुचितं वस्तु नायकस्य रसस्य वा।**
**विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्॥५०॥**

**अनुचितमितिवृत्तं यथा-रामस्य च्छद्मना बालिवधः। तच्चोदात्तराघवे नोक्तमेव। वीरचरिते' तु वाली रामवधार्थमागतो रामेण हृत इत्यन्यथा कृतः।**

**अङ्गेष्ववदर्शनीया या वक्तव्यैव च संमता।**
**या च स्याद्वर्षपर्यन्तं कथा दिनद्वयादिजा॥५१॥**
**अन्या च विस्तरा सूच्या सार्थोपक्षेपकैर्बुधैः।**

व्याख्या- सन्धिचतुष्टये पताकास्थानस्य चतुष्कत्वात् प्रथमोपस्थित मुखे, प्रतिमुखे, गर्भे, विमर्शे चेति सन्धिचतुष्टये इत्यर्थः। उपादेयानामुत्कृष्टत्वेन ग्राह्याणामित्यर्थः। सर्वत्रापि पञ्चसन्धिष्वपीत्यर्थः। सर्वपताका स्थानानामित्यर्थः। यत् वस्तु इतिवृत्तं नायकस्य रसस्य वा अनुचितं रसस्यानुचितत्वं विरुद्धं वा स्यात् तत् इति वृत्तं कविना परित्याज्यम्। अन्यथा उचितं यथा भवति तथा पुराणादिविरुद्धमपि नायकस्य रसस्य वा सम्बन्धे स्वेच्छया कविना स्वीकार्यम्। कवेर्मुख्यतया नायकोत्कर्षप्रदर्शनस्य रसपुष्टिकरणस्य चोद्देश्यत्वादिति भावः।

मुखसन्धिमारभ्य सन्धिचतुष्टये क्रमेण भवन्ति।

या दूराह्वानावधिप्रकाशिका कथावृत्तान्तः अङ्केषु अदर्शनीया 'दूराह्वानं वधो युद्धम्' इत्यादिनिषिद्धा, अथ च वक्तव्यैव। पूर्वापरकथासंलग्नत्वाभावेन अवश्यकव्यत्येनाभीष्टा, या च कथा दिनद्वयादिजा निर्वर्त्यकथया संप्रयोजितः' इत्यनेन तस्य अङ्के निषिद्धत्वेऽपि 'वर्षपर्यन्तम्' इति नियमार्थं पृथगुपादानम्। एकदिननिवर्त्या अतिविस्तृता च या कथा सा अर्थोपक्षेपकैः विष्कम्भकादिः पञ्चभिर्बुधैः सूच्या। तस्यापि नातिविस्तरः इत्यनेनाङ्गे निषिद्धत्वादिति भावः।

## Summarised Overview

अस्मिन्नेकके प्रथमं वृत्तिं विशदयति- नायकादीनां प्रवर्त्तिस्वरूपा वृत्तिः। भारतीवृत्तेः आद्या प्ररोचना। श्रोतृणां प्रवृत्युन्खीकरणं प्ररोचना नटी सूत्रधारेण स्वस्वकर्तव्यविषयमाश्रित्य चित्रैः बहुभिः वाक्यैः यत्र सम्भाषणं कुरुते तद् आमुखम् (प्रस्थावना)। एकस्मिन् प्रयोगे अन्यः प्रयोगः क्रियते चेत् सः प्रयोगातिशयः। प्रवर्त्तकं अवगलितं षष्ठं प्रभदं नरवकुहाख्यं विशदयति। यज्ञार्थे चिन्तिते अन्यः आगन्तुकः भावः चेत् पताकास्थानकम्। चत्वारी पताकास्थानानि। सन्धि चतुष्टये पताकास्थानकानि क्रमेण भवन्ति।

## Assignments

1. का नाम भारती वृत्तिः? तस्याः कति भेदाः? ताः काः?
2. किं नाम प्रवर्त्तकम्?
3. तुरीयं प्रवर्त्तकलक्षणं निरूपयत।
4. इतिवृत्तस्य भेदद्वयं किम् ?
5. चत्वारि पताकस्थानानि विशदयत।
6. सन्धिचतुष्टये पताकास्थानस्य स्थितिं सूचयतु?

## Suggested Readings


1. कविराजद्विजेन्द्रनाथशास्त्री, संस्कृतसाहित्यविमर्शः, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।
3. T.K.Ramachandra Iyer, A Short History of Sanskrit Literature, R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018.

# References


1. Sahityadarpanam, Acharya Krishna mohan Sastri, Chaukhambha Samskrita Samsthan, Varanasi.
2. Sahityadarpanam, Ed. Devadetta Kausika, Bharathiyavidyaprakasan, NewDelhi.
3. Sahityadarpanam, Ed. Saligramasastri, Motilal Banarsidass, New Delhi.


## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# साहित्यदर्पणम् भागः 2

# BLOCK 2

UNIT 1

# साहित्यदर्पणम् परिच्छेदः- 6 (अर्थोपक्षेपकः, अर्थप्रकृतयः)

## Learning Outcomes

- संस्कृतनाटके प्रतिपादितस्य अर्थोपक्षेपकस्य ज्ञानम् लभते।
- अर्थप्रकृतेः ज्ञानम् प्राप्नोति।
- नाटके अवस्थायाः स्वाधीनं ज्ञायते।

## Background

रूपकेषु नाटकस्य प्रामुख्यादेव तत्र कथावस्तुनः सन्निवेशः सुसूक्ष्मं करणीयः। तत एव धनञ्जयः नाटककथावस्तु पञ्चसन्धिषु संविभज्य प्रयोक्तव्यमिति सिद्धान्तयति। पञ्चानामर्थप्रकृतीनां पञ्चानामवस्थानात् च सम्यक्तयासन्निवेशेन सन्धिकार्यंनिर्वर्त्यत इत्यतस्तदधिकृत्याऽपि किञ्चिद्वक्तव्यमेव। अर्थप्रकृतिरित्यत्र अर्थशब्देन प्रयोजनं अथवा फलम् उद्दिश्यते। प्रकृतिरिति तस्यसिद्धिहेतुः फलप्राप्त्यर्थंयाः उपयुज्यन्ते एवार्थप्रकृतयः। धनञ्जयेन दशरूपके अर्थप्रकृतयः, अवस्थाः,पञ्चसन्धयश्चोक्ताः। एतत्प्रतिपादनाय प्रथममेव कथावस्तुनः(इतिवृत्तस्य) आधिकारिकं प्रासङ्गिकञ्चेति द्वैविध्यमुक्तम्। कथावस्तुनः आत्यन्तिकफलप्राप्तेः अर्हतैव अधिकारशब्देन विवक्षिता। मुख्यकथायाः फलप्राप्तिपर्यन्तं अभिव्याप्यस्थितं भवत्याधिकारिकंवस्तु। तत्र च फलप्राप्तिः नायकस्यैव स्यात्। नायकस्य फलप्राप्तौ सहायकतया, मुख्यकथाङ्गरूपेण वर्तमानं भवति प्रासङ्गिकं वस्तु। प्रासङ्गिकेऽपि वस्तुनि तन्नायकस्य स्वकार्यसिद्धिर्भवति। यथा रामायणे सीतान्वेषणाय रामस्य साहाय्यं कुर्वतः सुग्रीवस्यापि राज्यप्राप्तिः। प्रासङ्गिकस्य वस्तुनः पताका-प्रकरी चेति भेदाद्वैविध्यम्। बीजं, बिन्दुः, पताका, प्रकरी, कार्यं इत्येते पञ्च अर्थप्रकृतयः इति। चोक्तम् –

"बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः।

अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः॥" (द.रू. 1.18) इति।

अथ अवस्थापञ्चकमप्याह-

"अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।

आरम्भयत्नप्राप्त्याशशानियताप्तिफलागमाः ।।" (द.रू.1.19 ) इति।

## Keywords

अर्थोपक्षेपकः, विष्कस्भम्, प्रवेशकम्, चूलिका, अङ्कमुखम्, प्रकरी, अर्थप्रकृतयः।

## Discussion

### 2.1.1 अर्थोपक्षेपकः

यत्पुनः केनचिदुक्तनम्- 'मुखसन्धिमारभ्य सन्धि चतुष्टये क्रमेण भवन्ति' इति। तदन्ये न मन्यन्ते एषामत्यन्तमुपादेयानामनियमेन सर्वत्रापि सर्वेषामपि भवितुं युक्तत्वात्।

यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा।
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्॥५०॥

अनुचितमितिवृत्तं यथा- रामस्याच्छद्मना बालिवधः। तच्चोदात्तराघवे नोक्तमेव वीरचरिते' तु बाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः।

अङ्केष्वदर्शनीया या वक्तश्यैव च संमता।
या च स्याद्वर्षपर्यन्तं कथा दिनद्वयादिजा ॥५१॥

एकदिनमात्रस्य च कथाया दर्शनीयता दिनद्वयादिकथायाः कथं परिग्रहः कथाविस्तारो वा रसविघ्न हेतुत्वात्कथमङ्के दर्शनीय इति। अन्या एकदिननिर्वर्त्या विस्तरा अतिविस्तृता या च कथा सा तत् सर्वा अर्थोपक्षेपकैः वक्ष्यमाणार्थोपक्षेपक परिभावितैर्विष्कम्भकादि पञ्चभिर्बुधैः प्रकाश्या इति।

अन्या च विस्तरा सूच्या सार्थोपक्षेपकैरबुधैः।

अङ्केषु अदर्शनीया कथा युद्धादिकथा।
वर्षादूर्ध्वं तु यद्वस्तु तत्स्याद्वर्षादधोभवम्॥५२॥

उक्तं हि मुनिना-

'अङ्कच्छेदे **कार्यं** मासकृतं वर्षसञ्चितं वापि।
तत्सर्वं कर्तव्यं वर्षादूर्ध्वं न तु कदाचित्॥

एवं च चतुर्दशवर्षव्यापिन्यपि रामवनवासे ये ये विराधवधादयः कथाम् शास्ते ते वर्षवर्षावयवदिन युग्मादीनामेकतमेन सूचनीया न विरुद्धाः।

दिनावसाने कार्य यद्दिने नैवोपपद्यते।
अर्थोपक्षेपकैर्वाच्यमङ्कच्छेदं विधाय तत्।।५३।।

के तेऽर्थोपक्षेपका इत्याह-

अर्थोपक्षेपकाः पञ्च विष्कम्भक प्रवेशकौ।
चूलिकाङ्काऽवतारोऽथ स्यादङ्कमुखमित्यपि ॥५४।।

विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः, अङ्कमुखश्च

यत् वस्तु वृत्तान्तं वर्षादूर्ध्वं वर्षातिरिक्त कालनिर्वर्त्यं पुराणादिषु प्रसिद्धम्। मासकृतम् एकमासादिना निर्वर्त्यं, वर्षसञ्चितं वा इतिवृतम् अङ्कस्यच्छेदे समाप्तौ विष्कम्भकादावित्यर्थः। फलितार्थमाह- बहुसमयव्यापितया पुराणेतिहासादिषु प्रसिद्धानामपि वृतान्तानां स्वल्पसमयनिर्वर्त्येन वर्णनस्य नाट्यशास्त्रप्रवर्तक भरतादिमहर्षिसम्मतत्वे इत्यर्थः। वर्षो हायनः वर्षावयवो मासः दिनयुग्मं वासरद्वयम् आदिपदादेकदिनादिकं च सेवामेकतमेन कविता प्रकटनीयाः। अर्थोपक्षेपकाः- अर्थान् सरसवस्तूति उपस्थापयन्ति ये ते तथोक्ताः। अर्थोपक्षेपका पञ्चविधाः- विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः, अङ्कमुखश्च इति।

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥५५॥

मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः।
शुद्धः स्यात्स तु संकीर्णो नीचमध्यमकल्पितः॥५६॥

तत्र शुद्धो यथा- मालतीमाधवे श्मशाने कपालकुण्डला। सङ्कीर्णो यथा- रामाभिनन्दे क्षपणककापालिकौ।

### 2.1.1.1 विष्कम्भकः

शुद्धसङ्कीर्णभेदेन द्विविधो विष्कम्भकः

यत् कार्यम् इतिवृत्तम्, दिनम् अवसानमन्तोऽन्त्यम् अवधिर्यस्य तस्मिन् तथाभूते अङ्के इत्यर्थः, नैव उपपद्यते तदपि कार्य्यम् अङ्कस्य छेदं विष्कम्भादिवाच्यं विधाय अर्थोपक्षेपकैर्वाच्यं कविना वर्णनीयम्। तथा सति संक्षेपता रसरहितः अपि अनायासेनोपपद्यत इति भावः। वृत्तानामतीतानां वृत्तान्तभागानां संक्षिप्तार्थः,अङ्कस्यादौ प्रयोजितो विष्कम्भः स्यादित्यत्र सम्बन्धः। शुद्धसङ्कीर्णभेदेन द्विविधो विष्कम्भकः। तत्र मध्यमेन नाट्ये 'नात्युश्चनीचपात्रं तु मध्यमित्यभिधीयते' इत्युक्तेन एकेन पात्रेण मध्यमाभ्यां द्वाभ्यां पात्राभ्यां वा मध्यमैर्बहुभिः पात्रैर्वा

कल्पित इत्यर्थः, संस्कृतात्मकः शुद्धः स्यात्। नीचम् अधमम्, मध्यमाभ्यां पात्राभ्यां कल्पितः प्रयोजितः संस्कृतप्राकृतात्मकः सङ्कीर्णमिश्रः स्यात्। तथा च एकजातीयपात्रप्रयुक्तत्वेन शुद्धत्वम्, विभिन्नजातीयपात्रप्रयुक्तत्वेन सङ्कीर्णत्वं इत्यवगन्तव्यम्। इदमत्र बोध्यम्- विष्कम्भके पात्राणां संस्कृतभाषित्वस्य च मध्यमपात्राणां हि प्राकृतभाषित्वम्। तदुक्तं भाषार्णवे- वि'भाषा मध्यमपात्राणां नाटकादौ विशेषतः। महाराष्ट्री शौरसेनीत्युक्ता भाषा द्विधा बुधैः॥' इति।

यथोक्तमुदाहर्त्तुं इति- मालतीमाधवे प्रकरणरूपके। अघोरघण्टस्य कापालिकी शिष्या तथा प्रयोजित इति। अयमाशयः मालतीमाधवे तृतीयेऽङ्के 'ततः आकाशयानेन भीषणोज्ज्वलवेषा कपालकुण्डला इदं तावत्पुराणनिम्वतैलाक्तपरिभृज्यमानरसोनगन्धिभिश्रिताधूमैः पुरस्ताद्विभावितस्यमबतः शमराजवटस्य नेदीयः करालायतनम्- इत्येवं कुण्डलया मध्यमपात्रत्वाच्छुद्धो विष्कम्भः एवमुत्तरत्रापि।

**अथ प्रवेशकः-**

**प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।**
**अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥५७॥**

**अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः। यथा- वेण्यामश्वत्थामङ्के राक्षसमिथुनम्।**

### 2.1.1.2 प्रवेशकः

प्रवेशकः

द्वितीयमर्थोपक्षेकं लक्षयति-प्रवेशक इति। अङ्कद्वयस्य अन्तर्मध्ये अनुदात्तोक्त्या संस्कृतेतरभाषया नीचेन नीचाभ्यां पात्राभ्यां नीचैर्वा पात्रैः प्रयोजितो रूपकांशविशेषःअप्रत्यक्षानर्थान् सामाजिक हृदये प्रवेशयति। अत्र नीचत्वं हि संस्कृतेतर भाषित्वादेव, तेन सख्यादिभिश्च प्रवेशकस्य प्रयोजितत्वम्। शेषम् विष्कम्भके यथा विष्कम्भकवद्विज्ञेयम्। एवं च 'वृत्तिवर्त्तिष्यमाण' इत्यादिविशेषणमात्राप्यवश्यं प्रयोक्तव्यमिति भावः।

अङ्कद्वयस्यान्तरिति प्रथमाङ्कस्य प्रतिषेधः। यथा- वेण्यामश्वत्थामाङ्के राक्षसमिथुनम्। प्रथमाङ्के अद्वयपदस्य द्वितीयाङ्कपरत्वमिति स्पष्टयति। कर्त्तव्ये विधेये अस्य प्रवेशकस्य। वेणीसंहारनाटके, अश्वत्थामप्रधानतृतीयाऽङ्के। राक्षसेन नीचोक्त्या सिन्धुराजवधः, भाविदुः शासनवधेऽत्र सूचित इति भावः। अत्र पात्रवैलक्षण्यप्रतिपादनेन विष्कम्भकस्य वैलक्षण्यं प्रतिपादितम्।

**अथ चूलिका-**

**अन्तर्जावनिकासंस्थैः सूचनार्थस्य चूलिका।**

**यथा वीरचरिते चतुर्थाङ्कस्यादौ -(नेपथ्ये) भो भो वैमानिकाः, प्रवर्त्तान्तां रङ्गमङ्गलानि इत्यादि। रामेण परशुरामो जितः इति नेपथ्ये पात्रैः सूचितम्।**

### 2.1.1.3 चूलिका -

अन्तर्जावनिकासंस्थैः सूचनार्थस्य चूलिका

तृतीयमर्थोपक्षेपकं लक्षयति -जवनिका नटानां वेशस्थानम्, तस्या अन्तराले संस्थितैः पात्रैः जवनिकान्तर्देशस्थायिभिरित्यर्थः,अर्थस्य कस्यचिद्वस्तुविशेषस्य सूचना सा चूलिका रङ्गाभिनेयार्थस्य नेपथ्यपात्रोक्तेः शिखाकल्पत्वात्। अत्रान्तर्जवनिकासंस्थैरिति बहुवचनेनैतत्सूचकानां सम्भाव्यमानानां सर्वेषामेव पात्राणां जबनिकाऽन्तर्देशस्थितत्वं ग्रन्थकृदभिप्रेतम्, अत एवं शाकुन्तले चतुर्थाङ्के विष्कम्भके जवनिकान्तर्देशस्थितेन दुर्वाससा शापाभिव्यञ्जनेऽपि वाह्यस्थिताभ्यामेव अनसूयप्रियंवदाभ्यां अर्थेऽस्चनान्नैतल्लक्षणा अतिव्याप्तिरिति बोध्यम्। तथा च यत्र प्रवेशविनिर्गमौ प्रत्यक्षसिद्धौ साहि स्थिता तत्र तृतीया चूलिका। उदाहरति-यति। वैमानिकाः विमानचारिण इत्यर्थः। मङ्गलानि नाव्यादिमहोत्सवाः। अयमाशयः तत्र हि 'प्रवर्त्तन्तां मङ्गलानि' इत्युद्धोषानन्तरम्- कृशाश्वान्तेवासी जयति भगवान् कौशिकमुनिः सहस्रांशोवंशे जयति जगति क्षत्रमधुना। विनेता सत्रारेर्जगदभयदानव्रतधनः, शरण्यो लोकानां दिनकर कुलेन्दुर्विजयते॥' इति पात्रैः पठित्वा 'रामेण परशुरामो जित' इति सूचितं तूक्तम्।

**अथाङ्कावतारः-**

**अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः॥५८॥**
**यत्राङ्कोऽवतरत्येषोङ्कावतार इति स्मृतः।**

**यूथा- अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः षष्ठाङ्कस्तदङ्कस्याङ्गविशेष इवावतीर्णः।**

### 2.1.1.4 अङ्कावतारः -

यस्य कस्यचिदङ्कस्य अन्ते पात्रैः अङ्कः सूचितः

चतुर्थमर्थोपक्षेपकं लक्षयति- यस्य कस्यचिदङ्कस्य अन्ते पात्रैः अङ्कः सूचितः इत्यर्थे। तस्य अङ्कस्य विभागस्तद्भेदः अङ्कः अङ्कान्तरम् अवतरति एष सः अभिन्नत्वेन अङ्कावतारमवतरति इति स्मृतः कथितः। उदाहरति- अभिज्ञाने अभिज्ञानशाकुन्तलनाटके इत्यर्थः। परं तु यत्राङ्केऽन्याङ्कानां बीजलक्षणोऽर्थोऽवतार्य्यते तमङ्कावतारम् आमनन्ति। यथा- रत्नावल्यां द्वितीयोऽङ्कः ।

**अबाङ्कमुखम्-**

**यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाऽखिला॥५९॥**
**तदङ्कमुखमित्याहुर्बीजार्थख्यापकं च तत्।**

**यथा- मालतीमाधवे प्रथमाङ्कादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीनां भाविभूमिकानां परिक्षिप्तकथाप्रबन्धस्य च प्रसङ्गात्संनिवेशं सूचितवत्यौ।**

**अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्॥६०॥**
**अङ्कान्तपात्रैरङ्कान्ते प्रविष्टैः पात्रैः। यथा वीरचरिते**

द्वितीयाऽङ्कान्ते- '(प्रविश्य) सुमन्त्रः - भगवन्तौ वशिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः। इतरे-क्क भगवन्तौ। सुमन्त्रः- महाराजदशरथस्यान्तिके। इतरे- तत्तत्रैव गच्छावः' इत्यङ्कपरिसमाप्तौ। 'ततः प्रविशन्त्युपविष्टा वशिष्ठविश्वामित्रपरशु- रामाः) इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनक- कथाविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यम्' इति।

### 2.1.1.5 अङ्कमुखम्-

अखिला सूचना स्यात् कवयस्तम् अङ्कमुखम्

अथ पञ्चममर्थोपक्षेपकं लक्षयति- एकस्मिन्नङ्गानां समस्ताङ्ग वक्ष्यमाणानामर्थानाम् अनिबन्धनीयवस्तूनामिति यावत्। अखिला सूचना स्यात् कवयस्तम् 'अङ्कमुखम्' इत्याहुः। सर्वेषामङ्गानां विषयसूचनद्वारा मुखं तेषां प्रथममित्यङ्कमुखम्। तच्चबीजार्थस्य व्यापकं लक्ष्यमाणार्थप्रकृतिविशेषस्य सूचकं भवेत्। उदाहरति- प्रथमाङ्कादौ प्रथमाङ्कस्य पूर्वमित्यर्थः। भाविन्यो भूमिकास्तशरचना येषां तेषां तथोक्तानाम परिक्षितकथाप्रबन्धस्य समग्राङ्कवृत्तानिकरस्य। इदानीं प्रचलितमानमा तु तस्य विष्कम्भक संज्ञेत्यवलोक्यते। लक्ष्यविशेषव्यापनार्थं धनिकेनोन्मुखस्य लक्षणान्तरं भवति। अङ्कान्ते प्रविष्टैः पात्रविशेषैरित्यर्थः। भिन्नस्य परिवर्त्तिनः अङ्कस्य अर्थसूचनात् विषयद्योतनात् अङ्कास्यम् अङ्कमुखं स्यात्। पूर्व लक्षणे पूर्व प्रविष्टैः समस्ताङ्कार्थसूचनम् अत्र तु अङ्कान्तः प्रविष्टपात्रैस्तदुत्तराङ्कार्धमात्र सूचनमिति भेदः।

एतच्च धनिकमतानुसारेणोक्तम्। अन्ये तु 'अङ्कावतरणेनैवेदं गतार्थन्' इत्याहुः।

अपेक्षितं परित्याज्यं नीरसं वस्तु विस्तरम्।
यदा संदर्शयेच्छेषमामुखानन्तरं तदा।।६२।।
कार्यो विष्कम्भको नाट्य आमुखाक्षिप्तपात्रकः।

यया - रत्नावल्यां यौगन्धरायणप्रयोजितः।

यदा तु सरसं वस्तु मूलादेव प्रवर्तते॥६२॥
आदावेव तदाऽङ्के स्यादामुखाक्षेपसंश्रयः।

यथा - शाकुन्तले।

विष्कम्भकाद्यैरपि नो वचो वाच्योऽविकारिणः॥६३॥
अन्योऽन्येन तिरोधानं न कुर्याद्रसवस्तुनोः।

रस शृङ्गारादिः।

न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत्।
रसं वा न तिरोदध्याद्वस्त्वलङ्कारलक्षणैः॥ इति।

अङ्गावतारलक्षणेनैव इदम् उपर्युक्तवीरचरितस्थानं गतार्थं लब्धविषयम्। एवं चात्राङ्कावतारलक्षणसत्वादयमङ्कावतार एव इति।

उपर्युक्तवीरचरित स्थानं गतार्थं लब्धविषयम् अङ्कावतारम्विष्क

वस्तुतस्तु आहुरियमनेनास्वरसः सूचितं तस्मात् बीजं तु स्वमतस्याप्रतिपादनमेव, तस्मादिदं विभिन्न प्रकारकमङ्कमुखमेवेति। अथ नाट्यदर्पणे विष्कम्भादीनां व्यवस्थाम्-आदौ सूच्ये वहावन्ये क्रमादल्पेतरे तमे। बहुकाले च सूच्ये आदौ विष्कम्भक प्रवेशकौ। अल्पतरकाले अङ्कस्याम् च चूलिका अन्यतमे काले च अङ्गावतार इति।

विष्कम्भकस्य उपलक्षणम्

### विष्कम्भकस्य उपलक्षणम्-

विष्कम्भककरणमङ्कादावेति प्राग्दर्शितम्, इदानीं तस्यैव विशेषवशादामुखस्यान्तेऽपि करणमिति। यदा अपेक्षितम् एकवृत्तान्तगतत्वेन आवश्यम् उद्देश्यरसशून्यं, विस्तरं यस्तु तद्वृत्तान्तांशम् परित्यज्य कविः शेषं सरसं वस्तु सन्दर्शयेत् यावत्, तदा तेन कविना नाट्ये कार्यौ निर्मातव्यः। विष्कम्भकस्य उपलक्षणं, तेन प्रवेशकादेरपि सङ्ग्रहः। उदाहरति- अपेक्षितो वत्सराजसागरिकयोर्वृत्तान्तः तं परित्यज्यामुखानन्तरं स्वभयं यौगन्धरायणेन दर्शितम्। मूलादेव सरसं वस्तु वृत्तान्तः प्रवर्त्तते, तदा आमुखेन प्रस्तावनया य आक्षेपः पात्रप्रवे-शनसूचनं तं संश्रयति अवलम्बते तमाश्रित्य प्रवृत्त इत्यर्थः। प्रथमं तत्र विष्कम्भक निर्माणस्य नास्ति प्रयोजनमिति भावः। उदाहरणं शाकुन्तल इति अभिज्ञानशाकुन्तलनाटके इत्यर्थः।

**बीजंबिन्दुः पताका च प्रकरी कार्यमेव च॥६४॥**
**अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि।**

**अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः। तत्र बीजम्-**

**अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति॥६५॥**
**फलस्य प्रथमो हेतुर्बीजं तदभिधीयते।**

**यथा- रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगन्धरायणव्यापारः। यथा वा वेण्यां द्रौपदीकेशसंयमन-हेतुर्भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः।**

अर्थप्रकृतेः कारणानि बीजं, बिन्दु, पताका, प्रकरी, कार्यं च

### 2.1.2 अर्थप्रकृतेः भेदनिरुपणम्

'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् इत्युक्तदिशासन्धिलक्षणं प्रकारान्तं तन्निरूपणायैवतद् घटकार्थप्रकृतीः निरुपयति। प्रक्रियते प्रयोजनं साध्यते आभिरिति प्रकृतयो हेतवः। तथा बीजं, बिन्दु, पताका, प्रकरी, कार्यं च, एताः अर्थप्रकृतेः कारणानि इति।

**2.1.2.1 बीजम्-** यत् अल्पमात्रं समुद्दिष्टम् आदौ अङ्कुरितत्वमात्रेण प्रदर्शितंसत् विविधौ अवान्तरकार्याणि जनयति तथा फलस्य नायकमुख्योद्देश्यस्य प्रथमो हेतुः, तत् धान्यबीजवत् यत् वीजम् अभिधीयते। बीजं हि नाटकादेः इतिवृत्तास्र्थस्योपायः, आमुखं तु

बीजम् हि नाटकादेः इतिवृत्तार्थस्य उपायः

रूपकप्रस्तावनार्थं नटस्यैवस्ववृत्तमिति बोध्यम्। उदाहरति-वेणीसंहार नाटके।द्रौपद्याः केशसंयमनं प्रधानं फलं तस्य हेतुः। भीमसेनस्य क्रोधेन उपचित जनितः, युधिष्ठिरोत्साहः युद्धार्थमभ्यनुज्ञानं बीजमित्यर्थः।

**अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।।६६।।**

**यथा - रत्नाव व्यामनङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सति 'उदयनस्येन्दोरिवोद्वीक्षते' इति सागरिका श्रुत्वा ( सहर्षम्) कथं एसो सो उदअणणरिन्दो इत्यादिवान्तरार्थहेतुः।**

बिन्दु रूपामर्थप्रकृतिः

**2.1.2.2 बिन्दु** - बिन्दु रूपामर्थप्रकृतिं निरूपयति। सकलवृत्तान्तभागान्तरस्य विच्छेदे समाप्तत्वेन लब्धविश्रामे अच्छेदस्य अविरामस्य कारणं हेतुविन्दुः। जले तैलबिन्दुवत्प्रसारितत्वात् बिन्दुरिति व्यपदेशः। केवलं बीजं मुखसन्धावादावेव निबध्यते,बिन्दुस्तु तदनन्तरमिति भेदः। उदाहरणं तु रत्नावल्यामेव बिन्दुर्यथा-देवीगमनानन्तरमेवान्तरविच्छेदे विदूषकं प्रति राज्ञो वचनम्। 'धिङ् मूर्ख! अलं परिहासेन आभिजात्येन गूढो देव्यास्त्वया न लक्षितः कोपः। तथाहि देवीमेव प्रमादयितुं गच्छाव इति।

**व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते।**

**यथा-रामचरिते -सुग्रीवादेः, वेण्यां भीमादेः, शाकुन्तले- विदूषकस्य चरितम्।**

**पताकानायकस्य स्यान्न स्वकीयं फलान्तरम्।।६७।।**
**गर्भ सन्धौ विमर्शे वा निर्वाहस्तस्य जायते।**

**यथा- सुग्रीवादेः राज्यप्राप्त्यादि।**

**यत्तु मुनिनोक्तम्-आ गर्भाद्वा विमर्शाद्वा पताका विनिवर्तते।।' इति।**

**तत्र 'पताकेति। पताका नायकफलं निर्वहणपर्यन्तमपि पताकायाः प्रवृत्ति- दर्शनात्, इति व्याख्यातमभिनवगुप्तपादैः।**

**2.1.2.3 पताका**- पताकारूपामर्थप्रकृतिं निरूपयति। व्यापि निर्वहणपर्यन्तं स्थायि पात्रान्तरनिष्पाद्यं प्रधानफलताधनं प्रासङ्गिकम्, वृत्तान्तः पताका इत्यभिधीयते। यस्य वृत्तान्तः पताकेत्यभिधीयते स पताकानायकः सुग्रीवभीमसेनादिः। तथा चानायकस्य सुग्रीवारवि स्वराज्यफलान्तरं यदपि पताकान्तरमित्यर्थः। अपिशब्दात् नायकस्य रामस्य सेतुबन्धादिकान्तरमपि पताकान्तरमिति बोध्यम्। अस्य व्याप पादयति इति न हि गर्ने वा सम्बी सम्पादित्यस्य काकालिकाये नोभयान्ययः। गर्भविमर्शोपसंहतरूपा हि सन्धयो वच्यते। तत्र गर्भविमर्शरूपसम् ये तस्य पताकानायकस्वकीयकफलस्य निर्वाहो नियतिः जायते। एवं च निप वर्तमानस्य प्रकृतनायकस्य जनकत्वात् पताकाया अपि

तत्पर्यन्तं वर्त्तमानत्यमेव तेन तस्याः स्वनायक फडविशेषरूपये तत्फलस्य गर्भसन्धी विमर्शसम्धी या सर्ववादिसिद्धा निष्यसि जायत इत्यभिप्रायः। तथा चतेन निहन्तमपि व्यापित्वमुक्तस्वरूपपता- काया उक्तं भवतीति बोध्यम्। समापन तु यत्सिद्धये तत्कार्यमिति संमतम्। प्रकृतनायकचरितमध्यभागात्मके गर्भसन्धी विमर्शसम्धी वा पताकानायकस्वकीय- फलस्य निष्पत्तित्वं बोधवितुमुदाहरति-पति रामचरिते हि पताकानायकः सुग्रीव बेण्यादी भीमसेनादि, तस्य रामचरितमध्यभाग एवं बालिराज्यप्राप्तिरूपं स्वकीयफ निष्पन्नम्। अनन्तरं च तस्यैव सुग्रीवस्य चरितं रामचरित फलतसीतोरणपर्यन्तमप्युः पलभ्यते। रामचरिते सुग्रीवचरितं पताका। एवमन्यत्रापि सङ्गतिः कार्याफलान्तरे मुनेः पताकापादप्रयोगस्य अभिनवगुप्ताचार्यव्याख्यानेन गौणत्वमुपपाद्य स्व विरोध निराकत माह-चिति। मुनिना नाटयाचायेंग भरतेनेत्यर्थः। आगमदिति। एतदुसरा तु कस्माद्यस्मान्निबन्धोऽस्याः परार्थः परिकीर्त्यतेइति। गर्भात् आ गर्भसन्धिसमाप्तेः पूर्वम् अवप्यर्थकोऽत्राइ आ विमर्शात् विमर्शसन्धिसमाप्तेः पूर्व वा पताका विनिवर्त्तते निष्पत्ति प्राप्नोति। एतेन दर्पणकृतो महर्षि मनेन स्पष्ट विरोधः। उक्त विरोध परिजिहीर्षुः अभिनवगुप्ताचार्यव्याख्यानमुद्धरतिमेति। मुनिवचन-मित्यर्थः। पताका पताकापदम् गोण्या वृत्या पताकानायक फल पताकानायकस्य सुग्रीव भीमसेनादेः स्वकीयराज्यप्राप्त्यादि रूपप्रयोजनपरम् निर्वहणपर्यन्तमपि उपसंहृतिसन्धिपर्यन्तमपि पताकायाः प्रवृत्तेः स्थिरत्वस्य दर्शनात्। तथा च न कपोलकल्पित किनवभिनव गुप्ताचार्य मतमाश्रित्य पताकाया निर्वहणसन्धिपर्यन्तमपि स्थिरत्वं प्रतिपादितमिति भावः।

**प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता॥६८॥**
**यथा- कुलपत्यङ्के रावणजटायुसंवादः।**
**प्रकरी नायकस्य स्यान्न स्वकीयं फलान्तरम्।**
**यथा- जटायोः मोक्षप्राप्तिः।**

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता

**2.1.2.4 प्रकरी** - प्रकरीरूपामर्थप्रकृतिं निरूपयति - नायकवृत्तान्तस्य प्रकर्षं जनयतीति प्रकरीमता। पताकायां प्रासङ्गिकवृत्तस्य बहुदेशवृत्तित्वम् अस्यान्तु, प्रदेश विशेषवृत्तित्वमिति भेदः। उदाहरति- रावणस्य जटायु संवाद इति। तस्यार्थप्रकृतित्वं तु रावणहृत सीतावर्णन मोक्षप्राप्तिद्वारा।

**अपेक्षितं तु यत्साभ्यमारम्भो यन्निबन्धनः।।६९।।**
**समापनं तु यत्सिद्धयै तत्कार्यमिति संमतम्।**
**यथा - रामचरिते रावणवधः।**

**2.1.2.5 कार्यम्-** कार्यरूपमर्थप्रकृतिं निरूपयति- यत् साध्यं स्वशक्त्या शक्यम्, यन्निबन्धनो यदुद्देश्यक आरम्भ उपाये प्रथम प्रवृत्तिः यस्य च सिद्ध्यौ समापनं सामग्रीसमवधानं तत्कार्यम् इति सम्मतम्।
उदाहरति रामचरिते तत्प्रधानेबालरामायणादावित्यर्थः।
अस्य कार्यस्य पञ्चावस्था दर्शयति।आरम्भः, यत्नः,प्राप्त्याशा,नियताप्तिः,फलागमः एताः पञ्चफलार्थिभिःउद्देश्यसिद्धिं लब्धुमिच्छिभिः प्रारब्धस्य कार्यस्य अवस्था निष्पाद्य निष्पादकरूपाः।अत्र आरमभयत्नप्राप्त्याशा नियताप्तिरूपाः च तिस्रो अवस्थाः निष्पादिकाः, फलागमरूपा चु निष्पाद्या इति।

**अवस्थाः पञ्च कार्यस्य प्रारवब्धस्य फलार्थिभिः॥**
**आरम्भयत्नप्राप्त्याशानियताप्ति फलागमाः।**

**तत्र-**

**भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये॥७१॥**

**यथा-- रत्नावल्यां रत्नावच्यन्तःपुरनिवेशार्थं यौगन्धरायणस्यौ-त्सुक्यम्। एवं नायकनायिकादीनामध्योत्सुक्यमाकरेषु बोद्धव्यम्।**

**प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः।**

**यथा रत्नावल्याम् -'तहवि ण अस्थि अण्णो दंसण उवाओ त्ति जधा तथा आलिहिअ जधासमीहिद करइस्सम्। इत्यादिना प्रतिपादितो रत्नावल्याश्चित्र लेखनादिर्वत्सराजसङ्गमोपायः। यथा च-रामचरिते समुद्रबन्धनादिः।**

**उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ।।७२।।**

**यथा - रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्तनाभिसरणादेः सङ्गमो-पायाद्वासवदत्तालक्षणापायशङ्कया चानिर्धारितैकान्तसङ्गमरूप फलप्रातिः प्राप्त्याशा।**

**एवमन्यत्र।**

**अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता।**

**अपायाभावान्निर्धारितैकान्तफलप्रातिः। यथा रत्नावल्यान्- 'राजा - देवी- प्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामि।' इति देवीलक्षणापायस्य प्रसादनेन निवारणान्नियतफलप्रातिः सूचिता।**

**साऽवस्था फलयोगः स्याद्यः समग्रफलोदयः ॥७३॥**

**यथा – रत्नावल्यां स्त्रावलीलाभश्चक्रवर्तित्वलक्षणफलान्तरलाभ-सहितः।**

**कार्यस्य पञ्च अवस्थाः -** अस्य कार्यस्य पञ्चावस्था भवन्ति इति। आरम्भः, यत्नः प्राप्त्याशा, नियतातिः, फलागमः,एताः पञ्च फलार्थिभिः

कार्यस्य पञ्च अवस्थाः- आरम्भः, यत्नः प्रात्याशा, नियताप्तिः, फलागमः

प्रारब्धस्य कार्यस्य अवस्था निष्पाद्यनिष्पादकरूपाः ज्ञेया , तत्रारम्भयत्न प्रात्याशा नियताप्तिरूपाश्च तिस्रोवस्था निष्पदिकाः, फलागमरूपा तु निष्पाद्या इत्यवगन्तव्या।

1.आरम्भः- तत्रारम्भलक्षणं दर्शयति- मुख्यफलस्य नायकमुख्योद्देश्यस्य सिद्धये निष्पत्तये यत् उत्कटरागः आरम्भो भवेत्।

2.यत्नः-प्रयत्न इति। फलावाप्तौ नायकस्य नायिकाया वा प्रधानफलप्राप्तिविषये अतित्वरान्वितो व्यापारः पात्रमात्रस्य आग्रह प्रयत्नो भवेत्। तु पदम् आरम्भभेदसूचनाय।

उदाहरति- 'तथापि नास्त्यन्यो दर्शनोपाय इति यथा तथा आलिख्य यथासमीहितं करिष्यामि इति। सङ्गमोपायः तदङ्गभूतो व्यापार, व्यापारस्यैव यत्न प्रारंभादीनां अवस्थानां लक्षणानि न सूचितानि।

3.प्रात्याशा -- उपायः फलसिद्धेः हेतुसद्भावश्च उपायस्य प्रति बन्धकस्य शङ्का च ताभ्यां तथोक्ताभ्यां, प्राप्तेः प्रधानफललाभस्य आशा प्रात्याशा भवेत्। उदाहरति- वोषपरिवर्तनं सागरिकाया वासवदत्तावेश करणम्। तेन राज्ञः समीपे तस्या अभिसारः। राज्ञः सागरिकासङ्गमोपायात्। वासवदत्तास्वरूपप्रतिबन्धकाशङ्कया। अनिश्चितासंशयिता या एकान्ते निभृतौ उदयनसङ्गमरूपफलस्य प्राप्तिस्तस्था आशा।

4.नियताप्तिः - अपायस्य अभावतो निश्चिता फलप्राप्तिस्तु नियताप्तिर्भवेदिति शेषः। उदाहरति- देवीलक्षणोपायस्य वासवदत्तारूपान्तरायस्य नियत- प्राप्तिरिति। अत्र देव्याः कोपशान्तिरूपफलस्य नियताप्तिः।

5.फलागमः -- यः समग्रफलोदयः समस्तोद्देश्य फलसिद्धिः। सामप्रथम मुख्योद्देश्यफलान्तर साहित्यम् तदभिधास्यति। सा फलयोगः फलागमो नाम अवस्था स्यात्। इयमवस्था पूर्वोक्तचतुरवस्थाभिः निष्पाद्या। उदाहरति- चकवर्तिलक्षणं साम्राज्यरूपं यत् फलान्तरं तस्य लाभेन सहितो युक्तः।

## Summarised Overview

अत्र भागे अर्थोपक्षेपकाः अर्थप्रकृति च प्रतिपादयति। अर्थान् सरसवस्तूति उपस्थापयन्ति ये ते तथोक्ताः अर्थोपक्षेपकाः। अर्थोपक्षेपकाः विधाः- विष्कम्भकः, प्रवेशकः, चूलिका,अङ्कावतारः ,अङ्कमुखश्च इति।।प्रक्रियते प्रयोजनं साध्यते आभिरिति प्रकृतयो हेतवः। तथाबीजं, बिन्दु, पताका, प्रकरी, कार्यं च, एताः अर्थप्रकृतेः कारणानि इति। अस्य कार्यस्य पञ्चावस्था भवन्ति इति। आरम्भः, यत्नः प्रात्याशा, नियताप्तिः फलागमः,एताः पञ्च फलार्थिभिः। प्रारब्धस्य कार्यस्य अवस्था निष्पाद्यनिष्पादकरूपाः ज्ञेया भवति।

# Assignments

1. अर्थोपक्षेपकयोः भेदाः विशदयत।
2. चूलिकां निरूपयत।
3. पताका व्याख्यात।
4. विष्कम्भ निरूपणं लिखत।
5. अर्थप्रकृतिः,तस्य भेदान् च निरूपयत।
6. पञ्च अवस्थाः लिखत।

# Suggested Readings


1. कविराजद्विजेन्द्रनाथशास्त्री, संस्कृतसाहित्यविमर्शः, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन वाराणसी ।
3. T.K.Ramachandra Iyer, A Short History of Sanskrit Literature – R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018.


# References


1. Sahityadarpanam, Acharya Krishna mohan Sastri, Chaukhambha Samskrita Samsthan, Varanasi.
2. Sahityadarpanam, Ed. Devadetta Kausika, Bharathiyavidyaprakasan, NewDelhi.
3. Sahityadarpanam, Ed. Saligramasastri, Motilal Banarsidass, New Delhi.


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# साहित्यदर्पणम् परिच्छेदः- 6 (पञ्चसन्धयः वृत्तयः च)

## Learning Outcomes

- पञ्चसन्धीनां ज्ञानम् लभते।
- वृत्तेः ज्ञानम् प्राप्नोति।
- संस्कृतनाटके सन्ध्यङ्कयोः प्राधान्यम् जानाति।

## Background

रूपकेषु नाटकस्य प्रामुख्यादेव, तत्रकथावस्तुनः सन्निवेशः सुसूक्ष्मंकरणीयः। तत एव धनञ्जयः नाटककथावस्तुपञ्चसन्धिषु संविभज्य प्रयोक्तव्यमिति सिद्धान्तयति। पञ्चानामर्थप्रकृतीनां पञ्चानामवस्थानाञ्च सम्यक्तया सन्निवेशेनसन्धिकार्यं निर्वर्त्यत इत्यत तदधिकृत्याऽपि किञ्चिद्वक्तव्यमेव। प्रकृतीनां पञ्चानां यथासंख्यं पञ्चावस्थाभिः योगात्यथासंख्यमेव वक्षमाणामुख्याद्याः पञ्चसन्धयोजायन्ते। "अन्तरैकार्थसंबन्धः सन्धिरेकान्वयेसति" इति सन्धिसामान्यलक्षणमुक्त्वा सन्धयः उच्यन्ते। अथ मुखं, प्रतिमुखं, गर्भः, अवमर्शः, निर्वहणं– इत्येते पञ्चसन्धयः।

## Keywords

मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्शसन्धिः, निर्वहणसन्धिः, वृत्तिः, अङ्गानि।

## Discussion

**एवमन्यत्र।**

**यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः।**
**पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्चसन्धयः॥७४॥**

तल्लक्षणमाह-

अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति।

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः। तद्भेदानाह-

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः।।७५।।
इति पञ्चाऽस्य भेदाः स्युः क्रमाल्लक्षणमुच्यते।

यथोद्देशं लक्षणमाह-

यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा।।७६।।
प्रारम्भेण समायुक्ता तन्मुखं परिकीत्तितम्।

यथा - रत्नावल्यां प्रथमेऽङ्के ।

फलप्रधानोपायस्य मुखसन्धिनिवेशिनः॥७७॥
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत्।

यथा - रत्नावल्यां द्वितीयेऽङ्के वत्सराजसागरिकासमागमहेतोरनु-रागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसंगता - विदूषकाभ्यां ज्ञायमानतया किंचिल्लक्ष्यस्य वासवदत्तया चित्रफलकवृत्तान्तेन किञ्चिदुनीयमानस्योद्देशरूप उद्भेदः।

### 2.2.1 सन्धिः

अन्तरैकार्थसम्बन्धः सन्धिः

सन्धि लक्षयितुमवतारयति- आभिरनन्तरपूर्वोक्ताभिः पञ्चभिरवस्थाभिः आरम्भादिभिः योगात् इतिवृत्तस्य रूपकीयवृत्तान्तस्य पञ्चप्रकार एव अंशाः पञ्च सन्धयः स्यु। को नाम सन्धिरिति? तल्लणं सन्धिसामान्य मित्यर्थः। एकस्य प्रधानफलस्य अन्वये घटकत्वसम्बन्धे सति अन्तरैकार्थसम्बन्धः सन्धिः। सन्धीयत इति सन्धिः। यथा-मालतीमाधवे प्रथमाङ्काद् द्वितीयाङ्क पर्यन्तमेको मुखनामा सन्धि।

सन्धेः पञ्च प्रकाराः सन्ति। अथैषां लक्षणानि यथाक्रममुपपादयितुम्। तथा च आरम्भ अवस्थायुक्तः इति वृत्ताद्याभासोमुखसन्धि, यत्नयुक्तः प्रतिमुखसन्धिः, प्राप्त्याशायुक्तो गर्भसन्धिः, नियताप्तियुक्तो विमर्शसन्धिः, फलागमयुक्तः उपसंहृतिः निर्वहणसन्धिः इत्यर्थः। तथा च यथोद्देशमित्यस्य 'मुखं प्रतिसुखं गर्भः' इत्यादि नाम कीर्त्तनक्रमश इत्यर्थः।

बीजस्य प्रागुक्तलक्षणस्य समुत्पत्तिर्भवति तद् मुखमिव मुखं मखसन्धिः कथितं

**2.2.1.1 मुखसन्धिः**- यत्र सन्धौ अनेकैः वृतान्तैः रसैः श्रृङ्गारादिभिश्च सम्भवो व्यञ्जनं यस्याः सा तथोक्ता तथा प्रारम्भेण समायुक्ता उत्साहरूपप्रारम्भावस्था युक्ता इत्यर्थः। बीजस्य प्रागुक्तलक्षणस्य समुत्पत्तिर्भवति तद् मुखमिव मुखं मुखसन्धिः कथितम्। उदाहरति- यत्र हि सागरिका राजदर्शनरूपे नमाज्यारम्भविषयीकृतेऽर्थराशौ अमात्ययौगन्धरायणस्य पृथिवीसाम्राज्य विजिगीषोर्वीरः वत्सराजस्य वसन्तविभावः श्रृङ्गारः, पौरप्रमोदावलोकनाददद्भुतः तत

उद्यानगमनादारभ्य पुनः इति नानार्थरससम्भवः, तथा कन्दर्पपूजायां सागरिकाया राज्ञो दर्शनं विधिना आनीय घटितं बीजं, तच्च सागरिकायास्तत्सङ्गमोत्साहसहितम् ।

**2.2.1.2 प्रतिमुखसन्धिः**- यत्र सन्धौ मुखसम्धौ उत्पत्या प्रवर्तते इति तस्य फलस्य प्रधानोपायः मुख्यकारणं तस्य अनुरागरूपबीजस्य, तत्प्रतिमुखं मुखस्याभिमुख्येन वर्त्तत इति प्रतिमुखं नाम सन्धिः। उदाहरति- सागरिकालिखितेन राज्ञा स्वेन च युक्तं चित्रफलकं राज्ञा प्राप्तम्। वसन्तकहस्तात् वासवदत्तया तत्प्राप्य तत्र लिखितस्य तदुभयनुरागबीजमुन्नीतम्, तादृशो भेदरूपः प्रतिमुखसन्धिश्च वासवदत्तायामागतायां सुसङ्गतावसन्तकयोर्व्यापाररूपो यत्नसहितः ।

मुखस्याभिमुख्येन वर्त्तत इति प्रतिमुखं नाम सन्धिः

**फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन॥७८॥**
**गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः।**

**फलस्य गर्भीकरणाद्गर्भः। यथा रत्नावल्यां द्वितीयेऽङ्के – सुसंगता- सहि, अदक्खिणा दाणि सि तुमं जा एवं भट्टिणा हत्थेण गहिदा वि कोवं ण मुञ्चसि इत्यादी समुद्भेदः। पुनर्वासवदत्ताप्रवेशे ह्रासः। तृतीयेऽङ्के- 'तद्वार्तान्वेषणाय गतः कथं चिरयति वसन्तकः' इत्यन्वेषणम्। विदूषकः-ही ही भोः,कोसम्बीरज्जलम्भेणावि ण तादिसो पिअवस्सस्स परितोसो जादिसो मम सजासादो पियवअणं सुणिअ भविस्सदि इत्यादावुद्भेदः। पुनरपि वासवदत्ता- प्रत्यभिज्ञानाद् ह्रासः। सागरिकायाः सङ्केतस्थान गमनेऽन्वेषणम्। पुनर्ल- सापाशकरणे उद्भेदः। अथ विमर्शः-**

**यत्र मुख्यफलोपाय उद्भिन गर्भतोऽधिकः॥७९॥**
**शापाद्यैः सान्तरायश्च स विमर्श' इति स्मृतः।**

**यथा शाकुन्तले चतुर्थाङ्कादौ - 'अनसूया - पिअंवदे, जइवि गन्धव्वेण विवाहेण णिव्वुत्तकल्लाणा पिअसही सउन्तला अणुरुवभत्तुभाइणी संवुत्तेति निब्बुदं मे हिअअम्, तह दि एत्तिअं चिन्तणिज्जम्' इत्यत आरभ्य सममाङ्कोप- क्षिप्ताच्छंकुन्तला प्रत्यभिज्ञानात्प्रागर्थसञ्चयः शकुन्तला विस्मरणरूपविघ्नालिङ्गितः।**

गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः। फलस्य गर्भीकरणाद्गर्भः

**2.2.1.3 गर्भसन्धिः**- प्रागुद्भिन्नस्य पूर्वसन्धिद्वये किञ्चित् प्रकाशं नीतस्य मुखप्रतिमुखसम्धौ बुद्धिभिन्नस्येत्यर्थः। फले प्रधानप्रयोजने मुख्यसाथनस्य सम्धौ मुहुर्वारं वारं तिरोभावानुसन्धानवान् समुद्भेदः अभिव्यक्तिः भवति सा गर्भसन्धिः। गर्भशब्दस्यार्थं प्रधानफलस्य गर्मीकरणम् अन्तकुक्षिनिवेशात्।

**2.2.1.4 विमर्शसन्धिः-** यत्र सन्धौ मुख्यफलस्य कारणम्, गर्भसन्ध्यपेक्षयाधिकः प्रकाशितो भवति। तथा शापाद्यैः आदिपदेन क्रोधभयदैवतव्यसनानां परिग्रहः। स विमृष्यते पात्रैः कर्तव्यं विविच्यते अस्मिन्निति विमर्शस्तन्नामा सन्धिरिति स्मृतः। उदाहरति- 'प्रियंवदे। यद्यपि गान्धर्व विवाहेना निर्वृत्तकल्याणा प्रियसखी शकुन्ताला, तथापि अनुरूप भर्तृभगिनी संवृत्तेन निर्वृत्तं मे हृदयम्। गान्धर्वः स तु विशेष इत्यनेन परयोः मिथः स्वीकारपूर्वकेण विवाहेन परिणयेन निवृत्तं निष्पन्नं यस्याः सा तथोक्ता जातविवाहमङ्गलेऽपि च' इति विश्वः। अनेन निरतिशयमिथोऽनुरागः राज्ञः सर्वदा धर्मात्यिते कुलेत्यनेन अनुरागाधित्यं योग्यते। अनुरूपं योग्यं भर्त्तारं स्वामिनं भजते या सा अनुरूपमन भगिनी संवृता जाता, निर्वृतं सुराभूत मे हृदयं मनः तथापि शत्रुता अनुरूप 'भागिनीवेऽपीत्यर्थः। अयं शापप्रति प्रधानफलोपावरूपः विमर्शसन्धिः शकुन्तलाया राजसमागम प्राप्तवाशा रूपावस्यासहितः।

स विमृष्यते पात्रैः कर्तव्यं विविच्यते अस्मिन्निति विमर्शस्तन्नामा सन्धिरिति स्मृतः

**अत्र निर्वहणम्-**

**बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्॥८०॥**
**एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्।**

**यथा- वेण्याम्- 'कञ्चुकी - (उपसृत्य, सहर्षम्-) महाराज! वर्धते। अयं खलु भीमसेनो दुर्योधनक्षतजारुणीकृतसर्वशरीरो दुर्लक्ष्यव्यक्तिः' इत्यादिना द्रौपदी केशसंयमनादिमुखसन्ध्यादि बीजानां निजनिजस्थानोपक्षिप्तानामेकार्थयोजनम्। यथा वा शाकुन्तले सप्तमाङ्के ऽशकुन्तलाभिज्ञानादुत्तरोऽर्थराशिः।**

**2.2.1.5 निर्वहणसन्धिः-** यथा नियमं विप्रकीर्णाः कविना यथास्थानमुपन्यस्ताः पूर्वोक्तलक्षणबीजार्थयुक्तः मुखादयोऽर्थाः इति वृतिभागाः, आदिपदेन प्रतिमुखगर्भ -विमर्शानां ग्रहणम्, यत्र सन्धौ एकार्थ केवलप्रधान प्रयोजननिमित्तम्। उपनीयन्ते केवलप्रयोजन साधनोपकरणभाव कविनैव उपस्थाप्यन्ते तत् हि निर्वहति प्रधानयोजनं जायते अस्मिन्निति निर्वहणम् उपसंहारसन्धिः। एषां मुखादीनामेव पञ्चसन्धीनामित्यर्थः। एवं लक्ष्यलक्षणाभ्यां सम्धीन् निरूप्यौः एषां अङ्कानि निरूपयितुं प्रतिजानीते। उदाहरति- दुर्योधनस्य क्षतजेन ऊरुभङ्गादिजातं रक्तीकृतं सर्व शरीरं यस्य स तथोक्तः। अत एव दुर्लक्ष्यव्यक्तिः स एवायं भीमसेन इति परिचेतुमशक्यस्वरूपः पाञ्चाल्याः केशसंयमनादीनां मुखसंध्यादिषु यानि बीजानि भीमसेनकोघोपचित युधिष्ठिराद्युत्साहरूपाणि तेषां तथोक्तानाम्, केशसंयमनादीत्यादिपदेन शत्रुनिपात राज्यप्राप्त्योः परिग्रहः। निजनिजस्थानेषु स्वस्वस्थानेषु उपनिक्षिप्तानां कविना उपस्थापितानाम्।

उपनीयन्ते केवलप्रयोजन साधनोपकरणभाव उपस्थाप्यन्ते तत् हि निर्वहति प्रधानयोजनं जायते

एषामङ्गान्याह-

उपक्षेपः परिकरः परिन्यासो विलोभनम्॥८१॥

युक्तिः प्राप्तिः समाधानं विधानं परिभावना।
उभेदः करणं भेद एतान्यङ्गानि वै मुखे।।८२॥

यथोद्देशं लक्षणमाह-

काव्यार्थस्य समुत्पत्तिरूपक्षेप इति स्मृतः।

काव्यार्थ इतिवृत्तलक्षण प्रस्तुताभिधेयः। यथा वेण्याम्-'भीमः'-

लाक्षागृहानलविषा सभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य। आकृष्य पाण्डवबधूपरिधानकेशान् स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः॥

समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः।।८३।।

यथा तत्रैव-

प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम्।
जरासंधस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा भीमः सन्धिविघटयति यूयं घटयत।।

मुखसन्धेर्द्वादश अङ्गानि

**मुखसन्ध्यङ्गानि** – अत्र मुखसन्धेर्द्वादशाङ्गानि प्रतिपादयत उपक्षेपः, परिकरः, परिन्यासो, विलोभनम् , युक्तिः, प्राप्तिः, समाधानं, विधानं, परिभावना, उभेदः, करणं, भेद एतान्यङ्गानिद्वादशसंख्यकानि भवन्ति।वैशब्दः पादपूरणे मुखे मुखसन्धौ इत्यर्थः।

**1.उपक्षेपलक्षणम्**- काव्यार्थस्य तत्तत् दृश्यकाव्याभिधेयवृत्तान्तस्य समुत्पत्तिः संक्षेपेण प्रथमो- पस्थितिः, उपक्षेप इति स्मृतः।

**2.परिकरलक्षणम्** - समुत्पन्नस्य अर्थस्य तत्तदृश्यकाव्यवृत्ताभ्यस्य बाहुल्यं पूर्वापेक्षया अतिशयेन सूचनं पुनः परिकरणं बाहुल्येन काव्यार्थस्य सूचनं परिकरः तत् नामकङ्कम् ज्ञेयः।

तन्निष्पत्तिः परिन्यासः-

यथा तत्रैव-

चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि! भीमः॥

अत्रोपक्षेपो नामेतिवृत्तलक्षणस्य काव्याभिधेयस्य संक्षेपेणोपक्षेपणमात्रम्। परिकरस्तस्यैव बहुलीकरणम्।

परिन्यासस्ततोऽपि निश्चयापत्तिरूपतया परितो हृदये न्यसनम्, इत्येषां भेदः। एतानि चाङ्गानि उक्तेनैव पौर्वापर्येण भवन्ति, अङ्गान्तराणि त्वन्यथापि।

**3.परिन्यासलक्षणम्**- तस्य काव्यभिधेयरूपस्येतिवृत्तस्य निष्पेत्तिः निश्चयापत्तिः तद्रूपतया परितो हृदये न्यसनमुपस्थितिः परिन्यास इति ।

—-गुणाख्यानं विलोभनम्।

यथा तत्रैव — द्रौपदी -णाध, किं दुष्करं तुए परिकुविदेण'। यथा वा मम चन्द्रकलायां चन्द्रकलावणर्ने-सेयम्, 'तारुण्यस्य विलासः-इत्यादि(१३९)। यत्तु शकुन्तलादिषु 'ग्रीवाभङ्गाभिरामम्-' इत्यादि मृगादिगुणवर्णनं तद्बीजार्थ सम्बन्धाभावान्न संध्यङ्गम्। एवमङ्गान्तराणामप्यूह्यम्।

संप्रधारणमर्थानां युक्तिः—

यथा-वेण्यां सहदेवो भीमं प्रति आर्य! कि महाराज संदेशोऽयमव्युत्पन्न एवार्येण गृहीतः' इत्यतः प्रभृति यावद्भीमवचनम्।

'युष्मान् हेपयति क्रोधाल्लोके शत्रुकुलक्षयः।
न लज्जयति दाराणां सभायां केशकर्षणम्॥' इति।

-प्राप्तिः सुखागमः॥८४॥

यथा तत्रैव-- मथ्नामि कौरवशतं समरे न कोपात्' इत्यादि।

'द्रौपदी ( श्रुत्वा सहर्षम्—)णाध, अस्सुदपुब्बं क्खु एदंवअणम्, ता पुणो पुणो भण।

**4.विलोभनलक्षणम्**- गुणानां पात्रविशेषगतवदनसौन्दर्य्यादीनाम् आख्यानं कथनं विशेषेण कर्तव्यविषये लोभोत्पादनं विलोभनं नामाङ्गम् इति। उदाहरति -'नाथ! किं दुष्कर वया कुपितेन' इति। ' इति। श्लोकानन्तरं द्रौपद्या उक्तिरियम्। अत्र भीमस्य बलाधिक्यरूपगुणकथनेन सुयोधनादिवधे लोभोत्पादनाद्विलोभनम्। तारुण्यस्येत्यत्र च नायिकायां चन्द्रकलायां सौन्दर्य्यख्यापनेन स्वस्य लोभजननाद्विलोभनम्। यथा च रत्नावल्याम्- 'अस्तापास्तसमस्तभासिनभसः' इत्यादिवैतालिकमुखेन चन्द्रतुल्यवत्सराजगुणवर्णनया सागरिकायाः समागम हेत्वनुरागबीजानुगुण्येनैव लोभप्रतिपादनात् विलोभनम्।

सुखागमः
पात्रविशेषस्य
आनन्दावाप्तिः प्राप्तिः

**5.युक्तिलक्षणम्** -- संप्रधारणमिति अर्थानां कर्त्तव्यविषयाणां सम्प्रधारणन् उद्देश्यार्थोपपादक युक्तिप्रदर्शनम् सिद्धान्तबुद्धवा योगो युक्तिमाङ्गम्।

6.प्राप्तिलक्षणम् - सुखागमः पात्रविशेषस्य आनन्दावाप्तिः प्राप्तिः नमाङ्गम्।

बीजस्यागमनं यत्तु तत्समाधानमुच्यते।

यथा तत्रैव- (नेपथ्ये कलकलानन्तरम् ) भो भो द्रुपदविराटवृष्ण्यन्धक सहदेवप्रभृतयः! अस्मदक्षौणीपतयः कौरवचमूप्रधानयोधाश्च शृण्वन्तु भवन्तः-

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमपीहितं शमवता शान्ति कुलस्येच्छता।
तद्द्व्यूतारणिसंभृतं नृपसुताकेशाम्बराकर्षणैः।
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते।।

अत्र 'स्वस्था भवन्तु मयि जीवति'- इत्यादि बीजस्य प्रधाननायकाभिमतत्वेन सम्यगहितत्वात्समाधानम्।

7.समाधानलक्षणम् -बीजस्य 'अल्पमात्रं समुद्दिष्टम्' इत्यादि- पूर्वोदितस्वरूपस्य आदिकारणस्येत्यर्थः, यदागमनं प्रधानायाभिमतत्वेन पुनरुपस्थितिः बीजस्य सम्यगासमन्तात्। उदाहरति- भो भोः सम्भ्रमे द्विरुक्तिः। द्रुपद विराट वृष्णय अन्धकाश्च सहदेवप्रभृतयश्चेति तत्सम्बुद्धौ तथोक्ताः। अत्र वृष्णयो वृष्णिवंश्या अन्धकवंश्या इति लक्षणार्थो विधेयः। सामाधानपदस्य योगार्थमत्रोपपादयति। बीजस्य क्रोधोद्दीपित भीमसेनोत्साहस्येत्यर्थः। सम्यगा हितत्वात् यथाक्रमं कविना नाटके उपन्यासादित्यर्थः।

सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम्॥८५॥

यथा बालचरिते-

उत्साहातिशयं वत्स ! तव बाल्यं च पश्यतः।
मम विषादाभ्यामाक्रान्तं युगपन्मनः॥"

यथा वा प्रभावत्याम्- ' नयनयुगासेचनकम्-' इत्यादि (२३६)।

कुतूहलोत्तरा वाचः प्रोक्ता तु परिभाधना।

यथा- वेण्यां द्रौपदी युद्धं स्यान्न वेति संशयाना तूर्यशब्दानन्तरम् 'णाध! किं दाणिं एसो पलअजलहरत्थणिमन्थरो खणे खणे समरदुन्दुभि ताडीअदि।'

8.विधानाङ्गलक्षणम् - सुखदुःखाभ्यां कृतो विहितोऽर्थः विषयस्तद्विधीयत इति विधानं तन्नामाङ्कं स्मृतम्। उदाहरति- बालचरित प्रधाने कस्मिश्चिद्रूपके परशुरामः'रामं प्रत्याह' इति शेषः। हे वत्स राम! तव उत्साहातिशयं बाल्यं शैशयवयश्च पश्यतोऽवलोकयतः मम मनो युगपत् हर्षविषादाभ्याम् सुखदुःखाभ्याम् वा आक्रान्तं संयुक्तम्। तथा चोत्सा

सुखदुःखाभ्यां कृतो विहितोऽर्थः विषयस्तद्विधीयत इति विधानं तन्नामाङ्कं स्मृतम्

हातिशयावलोकनेन महावीरस्वनिश्चयात् सुखम्, शैशवावस्थायां हरकार्मुकमङ्गरूपाविचारितकर्मकरणेन तेन सह समरः कर्त्तव्य इति दुःखमिति भावः। अत्र परशुरामस्य श्रीरामपराभवोद्यचमरूपोऽर्थः सुखदुःखाभ्यामुभाभ्यामेव विहितत्वाद्विधानम्।

प्रकारान्तरेणोदाहरति- नयनयुगेत्यत्र(२३६) यथोक्तार्थेन सुखम्, तद्विरहाद् दुःखम्, तथा च सुखदुःखाभ्यां मनसः सम्बन्धविधानाद्विधानम्।

कौतूहलपूर्विकाः वचनानि तु परितः सर्वतो भावना नामाङ्गं कथिता।

**9.भावनालक्षणम्** - कौतूहलपूर्विकाः वचनानि तु परितः सर्वतो भावना नामाङ्गं कथिता। वाचा इत्यत्र बहुत्यमविवक्षितम्। उदाहरति- संशयाना संदेहं कुर्वाणा। 'नाथ! किमिदानीमेष प्रलबलजलधरस्तनितमन्थरः क्षणे क्षणे समरदुन्दुभिस्ताड्यते' इति। प्रलयजलधरस्य प्रलयकालीनमेघस्य यत् स्तनितं गर्जितं तद्वत् मन्थरो धीरः। समरदुन्दुभिः युद्धकालीनभेरी। अत्र द्रौपदीवचनस्य कुतूहलपूर्वकत्वात् परिभावना।

**बीजार्थस्य प्ररोहः स्यादुद्भेदः-**

**यथा तत्रैव द्रौपदी - अण्णा च णाह या पुणोवि तुम्हहि समरादो आअच्छिअ समास्सासइदव्वा।**

**भीमः- ननु पाञ्चालराजतनये! किमद्यालीकाश्वासनया-**

**भूयः परिभवक्लान्तिलज्जाविधुरिताननम्।**
**अनिःशेषित कौरव्यं न पश्यसि वृकोदरम्॥**

**-करणं पुनः॥८६॥**

**प्रकृतार्थसमारम्भः -**

**यथा तत्रैव- देवि! गच्छामो वयमिदानीं कुरुकुलक्षयाय' इति।**

**- भेदः संहतभेदनम्।**

**यथा तत्रैव-अत एवाद्यप्रभृति भिन्नोहं भवद्भ्यः। केचित्तु-'भेदः प्रोत्साहना' इति वदन्ति।**

स्वरूपस्य आदिकारणस्य प्ररोहः पुनरुद्भव उद्भेदः

**10. उद्भेदलक्षणम्** - बीजार्थस्य 'अल्पमात्रं समुद्दिष्टम्' इत्याद्युक्त स्वरूपस्य आदिकारणस्य प्ररोहः पुनरुद्भव उद्भेदः-'अन्यच्च नाथ! पुनरपि युष्माभिः समरादागत्याहं समाश्वासयितव्या' इति। समासादयितव्या प्राप्तन्या मत्सन्निधावागन्तव्य इत्यर्थः। भीम -'द्रौपदीं प्रत्याह' इति शेषः। पाञ्चालराजतनये द्रुपदराजपुत्रि! अथ असत्याश्वासनया न किमपीत्यर्थः। यतः-भूय इति। परिभवेन शत्रुजनितापमानेन या क्लान्तिः हर्षजयस्तेन लज्जा त्रपा तथा विधुरितं मुखं यस्य तं तथोक्तम्। तथा अनिःशेषिताः समूलमविनाशिताः कौरव्याः दुर्योधनादयो येन तं तथोक्तम्, वृकोदरं भीमं भूयः पुनः न पश्यसि नावलोकयसि।अत्र शत्रु विजयोत्साहरूपवीजार्थस्य

पुनरुद्भवादुद्भेदः। अन्ये तु गूढभेदनमुद्भेदमामनन्ति। यथा रत्नावल्याम् वत्सराजस्य कुमुमायुधव्यपदेश- गूढस्य वैतालिकवचसा 'अस्तापास्त' इत्यादिना 'उदयनस्य' इत्यन्तेन बीजानुगुण्येनैवोद्भेदनादुद्भेदः।

**11.करणलक्षणम्** - प्रकृतार्थस्य प्रस्तुतविषयस्य समारम्भः पुनः करणमिति यावत् करणं नामाङ्गम्। उदाहरति- अत्र प्रस्तुतार्थस्य युद्धोद्योगस्य समारम्भात् करणम् ।

**12.भेदलक्षणम्** - संहितानां सम्मिलितानां भेदनं पृथक्करणमिति यावत् भेदः नामाङ्गम्। उक्तं च मुनिनाऽपि -'संघातभेदनाथ यः स भेद इति कीर्त्तितः' इति। उदाहरति- तत्रैव वेण्यामेव अत्र भीमेन युधिष्ठिरादिसङ्गावादात्मनो विश्लेषाद्भेदः। प्रकारान्तरेण लक्ष्यतां मतं दर्शयति -दशरूपककारादय इत्यर्थः। 'कर्त्तव्यं प्रति प्रकर्षेणोत्साहोत्पादनं भेदः' इति वदन्ति। उदाहरणं यथा वेण्यामेव - 'णाध! मा क्खु जाणसेणी परिभवुद्दीविदको वा अणवेक्खिदसरीरा परिकमिस्सध। जदोअप्पमत्त संच- रणीयाइ सुणीयन्ति रिपुबलाई। 'नाथ! मा खलु याज्ञसेनीपरिभवोद्दीपितकोपा अनवेक्षितशरीराक परिक्रमिष्यथ।

सम्मिलितानां भेदनं पृथक्करणमिति यावत् भेदः नामाङ्गम्

**अथ प्रतिमुखाङ्गानि -**

> **विलासः परिसर्पश्च विधुतं तापनं तथा ॥८७॥**
> **नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः।**
> **विरोधंश्च प्रतिमुखे तथा स्यात्पर्युपासनम्॥८८॥**
> **पुष्पं वज्रमुपन्यासो वर्ण संहार इत्यपि।**

**तत्र-**

> **समीहा रतिभोगार्था विलास इति कथ्यते।।८९।।**

**रतिलक्षणस्य भावस्य यो हेतुभूतो भोगो विषयः प्रमदा पुरुषो वा तदर्था समीहा विलासः। यथा शाकुन्तले-**

> **कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि।**
> **अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते।।**

## प्रतिमुखसन्ध्यङ्गनिरूपणम्

प्रतिमुखसन्धे त्रयोदशाङ्गानि दर्शयति- विलासादीनि त्रयोदशाङ्गानि प्रतिमुखे सन्धौ स्युरित्यर्थः। विलासः, परिसर्पः, विधुतं, तापनं, नर्म, नर्मद्युतिः, प्रगमनं,विरोधः, पर्युपासनं, पुष्पं, वज्रं, उपन्यासः, वर्ण संहार इत्यपि। प्रायेण शृङ्गाररसप्रधान एव दृश्यकाव्ये ह्येतानि सम्भवन्ति ग्रन्थकृता तथैव लक्षण उदाहरणानि प्रतिपादितानि।

प्रतिमुखसन्धि अङ्गनि

**1.विलासलक्षणम्**- रतिरनुरागः तद्भोगार्थी पात्रीभूत-स्त्रीपुरुषान्यतरविषया समीहा इच्छा। यद्यपि रतिर्निधुवनं यद्भोगाय

इच्छत्येवमर्थ एव उदाहरणानुसारी युज्यते। अनुरागस्वरूपस्य भोगो विषयः। तथा च भुज्यते रतिसमये चेतसा सर्वदैवानुभवविषयीक्रियते यः स भोग इति। उदाहरति- शकुन्तलालिप्सो दुष्यन्तस्योक्तिरियम्। प्रिया शकुन्तला कामं यथेष्टं न सुखलभ्या, अस्वतन्त्रत्वात्तस्या गुरोरपि असन्निधित्वाच्चेति भावः। अनेन बह्वायासलभ्या भवेदिति सूचितम्। उभयप्रार्थना नायकनायिकयोरन्योन्यप्राप्तीच्छा रतिं सम्भविष्यत्सम्मेलजन्यमनुरागं कुरुते। तथा च नायिकाया नायके नायकस्य नायिकायां यदि प्रार्थना दृश्यते तदा उपभोगाभावेऽपि तयो रनुरागो भवति, प्रकृते च शकुन्तलाया भावदर्शनेन प्रार्थना मयि अभिव्यक्तेति मनः समाश्वासीत्याशयः। अत्र दुष्यन्तस्य शकुन्तलायां समीहाकरणात् विलासः।

सर्वदैवानुभवविषयी क्रियते यः स भोगः

**इष्टनष्टानुसरणं परिसर्पश्च कथ्यते।**

**यथा शाकुन्तले- 'राजा- भवितव्यमत्र तथा। तथा हि-**

**अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्।**

**द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिदृश्यतेऽभिनवा।।'**

**कृतस्यानुनयस्यादौ विधुतं त्वपरिग्रहः॥९०॥**

**यथा तत्रैव - 'अलं वो अन्तेउर विरहज्जुस्सुएण राएसिणा स्वरुद्धेण।**

**केचित्तु - विधृतं स्यादरतिः" इति वदन्ति।**

**2.परिसर्पलक्षणम्** - इष्टनष्टेति नष्टेति 'णश् अदर्शने' इति धात्वर्थानुसारात अदर्शनमर्थः। तथा च इष्टस्य अभीष्टस्य नष्टस्य अदर्शनं गतस्य सतः अनुसरणमन्वेषणं परितः सर्वतः सर्पणमन्वेषणं परिसर्पस्तन्नामाङ्गं कथ्यते। उदाहरति- अत्र लतामण्डपे। तया शकुन्तलया सन्निहितया भवितव्यं भाव्यम्। उक्तार्थं समर्थयति- पाण्डवः पाण्डुवर्णाः सिकता वालुका यस्मिंस्तस्मि स्तथोक्ते अस्य लतामण्डपस्य प्रवेशमार्गे पादाग्रभागे अभ्युन्नता तथा पश्चात् पाणिदेशे गुल्फनिक्षेपस्थाने इत्यर्थः। नितम्बयोर्भारवत्वात् अवगाढा अग्रभागाङ्गुल्याद्यपेक्षया किञ्चिन्निम्ना अभिनवा अचिरजाता पदपङ्क्तिः दृश्यते अन्यासां स्त्रीणामनुसूयप्रियंवदयोर्वा तादृराजन- गुरुत्वासम्भवात्प्रियतमायाः शकुन्तलाया एवेयं पदपङ्क्तिरित्यतो लतामण्डपेऽवश्यं तथा भवितव्यमिति भावः। अत्र दुष्यन्तेन अदर्शनप्राप्ताभिलषित शकुन्तलायाः अन्वेषणात् परिसर्पः।

इष्टनष्टानुसरणं परिसर्पश्च कथ्यते

**3.विधुतलक्षणम्** - आदौ प्रथमतः कृतस्य अनुनयस्य प्रसादनस्य अपरिग्रहः अनङ्गीकारः, धृतमात्मनि धारिताद्विपरीतमिति विधुतं नामाङ्गम्। उदाहरति-शाकुन्तल एवं 'अलं वः अन्तःपुर विरहपर्युत्सुकेन राजर्षिणा उपरुद्धेन' इति। अन्तःपुराणां तत्रत्यनारीणां विरहेण वियोगेन

कृतस्यानुनयस्यादौ विधुतं त्वपरिग्रहः

पर्युत्सुक उत्कण्ठितस्तेन तथोक्तेन राजर्षिगा दुष्यन्तेन वो युष्माभिरिति यावत् उपरुद्धेन अलम्, अन्तःपुरस्त्रीषु उत्कण्ठितहृदये दुष्यन्ते तपस्विन्यर्धमनुनयो निष्फल एव भवेदिति। अत्र शकुन्तलया प्रथमं चेतसि विहितस्यानुनयस्याधुना सखीभिः कारयितुमनङ्गीकारात् विधुतम्।

**उपायादर्शनं यत्तु तापनं नाम तद् भवेत्।**

**यथा रत्नावल्याम्— 'सागरिका-**

**दुल्लहजणाणुराओ लज्जा गरुई परअसो अप्सा।**

**पियसहि विसमं पेम्मं मरणं सरणं णवरि एक न्॥'**

**परिहासवचो नर्म-**

**यथा रत्नावल्याम्— 'सुसंगता - सहि ! जस्स किदे तुमं आअदा सो अअं दे पुरदो चिट्ठदि। सागरिका- ( साभ्यसूयम्) कस्स किदे अहं आअदा?" 'सुसंगता - अलं अरुणसंकिद्रेण। णं चित्तफलअस्स।**

**धृतिस्तु परिहासजा ॥९१॥**

**नर्मद्युतिः--**

**यथा तत्रैव—'सुसंगता सहि! अदक्खिणा दाणि सितुम जा एव्वं भट्टिणा हत्थावलम्बिदावि कोष ण मुखसि। सागरिका – ( सभङ्गमीपद्विहस्य ) सुसंग ! दाणि कौलिदु न विरमसि। केचित्तु — 'दोषस्याच्छादनं हास्य नर्मद्युतिः' इति वदन्ति।**

उपायादर्शनं यत्तु तापनं नाम तद् भवेत्

**4.तापनलक्षणम् -** यत्तपायादर्शनं क्लेश निवारण हेत्वनवधारणमतत् तापनं नामाङ्गं भवेत्। लज्जा गुर्वी सद्वंशोत्पन्नत्वाद्विपुला अतः स्वयं प्राप्यापि मदनव्यथामुपसान्त्वयितुं न शक्यत इति भावः। आत्मा परवशः अस्वन्त्रः तस्मात्त्रपां परित्यज्याऽपि तत्रात्मसमर्पणं न युज्यत इत्याशयः। प्रेम विषमं वत्सराजं प्रति मम रतिश्चातिविशाला, अतो विहातुमपि न सम्भवतीत्यभिप्रायः। अतो ह्येकं मरणमेव केवलं शरणम् उपायान्तरादर्शनादिति भावः। अत्र सागरिकाया कामव्यथापाकरणोपायादर्शनात् तापनम् ।

परिहासवचो नर्म

**5.नर्मलक्षणम् -** परिहासवचः उपहासवाक्यं नर्म नामाङ्गम्। शक्तिरपि नर्मशब्दस्य तत्रैव। उदाहरति- अत्र सखीवचने परिहासद्योतनात् नर्म। यथा च वेणीसंहारे- दुर्योधनः गुप्पाण्युपनयति। भानुमत्यास्तत्स्पर्शजातकम्पाया हस्तात्पुष्पाणि पतन्ति इत्यनेन नर्मणः दुःस्वप्नदर्शनोपशमार्थं देवतापूजाविनकारिणो बीजो खाटनात्परिहासस्य प्रतिमुखाङ्गत्वं समीचीनम्।

**6.नर्मद्युतिलक्षणम् -** परिहासजा परिहासे सत्यपि जाता धृतिर्धैर्य्यन्तु नर्मणो द्योतनं नर्मद्युतिर्नामाङ्गम्। उदाहरति- तत्रैव रत्नावल्यामेवेत्यर्थः।

परिहासे सत्यपि जाता धैर्यं तु नर्मणो द्योतनं नर्मद्युतिः

'सखि! दक्षिणेदानीमसि त्वं, या एवं भर्तुः हस्तावलम्बितापि कोपं न मुञ्चसि। सुसङ्गते! इदानीमपि क्रीडितुं न विरमसि।' अत्र सुसङ्गतया उपहासे विहितेऽपि सागरिकया धैर्यावलम्बना-क्षमवृत्तिः। अत्र च सागरिकायाः सुसङ्गताकृतपरिहास सहिष्णुत्वम्, नर्मणि तस्याऽसूयताप्रदर्शनादसहिष्णुत्वमिति भेदः।

-प्रगमनं वाक्यं स्यादुत्तरोत्तरम्।

यथा विक्रमोर्वश्याम्— 'उर्वशी -जअदु जअदु महाराओ। राजा-

मया नाम जितं यस्य त्वया जय उदीर्यते। इत्यादि।

विरोधो व्यसनप्राप्तिः--

यथा चण्डकौशिके— 'राजा-नूनमसमीक्ष्यकारिणा मया अन्धेन स्फुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः।"

**7. प्रगमनलक्षणम्-** उत्कृष्टतरोत्तरस्वरूपं प्रकर्षेण उत्कृष्टरूपेण गमनं ज्ञानं यस्य तत् प्रगमनं नामानं स्यात्। उदाहरति- 'जयतु जयतु महाराजः' इति। अत्र मया नामेत्यादेरुकृष्टतरोत्तरवाक्यत्वात् प्रगमनम्।

सम्पत्प्राप्तेविरोधि त्वात् विरोधो नामाङ्गम्

**8.विरोधलक्षणम्** - व्यसनप्राप्तिर्विपत्प्राप्तिः सम्पत्प्राप्तेविरोधित्वात् विरोधो नामाङ्गम्। उदाहरति- राजा हरिश्चन्द्रः। असमीक्ष्यकारिणा अविचारितविधायिना। स्फुरदेदीप्यमानः शिखाकलापः अर्चिः समूहो यस्य स तथोक्तो ज्वलनोऽग्निः। अत्र विश्वामित्रात् हरिन्द्रस्य विपत्प्राप्तेविरोधः।

स्यात्पर्युपासनं-

यथा रत्नावल्याम्- 'विदूषकः - भो, मा कुप्य । एषा हि कदलीघरन्तरं गदा' इत्यादि।

- पुष्पं विशेषवचनं मतम् ।

यथा तत्रैव - ( राजा हस्ते गृहीत्वा स्पर्शं नाटयति ) विदूषकः - भो वअस्स! एसा अपुव्व सिरी तए समासादिदा। राजा वयस्य! सत्यम्-

श्री रेषा, पाणिरप्यस्याः पारिजातस्य पल्लवः।
कुतोऽन्यथा नवत्येष स्वेदच्छद्मामृतद्रवः।।

प्रत्यक्षनिष्ठुरं वज्रम्--

यथा तत्रैव - 'राजा - कथमिहस्थोऽहं त्वया ज्ञातः ? सुसंगता-ण केवल तुमं समं चित्तफलएण। ता जाव गदुअ देवीए णिवेदइस्सम् ।'

- उपन्यासः प्रसादनम्॥९३॥

यथा तत्रैव—'सुसंगता — भट्टुण ! अलं सङ्काए। मए वि भट्टिणीए पसा- देण कीलिदं ज्जेव एदिहिं। ता किं कण्णाभरणेण। अदो वि मे

गरुअरो पसादो एसो, जं तुए अहं एत्थ आलिहिदत्ति कुविदा मे पिअसही सारिआ। सा ज्जेव पसादीअदु।'

केचित्तु—'उपपत्तिकृतो ह्यर्थ उपन्यासः स कीर्तितः।' इति वदन्ति। उदा- हरन्ति च तत्रैव - 'अदमुहरा क्खु सा गन्भदासी' इति।

कुद्धस्य शान्तये पुनरनुनयः प्रसादनं पर्युपासनम्

**9.पर्युपासनलक्षणम्**- कुद्धस्य शान्तये पुनरनुनयः प्रसादनं पर्युपासनम्। उदाहरति- 'भोः मा कुप्य। एषा हि कलहान्तरे गता इति। अविहितस्याविचारितकर्मणः शान्तये पुनरनुनयात्पर्युपासनम्।

पुष्पवत् चित्तापकर्षणात् पुष्पं नामाङ्कम्

**10.पुष्पलक्षणम्** - उत्कर्षविशेषबोधकं वाक्यम् अयं विशेषो विलक्षणपदार्थ वचनमित्यर्थः, पुष्पवत् चित्तापकर्षणात् पुष्पं नामाङ्कम्। उदाहरति- रत्नावल्यामेव। एषा नायिका साक्षात् लक्ष्मीः, अस्याः नायिकायाः हस्तोऽपि पारिजातस्य पल्लवः। अन्यथा कुतः कथं स्वेदच्छद्म धर्मव्याजः तादृश एषः अमृतद्रवः स्रवति। अत्र सागरिकायाः सौन्दर्यात्कर्षबोधनात् पुष्पम्।

**11. वज्रलक्षणम्** - अत्र राजानं प्रति देव्यै निवेदयिष्यामि इति वचनस्य साक्षात् कठोर रूपत्वात् वज्रम् भवति।

**12.उपन्यासलक्षणम्**- प्रसादनं प्रसन्नता जननम् उपन्यसनमुपस्थापनमुपन्यासो नामाङ्गम्। उदाहरति- अत्र राज्ञ आत्मानं प्रति प्रसन्नताजननादुपन्यासः। भरतमतोपन्यासलक्षणं दर्शयितुमाह- यः अर्थः पदार्थः उपपरया युक्त्या कृत उपपादितः स उपन्यास इति कीर्त्तित इति। मतेऽस्मिन् विषयविशेषस्य युक्त्या उपन्यासादुपस्थापनादुपन्यास इति विशेषः।

चातुर्वण्य पगमनं वर्ण संहार इष्यते।
यथा महावीरचरिते तृतीयेऽङ्के-
परिषदियमृषीणामेष वीरो युधाजित् सह नृपतिरमात्यैर्लोमपादश्च वृद्धः।
अयमविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामङ्ग भो याचकास्ते।

इत्यत्र ऋषिक्षत्रादीनां वर्णादीनां मेलनम्। अभिनवगुप्तादास्तु-'वर्णशब्देन पात्राण्युपलश्यन्ते। संहारो मेलनम्' इति व्याचक्षते। उदाहरन्ति च रत्नावल्याम्।

**13.वर्णसंहारलक्षणम्** - चत्वारो वर्णा एव चातुर्वर्ण्यम् । तस्य चातुर्वर्ण्यस्य ब्राह्मणक्षत्रिय विट्शूद्रस्य, उपगमनम् उपस्थितिरेकत्रमेलनमिति यावत्, वर्णानां संहारो मेलनं यत्र स वर्गसंहारो

वर्णानां संहारो मेलनं यत्र स वर्गसंहारो नामाङ्गमिष्यते

नामाङ्गमिष्यते। उदाहरति- मिलितब्राह्मणाद्यनेकवर्ण सभाप्रदर्शन मिदम्। अत्र अमात्यैरिति बहुवचनोपन्यासाद्यथासम्भवं तत्साहित्येन विट्शूद्रावपि ग्रह्यौ। एतच्च विवरणकृता 'ऋषिक्षत्रियादीनाम्' इत्यत्रादिपदोपादानादेव स्फुटीकृतम्, ततश्च चातुर्वर्ण्यस्य मेलनाद्त् वर्गोपसंहारः।

**द्वितीयेऽङ्के - 'अदो वि मे अअं गुरुअरो पसादो-' इत्यादेरारभ्य 'णं हत्थे गेण्हिअ पसादेहिणम्। राजा - क्वाऽसौ काऽसौ' इत्यादि। अथ गर्भाङ्गानि-**

> **अभूताहरणं मार्गो रूपोदाहरणे क्रमः।।९४।।**
> **संग्रहश्चानुमानं च प्रार्थना क्षिप्तिरेव च।**
> **त्रो (तो) टकाविबलोद्वेगा गर्भे स्युर्विद्रवस्तथा॥९४॥**
> **तंत्र व्याजाश्रयं वाक्यमभूताहरणं मतम्।**

**यथा अश्वत्थामाङ्के-**

> **अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा**
> **स्वरं शेषे गज इति पुनर्व्याहृतं सत्यवाचा।**
> **तच्छ्रुत्वाऽसौ दयिततनयः प्रत्ययान्तस्य राज्ञः**
> **शस्त्राण्याजो नयनसलिलं चापि तुल्यं मुमोच॥**

## गर्भसन्ध्यङ्गानि

गर्भसन्धेः त्रयोदशाङ्गानि निरूपयति। अभूतहरणं, मार्गं, रूपं, उदाहरणं, क्रमं, सङ्ग्रहं अनुमानं, प्रार्थना, क्षिप्ति, त्रोटकं, अधिबलं, उद्वेगं, विद्रवम् इत्यादि।

असत्यस्य आविष्करणं यत्रतत् अभूताहरणं नामाङ्गम्

**1.अभूताहरणलक्षणम्** - तत्र तेषु त्रयोदशप्रकारेषु अङ्गेषु मध्य इत्यर्थः व्याजाश्रये छलसंबद्धं वाक्यम् अभूतस्य- असत्यस्य आविष्करणं यत्रतत् अभूताहरणं नामाङ्गम्। उदाहरति- अश्वत्थामाङ्गे वेणीसंहारनाटकस्य तृतीयेऽङ्क इत्यर्थः। द्रोणाचार्यस्य शस्त्रत्यागे कारणं दर्शयति-अश्वत्थात्मा हत इति सर्वदा सत्यवादिना पृथासूनुना कुन्तीतनयेन युधिष्ठिरेण 'अश्वत्थामा हत' इति स्पष्टं परश्रवण योग्यं यथा स्यात्तथा उक्त्वा शेषे वचनसमाप्तौ स्वैरं मन्दम् परश्रवणयोग्यमित्यर्थं इदमपि गजं इति शब्दस्वरूपदर्शनार्थः व्याहृतमुक्तम्। 'तत्' अश्वत्थामा 'हत' इति वाक्यं श्रुत्वा तस्य सत्यवाचः राज्ञो युधिष्ठिरस्य प्रत्ययाद्विश्वासात् दयितः प्रियस्तनयः पुत्री यस्य सः असौ द्रोणाचार्यः आजौ सङ्ग्रामे शस्त्राणि नयनसलिल युगपदेव मुमोच। भीमसेनेन जवेन सङ्ग्रामान्निः सारितेऽश्वत्थानि संग्रामे इति कोलाहले सति दीर्घजीविनस्तस्य मरणासम्भवात् द्रोणाचार्येण मां पृष्टः सत्यवादी युधिष्ठिरः श्रीकृष्णमन्त्रणया अश्वत्थाम नामक गजमरणाच्छलेनोक्तवान् 'अश्वत्थामा हत' इति। ततः पुत्रशोकाकुल द्रोणाचार्यः शस्त्रं मुमोचेति भावः। अत्रछलसम्बन्धत्वात् अभूताहरणम्।

**तत्त्वार्थकथनं मार्गः-**

**यथा चण्डकौशिके--'राजा--भगवन्।**

**गृह्यतामर्जितमिदं भार्यातनयविक्रयात्।**
**शेषस्यार्थे करिष्यामि चण्डालेप्यात्मविक्रयम्।।**

तत्त्वार्थकथनं मार्गः

**2.मार्गलक्षणम्**- तत्वार्थस्य यथार्थकर्त्तव्यविषयस्य कथनं मृग्यते यथा-तथा धार्मिकैरन्वियत इति मार्गः नामाङ्गम्। उदाहरति-विशवामित्रं प्रति हरिश्चन्द्रनृपतेः उक्तिरियम्। भार्यायाः तनयस्य च विक्रयात् आर्जितमिदं वित्तं स्वीकुरुतां। शेषस्यपि अर्थे निमित्तं चण्डाले अपि आत्मविक्रयं करिष्यामि। अत्र हरिश्चन्द्रस्य यथार्थ कर्तव्यविषय प्रतिपादनान्मार्गः।

**रूपं वाक्यं वितर्कवत्।।१६।।**

**यथा रत्नावल्याम्- राजा-**

**मनः प्रकृत्यैव चलं दुर्लक्ष्यं च तथापि मे।**
**कामेनैतत्कथं विद्ध समं सर्वैः शिलीमुखैः।।**
**उदाहरणमुत्कर्षयुक्तं वचनमुच्यते।**

**यथा अश्वतथामाङ्गे--**

**यो यः शस्त्रं विभर्ति स्वभुजङ्गगुरुमदः पाण्डवीनां चमूनां।**
**यो यः पाञ्चालगौत्रे शिशुरधिकवया गर्भशय्यां गतो वा।**
**योयस्तत्कर्मसाक्षी, चरति मयि रणे यश्च यश्च प्रतीपः**
**कोधान्धस्तस्य तस्य स्वयमिह जगतामत्तकस्यान्तकोऽहम्।।**

वितर्केऽसम्भविवस्तु हेत्वनुसन्धानं तद्रुप नामाङ्गम्।

**3.रूपात्मकमङ्गम्** - वितर्केऽसम्भविवस्तुहेत्वनुसन्धानं तद्रुप नामाङ्गम्। उदाहरतिपति- सागरिकाविरहिणो राज्ञोऽयं तर्कः। प्रकृत्या स्वभावेनैव मनःचञ्चलम् अत एव दुर्लक्ष्यं सर्वेषामेवलक्षितुं शरसन्धातुमशक्यम्, तथापि कामेन मनसिजेन मे सम एतन्मतः कथं शिलीमुखैः शरैः समं समकालमेव विद्वम्। अत्रासम्भविवस्तु हेत्वननुसन्धानात् रूपम्।

उत्कर्षस्योल्लखनम् उदाहरणम्

**4. उदाहरणम्** - उत्कर्षयुक्त स्वस्य परस्य वा उत्कर्षसूचनं वाक्यं उत्कर्षस्योल्लखनं उदाहरणं नामाङ्खं उच्यते। उदाहरति- क्रुद्धस्य अश्वत्थात्मा उक्तिरियम्। मयि अश्वत्थाम्नि रणे चरति सति इति पाण्डवसम्बन्धिनीनां सेनाविशेषाणां मध्ये स्वस्वबाहुबलस्यातिदर्पात् यो यः आयुधं धारयति, एवं द्रुपदराजवंशे यो यः बालकः अधिकवयाः तरुणवृद्धयोर्ग्रहणम्, गर्भशय्याशयनीयं तां गतः तिष्ठति। यो यो जनः तत् कर्म मृतस्य मम पितुः शिरश्छेदनरूपं तस्य साक्षी यश्चमम प्रतिकूलः सद्मार्ग स्वयं एकाकी जगतां अन्तकस्यापि सः तस्य अन्तको यमो इति।

**भावतत्वोपलब्धिस्तु क्रम स्यात्-**

यथा शाकुन्तले 'राजा-स्थाने खलु तु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि । तथाहि-

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन।।

- संग्रहः पुनः॥९७॥

सामदानार्थ संपण

यथा रत्नावल्याम्- राजा - साधु वयस्य! इद से पारितोषिकम्। (इति कटकं ददाति)।

**5.क्रमम् -** निर्विकारात्मके चित्ते भावः प्रधमिक्रिया इत्युक्त लक्षणस्य भावस्य तत्वोपलब्धिर्याथार्थ्यानुभवः क्रमणं बुद्ध्या विषयीकरणमिति क्रमं नामाङ्गं स्यात्। उदाहरति- यति स्थाने खलु युक्तमेव विस्मृतः निमेषो येन तेन तथोक्तेन निर्निमेषेणेत्यर्थ प्रियां शाकुन्तलां पश्यामि। तथा च निमेषरहितेन लोचनेन प्रियां यदवलोकयामि इति भावः।

साम्ना प्रियवचनेन तेन दानेन च अर्थसम्पन्नो धनादिलाभविषयः सङ्ग्रहः

**6.सङ्ग्रहः-** साम्ना प्रियवचनेन तेन दानेन च अर्थसम्पन्नो धनादिलाभविषयः सङ्ग्रहो नामाङ्गम्। अत्र सामदाने, भेददण्डयोर्मयेन्द्रजालादेरप्युप लक्षणम्। तत्र सामदानाभ्यामर्थ सम्पत्तिमुदाहरति- अत्र प्रियवचने राज्ञा कटकदानात् सागरिकासमागमकारिणा विदूषकेण च तत्संग्रहणात्सङ्ग्रहः। भेदेन यथा रघुविलासे पञ्चमे अङ्गे क्रमात् पवनवेषो राक्षसः प्राहः प्रसीदतु देवः। रावणः गृहाण प्रसादम्। वराहतुण्ड! समादिश कुमारं कुम्भकर्ण यथा-पवनं किष्किन्धाराज्येत्वरितमभिषिञ्च।

-लिङ्गादूहो अनुमानता।

यथा जानकीराघवे नाटके- 'रामः-

लीलागतैरपि तरङ्गयतो धरित्रीमालोकनैर्नमयतो जगतां शिरांसि।
तस्यानुमापयति काचनकान्तिगौरकायम्य सूर्यतनयत्वमधृष्यतां च॥

रतिहर्षोत्सवानां तु प्रार्थनं प्रार्थना भवेत्॥९८॥

यथा रत्नावल्याम्-- प्रिये सागरिके !

शीतांशुर्मुखमुत्पले तच दृशौपद्मानुकारौ करौ,
रम्भास्तम्भनिभं तथोरुयुगल, बाहू मृणालोपमौ।
इत्याह्लादकराखिलाङ्गि । रभसान्निःशङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराज्योति निर्वापय।।

इदं च प्रार्थनाख्यमङ्गम्। यन्मते निर्वहणे भूतावसरत्वात्प्रशस्तिनामाङ्गं नास्ति तन्मतानुसारेणोक्तम्, अन्यथा पञ्चषष्टिसंख्यत्वप्रसङ्गात्।

**7.अनुमानम् -** लिङ्गात् व्याप्तिविशिष्टपक्षधर्मताज्ञानाभ्यां साधनज्ञानात् ऊहो व्यापकतानुभवः साध्यज्ञानमिति यावत अनुमानता अनुमानम्।

साध्यज्ञानमिति यावत अनुमानता अनुमानम्

उदाहरति- परशुरामवर्णनमिदम्। सविलासगमनैरपि पृथिवीं चालयतः एवं नमयत इत्यपि। आलोकनैः दृष्टिपातैरपि जगतां लोकानां शिरांसि स्वसन्निधौ नमयतः दृष्टमात्रैः सर्वैः प्रणम्यमानत्वादिति भावः। तथा काञ्चनवत् गौरः शुभ्रः कायः यस्य तथोक्तस्य तस्य लक्ष्मणस्य सूर्यपुत्रत्वम् अवृष्यतां परैरनभिभवनीयतां अनुमापयति अनुमान विषयीकरोति इति। तथाविधं लीलागतमालोकर्म च।

रतिहर्षोत्सवानां तु प्रार्थनं प्रार्थना भवेत्

**8.प्रार्थना** - रतिः सुरतम्, तदर्थं यो नायिकाया हर्षः नायकस्य तादृशोत्सवानां यद्वा रतिः सुरतम्, हर्षः प्रीतिः उत्सवः प्रमोदजनक व्यापारः तेषां तथोक्तानां प्रार्थना तत्तद्विधानाय भिक्षा प्रार्थनानामङ्गं भवेत्। उदाहरति- तव मुखम् साक्षाच्चन्द्रः, नेत्रे नीलोत्पलद्वयं, करौ पद्मतुल्यौ, तथा ऊरुयुगल जङ्घद्वयं कदलीस्तम्भसदृशम्, भुजौ चन्द्रादिसादृश्येन मदनानलतापशमनक्षमत्वं व्यञ्जितम्। शीतांशुकत्वादिना आह्लादकराणि अखिलानि अङ्गानि यस्यास्तत्सम्बुद्धौ, स्वं रभसात् जवात त्वरितमित्यर्थः। अत्रालिङ्गनाधीनोत्सवप्रार्धनाकरणात् प्रार्थना।

**रहस्यार्थस्य तद्भेदः क्षिप्तिः स्यात्—**

**यथा अश्वत्थामङ्के--**

**एकस्यैव विपाकोयं दारुणो भुवि वर्तते।**
**केशाग्रे द्वितीयेऽस्मिन्नूनं निःशेषिताः प्रजाः॥**

**-त्रो (तो)टकं पुनः।**

**संरब्धवाक्--**

**यथा चण्डकौशिके- 'कौशिक- जाऊ पुनः कथमद्यापि न सम्भूताःस्वर्णदक्षिणा।**

**- अधिवलमभिसंधिच्छलेन यः॥९९॥**

**यथा रत्नावल्यां--'काञ्चनमाला – भट्टिणि, इयं सा चित्तसालिअ! बसन्त अस्त सण्णं करोमि इत्यादि।**

रहस्यार्थस्य तद्भेदः क्षिप्तिः स्यात्

**9.क्षिप्तिः** - रहस्यार्थोऽभिनातव्यार्थं इतिवृत्तरुपोथ तस्य उद्भेद उत्पत्ति सूचनन्तु क्षिप्तिर्नामाङ्गं स्यात्। उदाहरति-- एकस्यैव द्रौपदीकेशग्रहणस्य अयं कुरुपाण्डवसङ्ग्रामे अगणितजनक्षयरूपो दारुण उत्कटो विपाकः फलं तावत् भुवि वर्तते, एतत् संग्रामं प्रति तस्यैव केशग्रहस्य कारणत्वादिति भावः। द्वितीये अस्मिन्केशाग्रे धृष्टद्युम्नेनन मृतद्रोणाचार्यस्य केशाकर्षणे कृते तु नूनं निश्चितमेव प्रजा निःशेषिताः साकल्येन विनष्टाः भविष्यन्तीति शेषः। सर्वसंहारे उच्छोरश्वत्थाम्न एवं तत्र द्वारभूतत्वदितिभावः। द्वितीये मृतद्रोणस्य धृष्टद्युम्नेन केशग्रहे अत्र सर्वहाररूपस्य रहस्यार्थस्य वाचा उत्पत्तिः सूचनाक्षिप्तिः।

**10.त्रोटकम्-** संरब्धस्य वचनं क्रोधव्यञ्जक वचनमित्यर्थः,तोटयति वा परचित्तस्वास्थ्यं भेदयतीति त्रोटकं नामाङ्गम्। उदाहरति–स्वर्णदक्षिणाः अवशिष्टश इति शेषः। अत्र हरिश्चन्द्रं नृपं प्रति पृथिवीदानदक्षिणादानार्थं विश्वामित्रस्य क्रोधव्यञ्जकवचनत्वात् त्रोटकम्।

**11.अधिबलम्-** छलेन व्याजेन यः अभिसन्धिः अभिप्रायपरिज्ञानं बलं बुद्धिः बलमधिकृत्योत्पन्नं

यत्तत् अधिबलं नामाङ्गम्। उदाहरति- चित्रशालिकायां राज्ञः समीपे वासवदत्तावेशेन सागरिकामानेतुं तथा सह वसन्तकेन सङ्केते कृते काञ्चनमालया तज्ज्ञात्वा वासवदत्तामेवानीया वसन्तकस्थाने सागरिका आगता इत्यङ्गुलिसंज्ञां कर्तुं काञ्चनमालायाः वासवदत्तायां उक्तिः।

**नृपादिजनिता भीतिरुद्वेगः परिकीर्तितः।**

**यथा वेण्याम्-**

**प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः।**
**स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः।।**
**शङ्काभयत्रासकृतः सम्भ्रमो विद्रवो मतः॥ १००।।**
**कालान्तककरालास्यं क्रोधोद्भूतं दशाननन् ।**
**विलोक्य वानरानीके सम्भ्रमः कोऽप्यजायत ।।**

नृपादिजनिता भीतिरुद्वेगः परिकीर्तितः

**12.उद्वेगम् -** नृपादौ केनापि जनिता भीतिर्भयम्। उद्विज्यते हृदयमनेनेति उद्वेगो नामाङ्गं परिकीर्तितः। नृपादीत्यादिपदेन शत्रुप्रभृतेः परिग्रहः। उदाहरति-- वेणीसंहारे प्राप्ताविति। सः कर्णारिरर्जुनः क्रूरप्रकृतिः व्याघ्रविशेषस्येव निष्ठुरकर्म यस्य स तथोक्त वृकोदरो भीमश्च एतौ इतस्ततस्त्वां पृच्छन्तौ दुर्योधनः क्व तिष्ठतीति त्वद्विषयप्रश्नं कुर्वन्तौ, एकरथोपविषटौ भ्रातरौ प्राप्तावगतावित्यर्थः। अत्र कर्णारित्वेन क्रूरकर्मत्वेन च दुर्योधनस्य शत्रुभूत भीमार्जुनजनितभीतेरुद्वेगः।

शङ्काभयत्रासकृतः सम्भ्रमो विद्रवो मतः

**13.विद्रवम् -** शङ्कया अनिष्टसम्भावनया यः सम्भ्रमः चित्तादिव्यग्रतेति यावत्, विशेषेण कम्पन यत्र स विद्रवो नामाङ्गं मतः। उदाहरति-- संहारकालीनकृतान्तस्येव भयङ्कराणि आस्यानि मुखानि यस्य तं तथोक्तं क्रोधेन रुपा उत्कम्पितशरीरम्, दशाननं लङ्केशं विलोक्य वानराणां अनीके सौम्येकोऽपि विलक्षणसम्भ्रमो व्यग्रता अजायत। अत्र वानरसेनायाः शङ्कात्रसजनितसम्भ्रमादिद्रवः।

**अथ विमर्शाङ्गानि--**

**अपवादोऽथ संफेटो व्यवसायी द्रवोद्युतिः।**
**शक्तिः प्रसङ्गः च प्रतिषेधो विरोधनम्॥१०१॥**
**प्ररोचना विमर्शे स्यादादानं छादनं तथा**
**दोषप्रख्यापवादः स्यात्-**

यथा वेण्याम्- 'युधिष्ठिर- पाञ्चालक क्वचिदादिता तस्य दुरात्मना कौरव्यापसदस्य पदवी। पाञ्चालक न केवलं पदवी एवं दुरात्मा देवी-केशपाशस्पर्श पातकप्रधानहेतुरुपलब्धः।

-संफेटो रोषभाषणम्॥१०२॥

यथा तत्रेव— 'राजा- अरे रे मरुत्तनया! वृद्धस्य राज्ञःपुरतो निन्दितमप्यात्मकर्म श्लाघसे। शृणु रे-

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी।
तस्मिन् वैरानुबन्धे वद किमपकृतं तैर्हतायेनरेन्द्रा
बाह्योर्वीर्यातिभारद्रविणगुरुमदंममाजित्वैव दर्पः॥

भीमः- (सक्रोधम्) आः पाप।
राजा - आ. पाप। इत्यादि।

## विमर्शसन्ध्यङ्गानि

विमर्शसन्धौ अपवादादिच्छिदनान्तानि त्रयोदशाङ्गानि सम्भवन्तीत्यर्थः। अपवादं, संफेटं, व्यवसायं, द्रवं, द्युति, शक्ति, प्रसङ्गं, खेदं,प्रतिषेधं, विरोधं, प्ररोचनं, आदानं, छादनं।

दोषस्य प्रख्या कथनम् अपकृष्टविषयको वादः अपवादः

**1.अपवादः**- दोषस्य प्रख्या कथनम् अपकृष्टविषयको वादः अपवादो नाम अङ्गम्।उदाहरति-तस्य दुर्योधनस्य कौरवापसदस्य। द्रौपद्याः केशपाशस्य स्पर्शो धारणमेव पातकं तस्य प्रधानहेतुः आदिकारणमाज्ञापकत्वादिति भावः।अत्र दुर्योधनस्य दोषकथनापवादः।

**2.संफेटम्-** रोषेण भाषणं सम्फेटनामाङ्गम्। सम्फेट इति गोमण्ड लादिवत् शेषभाषणार्थे अत्र रूढः। उदाहरति -दुर्योधनस्य भीमार्जुनौप्रति सम्बोध्य उक्तिः। वृद्धस्य राज्ञौधृतराष्ट्रस्य। आत्मकर्म बन्धुवधादिरूपं स्वकार्य्यं विकत्थसे प्रशंससीत्यर्थः। राजा दुर्योधनः अत्र द्वयोरेव रोषभाषणात् सम्फेटः।

व्यवसाय विज्ञेयः प्रतिज्ञा हेतु संभवः।

यथा तवैव - 'भीमः-

'निहताशेष कौरव्यः क्षीबो दुःशासनासृजा!
भङ्क्ता दुर्योधनस्योर्वोर्भीमोऽयं शिरसा नतः॥

द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा॥१०३॥

यथा तत्रैव- 'युधिष्ठिरः- भगवन्! कृष्णाभज! सुभद्राभ्रातः!
ज्ञातिप्रीतिर्मनसि न कृता. क्षत्रियाणां न धर्मो
रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन।

तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयि त्वम् ।।

तर्जनोद्वेजने प्रोक्ता द्युतिः-

यथा तत्रैव दुर्योधनं प्रति कुमारवृकोदराणोक्तम्-

जन्मेन्दोर्बिमले कुले व्यपदिशस्यापि घत्से गदां
मां दुःशासनकोष्णशोणितमधुक्षीबं रिपुं मन्यसे।
दर्पान्धो मधुकैटभाद्विषि हरावप्युद्धतं चेष्टसे
त्रासान्मे नृपशो ! विहाय समरं पङ्केधुना लीयसे।

व्यवसाय विज्ञेयः प्रतिज्ञा हेतु संभवः

**3.व्यवसायः**- कार्य्यस्व निर्देशः प्रतिज्ञा हेतुः कारणनिर्देश इति यावत् तयोः सम्भवो मेलनम्, तादृश उद्योग इति व्यवसायो नाम अङ्गः। उदाहरति- वेण्यां तु नेदानीमुपलभ्यते। निहता विनाशिता अशेषाः समग्राः कौरव्याः कुरुकुलोद्भवा येन स तथोक्तः, दुःखेन शास्यतेऽसौ दुश्शासनस्तस्य असृजा शोणितेन क्षीबो मत्तः क्षीवत्वसम्पादनेन असृजो मधुत्वारोपणं व्यज्यते। तथा दुःखेन युध्यत इति दुर्योधनस्तस्य ऊर्वोः जङ्घाद्वयस्य भङ्क्ता खण्डयिता अयं भीमो भवन्तं शिरसामूर्धन नतः। अत्र द्रौपदीकेशाकर्षणादिहेतोस्तत्तत्सम्प्रतिज्ञायां च उद्योगस्य सम्भवाद् व्यवसायः।

आदरलङ्घनं द्रवणं कर्त्तव्याच्च्यवनं द्रवो नामाङ्गम्

**4.द्रवः**- शोकावेगात् आदिपदेन कोधावेगादेश्व सम्भवा गुरोः पूज्यस्य व्यतिक्रान्तिः, आदरलङ्घनं द्रवणं कर्त्तव्याच्च्यवनं द्रवो नामाङ्गम्। उदाहरति-युधिष्ठिरस्य दुर्योधनानुरागक्रुंद्धबलभद्रभर्सनमिदम्। अत्र बलरामस्योक्तिरियमित्युक्तिः कस्यचिन्न समीचीना 'युधिष्ठिरः' इत्युपक्रमे कथनादिति सुधियो विभावयन्तु। भगवन्निति सम्बोधनेनादरप्रदर्शनम्। कृष्णाग्रजेति, सुभद्राभ्रातरिति च द्वयं स्वपक्षानुरागौचित्याय सम्बन्धप्रदर्शनम्। ज्ञातयो वयमिति प्रीतिः प्रणयो मनसि न कृता भवतेति, एवमग्रेऽपि क्षत्रियाणां धर्मोऽपि मनसि न कृत इत्यर्थः। अयुध्यमानवधवैमुख्यं क्षत्रियाणां धर्मः, वयञ्चायुध्यमानाः। तथा अनुजस्य श्रीकृष्णस्य अर्जुनेन सार्द्धं तत् प्रसिद्धं रूढं मूलं संख्यमपि न गणितम्, शिष्ययोर्भीमदुर्योधनयोर्विषये भवतः स्नेहनिबन्धन हृदयाकर्षणं कामं यथेष्टं क्रियाविशेषणमिदम्, तुल्यो भवतु वरम्। अत्र शोकाविष्टचित्तेन युधिष्ठिरेण गुरोर्बलभद्रस्यादरलङ्गनाद् द्रवः।

सन्देहजनकत्वेन द्योतनं प्रकाशनं द्युतिः

**5.द्युतिः**- यस्य कस्यचित् तर्जनं भर्त्सनम् उद्वेजनं भयोत्पादनं वा सन्देहजनकत्वेन द्योतनं प्रकाशनं द्युतिर्नामा प्रोक्ता। उदाहरति- जन्मेन्दोरिति विमले दोषरहिते, इन्दोश्चन्द्रस्य वंशे जन्म स्वस्योत्पत्ति व्यपदिशसि चन्द्रशीयोऽहमिति व्यपदिशसि सङ्ग्रामभयान्निलीनश्च भवसि इति। अधुनापि गदाम् अस्त्रविशेषं दधासि, दुःशासनस्य कोष्णेन रुधिररूपमद्येनक्षीवं मतं मां वृकोदरं शत्रु मन्यसे इत्यर्थः। शान्तोऽहं कथं

योत्स्ये अत आह- तथा दर्पान्धः गवेगकर्त्तव्याकर्तव्यविमूढः सन् मधुकैटभौ तन्नामासुरौ तयोरपि नि हन्तरि श्रीकृष्णेऽपि विषये उद्धतम् यथा स्यात्तथा चेष्टसे व्यापार करोषि। यो दृशबलवन्तं श्रीकृष्णमपि वद्धुमुद्यतः स कथं संग्रामाद्धितो भवेदिति भवः। अत्र तर्ज्जनोद्वेजनाभ्यां द्युतिः।

-शक्तिः पुनर्भवेत्॥

विरोधस्य प्रशमनम् --

यथा तत्रैव-

'कुर्वन्त्वाप्ता हतानां रणशिरसि जना भस्मसाद् देहभारा
नश्रुन्मिश्रं कथञ्चिद्ददतु जलममी बान्धवा बान्धवेभ्यः।
मार्गन्तां ज्ञातिदेहान् इतर गहने खण्डितान् गृध्रकङ्के
रस्तं भास्वान् प्रयातः सह रिपुभिरयं संह्नियन्तां बलानि॥

-प्रसङ्को गुरुकीर्त्तनम्।

यथा मृच्छकटिकायाम्- 'चाण्डालक: एसो क्खु सागलदन्तस्य मुदो अज्जविस्सदत्तस्स णत्तिओ चालुदत्तोवावादिदुंवज्भ्तट्ठाणं णिज्ज एदेण किल गणिआ वसन्तसेणा सुअण्णलोहेण बाबादिदेत्ति। चारुदत्तः – (सनिर्वेद स्वगतम् )

"मखशत परिपूतं गोत्रमुद्भासितं यत्, सदसि निविडत्याह्मघोषैः पुरस्तात्।
मम निधनदशायां वर्त्तमानस्य पापैस्तदसदृशमनुष्यैर्बुध्यते घोषणायाम्॥'

इत्यनेन चारुदत्तवधाभ्युदयानुकूल प्रसङ्गाद् गुरुकीर्त्तनमिति प्रसङ्गः॥

विशेधस्य प्रशमनं समापनं पुनः शक्तिसाध्यत्वात शक्तिः नामङ्गम्

**6.शक्तिः** - विशेधस्य प्रशमनं समापनं पुनः शक्तिसाध्यत्वात शक्तिः नामङ्गम् भवति। उदाहरति- आप्ता आत्मीयत्वेन विश्वस्ता बान्धवाः, युद्ध क्षेत्रोपरि जनानां शरीरसङ्घान् वह्निसात् कात्स्र्येन कुर्वन्तु। तथा अमी बान्धवाः नेत्रजलमिलितं जलं कथञ्चिदतिक्लेशेन बान्धवेभ्यो ददतु। गृघकङ्गैः तथा मांसभक्षकपक्षिविशेषः भक्षितमांसान् बान्धवशरीराणि हतनरा निहतमनुप्यदेहा एन गहनं वनं तस्मिंस्तथोक्ते मार्गन्तां दग्धुं गवेषन्ताम्। अयं भास्वान् सूर्यास्तमिव शत्रोरस्तं जातमिति भावः। अत एव स्वस्वसैन्यानि संह्रियन्तां रणात्परावर्त्यन्तामिति यावत्। अत्र सैन्यसङ्कोचनोपदेशेन तदानीन्तन विरोधप्रशमनात् शक्तिः।

मनश्चेष्टासमुत्पन्नः श्रमः खेदइति स्मृतः।

मनः समुत्पन्नो यथा मालतीमाधवे-

दलति हृदयं गोढोद्वेगो द्विधा न तु भिद्यते

बहति विकलः कायो मोह न मुखति चेतनान्।

**7. प्रसङ्गः-** गुरोः पित्रादिगुरुजनस्य पूज्यस्येति यावत्, कीर्तनं विषय विशेषस्यातिशयसंशब्दनं प्रसङ्गेन संजाततत्वात्प्रसङ्गो नामाङ्गं भवति। उदाहरति –मृच्छकटिकोदन्तसम्बद्धदृश्य काव्ये मृच्छकटिकसंज्ञक-प्रकरण इत्यर्थः। हन्तु नीयमानं चारुदत्तं दृष्ट्वा चाण्डालक इत्यर्थः। 'एषु खलु सागरदत्तस्य सुतः आर्यविश्वदत्तस्य नप्ता चारुदत्तो व्यापादयितुं वध्यस्थानं नीयते। एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादिता' इति। एतच्छ्रुत्वा चारुदत्तः स्वीयप्रशस्तकुलकीर्त्तनात् लज्जया इति। यदस्माकं कुलं मखशतैर्ब्रहुतरयज्ञानुष्ठानैः पवित्रम् तथा निबिडे वैदिकजनव्याप्ते चैत्ये गृहे उद्धटैर्महाघोषैः वेदपाठध्वनिभिः पूर्वकाले सदसि उद्भासित सभाया उच्चैः स्वरेण ब्राह्मेद्वारा यशोभिः प्रशस्तम् आसीत् मरणावस्थायां वर्तमानस्य मम तत् गोत्रं असदृशमनुष्यः महोत्रघोषणानधिकारिजने चण्डालैः पापैः घोषणायाम् अपवाद वाद्यध्वनौ धुष्यते।

विषय विशेषस्यातिशयसंशब्दनं प्रसङ्गेन संजाततत्वात्प्रसङ्गो नामाङ्गम

**8.खेदः-** मनसा शोकादिमानसिकस्यापारेण चेष्टया शारीरिक व्यापारेण वा समुत्पन्नः परिश्रमः खिद्यतेऽनेने खेद इति नामाङ्गं स्मृतः। उदाहरत-कपालकुण्डलापहृततमालती शोकात् माधवस्योक्तिरियम्। दृढतरः प्रियाविरहक्लेशावेगः हृदयंस्फुटति तु किन्तु द्विधा न भिद्यते तेन गाढोद्वेगेन न विदीर्यते। शोकाकुलशरीरं मोहं प्राप्नोति, किन्तु चैतन्यं न मुञ्चति। अन्तःकरणशोकसन्तापः देहं ज्वलयति किन्तु भस्मसात् वह्नद्यधीनं न करोति ,तथा मर्मनिकृन्तनो विधिर्नियतिः ताडयति, किन्तु प्राणं न कृन्तति नोत्क्रामयतीत्यर्थः। अत्र प्रियाविरहक्लेशावेगेन माधवस्य श्रमात् खेदः।

मनश्चेष्टासमुत्पन्नः श्रमः खेदइति स्मृतः

ज्वलयति तनूमन्तर्दाहः, करोति न भस्मसात्

प्रहरति विधिमर्मच्छेदी, न कृन्तति जीवितम्।

एवं चेष्टासमुत्पन्नोऽपि

ईप्सितार्थप्रतीधातः प्रतिषेध इतीष्यते।

यथा प्रद्युम्न प्रभावत्यां विदूषकं प्रति प्रद्युम्नः - सखे! कथमिह त्वमेकाकी वर्त्तसे ? क नु पुनः प्रियप्खीसीजनानुगम्यमाना प्रियतमा मे प्रभावती? विदूषकः- असुरवइणा आआरिअ कहि वि णीदा।

प्रद्युम्नः - (दीर्घनिश्वस्य)

हा पूर्णचन्द्रमुखि ! मत्तचकोरनेत्रे !

मामानताङ्गि ! परिहाय कुतो गतासि ?।"

गच्छ त्वमद्य ननु जीवित! तूर्णमेव

दैवं कदर्थनपरं कृतकृत्यमस्तु॥

ईप्सितार्थप्रतीधातः प्रतिषेध इतीष्यते

**9.प्रतिषेधः** - अभिलषितविषयस्य प्रतीघातः प्राप्तिप्रतिबन्धः प्रतिषेध इति नाम्नाङ्गम्। प्रतिषेधो बाध इति नार्थान्तरम्।
उदाहरति- पूर्णचन्द्रस्य मुखं मत्तो यश्वकोरचक्रवाकस्तस्य आनताङ्गि! मां प्रद्युम्नं विहाय त्यक्त्वा कुतः कुत्र गतासि, एवं पूर्वार्द्धेन प्रियां सम्बोध्य शोचित्वा उत्तरार्धेन जीवितं सम्बोध्य इति। ननु जीवित त्वरितमेव त्वमद्य गच्छ व्रज, एवं च सति दुःखदानतत्परदेवं कृतकृत्यमस्तु। अत्रेप्सितस्य प्रभावतीसमागमप्रतिबन्धस्य सत्वात्प्रतिषेधः।

**कार्यात्ययोपगमनं विरोधनमिति स्मृतम्॥**

**यथावेण्याम्—युधिष्ठिरः—**

**तीर्णेभीष्ममहोदधौकथमपिद्रोणानलेनिर्वृते**
**कर्णाशीविषभोगिनिप्रशमितेशल्येचयातेदिवम्।**
**भीमेनप्रियसाहसेनरभसादल्पावशेषेजये**
**सर्वेजीवितसंशयंवयममीवाचासमारोपिताः।।**

कर्त्तव्ये अत्ययोपगमनं विघ्नप्राप्तिः विरोधनं नामाङ्गम्

**10.विरोधनम्**- कर्त्तव्ये अत्ययोपगमनं विघ्नप्राप्तिः विरोधनं नामाङ्गं स्मृतम्। उदाहरति- भीष्मो गाङ्गेय एव महोदधिः तस्मिंस्तथोक्ते उत्तीर्णे शरशय्यां प्रापित इत्यर्थः। द्रोण एव वह्निस्तस्मिंस्तथोक्ते कथमपि 'अश्वत्थामा हत इति व्याजोक्तिद्वारा शस्त्रत्यागेन निर्वाणतां गते स्वर्गं प्राप्ते सतीत्यर्थः। कर्णो राधेय एव विषोद्वारी सर्पः तस्मिंस्तथोक्ते 'आशीस्तालगता दंष्ट्रा तथा विद्धो न जीवति' इति। प्रशमिते वधेन शान्तिं प्रापिते तथा शल्यो मद्रराज एव शल्यं तमिमं च स्वर्गं प्राप्ते सतीत्यर्थः। शान्ति प्रापिते तथा शस्यो महराज एवं वाक्यं तस्मिन स्वर्गं गते च सति अत एव जये सति प्रियं साहसो यस्य स तेन तथोक्तेन भीमेनेत्यर्थः। अद्य दुर्योधनं हनिष्यामीति भीमकृतायाः प्रतिज्ञाया विफले स्वयं प्राणस्त्याक्ष्यामीति अपर प्रतिज्ञां सफलयितुं नूनं भीमः प्राणांस्त्यष्यतीति तथा च तदनु वयमपि सर्वे प्राणांस्त्यक्ष्याम इति। अत्र युद्धविजयरूपकार्ये भीमवचनेन विन प्राप्तः विरोधनम्।

**प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी।**

**यथा वेण्याम्- 'पाञ्चालकः- अहं देवेन चक्रपाणिना संहितः-- इत्युपक्रम्य कृतं सन्देहेन।**

**पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते**
**कृष्णात्यन्तचिरोज्झिते तु कबरीबन्धे करोतु क्षणम्।**
**रामे शातकुठारभास्वर करे क्षत्रद्रुमोच्छेदिनि**
**क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः॥**

**11.प्ररोचना**- संहारार्थस्य उपसंह्रियमाणप्रयोजनस्य प्रदर्शिनी प्रतिपादिका प्रोत्साहना प्ररोचयति विश्रामाय रुचिमुत्पादयतीति प्ररोचना

प्रोचना तु विज्ञेया संहारार्थप्रदर्शिनी

नामाङ्गं स्यात्। मन्दारमरन्दे तु - 'सिद्धवद्भाविनोऽर्थस्य सूचना स्यात्प्ररोचनम्' इति। उदाहरति- पाञ्चालकः। गदायुद्धे भीमजयजिज्ञासार्थं कृष्णेन प्रहितो दूतः चक्रपाणिना। संशयेन विजयः स्यान्नवेत्याकारकेण कृतम्। कथं न संदेह इति। ते तव युधिष्ठिरस्य राज्ये अभिषेकाय सलिलेन रत्नकलशाः शाकपार्थिवादित्वात्समासः। यथा भागवेण स्वप्रतिज्ञापूर्मवश्यं विधास्यतीति। अत्र पूर्यन्तामित्या दिचरणद्वयरूपायाः सङ्ग्रामोपसंहारोक्तेः प्ररोचना।

**कार्यसंग्रह आदानम्-**

**यथा वेण्याम्- 'भो भो समन्तपकचारिणः!**

**"नाहं रक्षो न भूतो रिपुरुधिरजलाह्लादिताङ्गः प्रकामं**
**निस्तीर्णो रुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।**
**भो भो राजन्यवीराः समरशिखिशिखाभुक्तशेषाः ! कृतं व**
**स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हि तैरास्यते यत्॥**

**अत्र समस्तरिपुवधकार्यस्य संगृहीतत्वादादानम्।**

**तदाहुश्छादन पुनः॥**

**कार्यार्थमपमानादेः सहनं खलु यद्भवेत् ।**

**यथा तत्रैव - अर्जुनः- आर्य ! प्रसीद किमत्र क्रोधेन-**

**अप्रियाणि करोत्वेष वाचा शक्तो न कर्मणा।**
**हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा।।**

कार्याणां कर्मणां सग्रहः सङ्कलनम् आदानम् नामाङ्गम्।

12.आदानम्- कार्याणां कर्मणां सग्रहः सङ्कलनम् आदानम् नामाङ्गम्। उदाहरति—समन्तात् ह्रदानां पञ्चकमिति समन्तपञ्चकं कुरुक्षेत्रान्तः पातिदेशविशेषः। तत्र युद्धार्थं चरितुं तादृशास्तत्सम्बुद्धाविदम्। अहं भवता दृश्यमानः राक्षसो न, दीवयोनिप्राणिविशेषः पिशाचादिर्न, अतएव पुंस ,किन्तु शत्रूणां रुधिराणिएव जलानि तैः आमोदितानि सिक्तानि अङ्गानि तथा प्रकामं यथेष्टं स्यात्तया निस्तीर्ण उत्तीर्णः उरुविषयिणी प्रतिज्ञा जलनिधिर्येन सः, अत एव गहनोदुर्द्धर्षः क्रोधनशीलः, कश्चात् क्षत्रियः अस्मि। लक्ष्ये लक्षणं सङ्गमयितुं इति- संगृहीतत्वात् निस्तीर्णेत्यादिविशाषणेन समस्तरिपुवधकार्यस्य मुखतः सङ्कलितत्वादित्यर्थः।

कार्यार्थं यत् खलु अपमानस्य आदि पदाद्द्युरुक्तिपरिग्रहः सहनंभवेद् तत्पुनः छाद्यते संव्रियतेऽनेनेति छादनं नामाङ्गम्

13.छादनम् - कार्यार्थं कर्त्तव्यविशेषसम्पादनाय यत् खलु अपमानस्य आदिपदाद्द्युरुक्तिपरिग्रहः सहनंभवेद् तत्पुनः छाद्यते संव्रियतेऽनेनेति छादनं नामाङ्गम् स्युः।भरतोऽपि 'अवमानात् कृतं वाक्यं कार्यार्थं छादनं भवेत् इति। उदाहरति-- हतं विनष्टं भ्रातृशतं यस्य स तथोक्तः अत एवदुखी अत्यन्त शोकाकुलःदुःखी अत्यन्तशोकाकुलः एष दुर्योधनः वचनमात्रेण अप्रियाणि अपकाराणि करोति कटुवचनानि वक्तीत्यर्थः। किन्तु कर्मणा कार्येग अप्रियाणि कत्तु' विधातुं न शक्तः। अत एवास्य दुर्योधनस्य प्रलापैः

विरुद्धवचनैः अस्माकं पाण्डवानां का व्यथा? किं दुःखम् एतद्वचनेन दुःखं न विधातव्यम् अत एव ते कोपो न युक्त इति भावः। अत्र दुर्योधनकटूक्तिविहितापमान सहनात् छादनम्।

**अथ निर्वहणाङ्गानि ।**

**सन्धिर्विबोधो प्रथनं निर्णयः परिभाषणम् ।**
**कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम् ॥**
**भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च ।**
**प्रशस्तिरिति संद्वारे ज्ञेयान्यङ्गानि नामतः ॥**

**तत्र-**

**बीजोपगमनं सन्धिः**

**यथा तत्रैव ( वेण्याम् ) - भीमः - भवति! यज्ञ वेदिसम्भवे ! स्मरति भवती यन्मयोक्तम् -'चञ्चद्भुजे' त्यादि ।' अनेन मुखे 'क्षिप्तबीजस्य पुनरुपगमन मिति सन्धिः।**

**- विबोधः कार्यमार्गणम्॥**

**यथा तत्रैव - 'भौमः मुञ्चतु मामार्थः क्षणमेकम्। युधिष्ठिरः- किमपरम- मवशिष्टम्? भीमः - सुमहदवशिष्टम्। संयमयामि तावदनेन सुयोधनशोणितो- क्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम। युधिष्ठिरः- गच्छतु**

## निर्वहणसन्ध्यङ्गानि

निर्वहणसन्ध्यङ्गानि

निर्वहणसन्धेः चतुर्दशाङ्गानि- संहारे निर्वणाख्या परनामको पसंहारसन्धौ सन्धिर्विबोध इत्यादीनि चतुर्दशाङ्गानि नामतो बोध्यानीत्यर्थः।तत्र सन्धिरूपाङ्गं लक्षयति - वीजस्य मुखसन्धावुपचितस्य बीजार्थस्य उपगमनं पुनःप्राप्तिः प्रतिज्ञातार्थस्य बीजस्य सिद्धया तस्मरणमित्यर्थः पुनः सन्धानं सन्धिर्नामा भवेत्। उदाहरति- तत्रैव वेण्यामेवेत्यर्थः, एवमग्रेऽपि। कौरवशतं हत्वा 'भवति यज्ञे'- त्यादिक भीमस्योक्तिः। मुखे प्रथमतः क्षिप्तमुपन्यस्तं प्रतिज्ञया बोधितं बीजं सार्थरूपं पुनरुपगतं ज्ञापितमित्यर्थः। यथा च रत्नावस्याम् 'वसुभूतिः- बाभ्रव्य! सुसदृशीयं राजपुत्र्याः। बाभ्रव्यः ममाऽप्येवमेव मनसि इत्यनेन नायिकाबीजोपगमात् सन्धिः।

**1.विबोधः-** कार्यमार्गणं कर्त्तव्यविषयस्य गवेषणम्, विधेयत्व प्रकारेण विशेषबोधविषयत्वाद् विबोधो नामाङ्गं भवेत्। भरतोऽपि 'कार्यस्यान्वेषणं युक्त्या विबोध इति कीर्त्तितः' इति ।

उदाहरति -तत्रैव वेण्यामेव । सुयोधनस्य यत् शोणितं तेनोक्षितेन लिप्तेन करेण दुःशासनेनाकृष्टम् केशपाशम् । बेणीसंहारं दुःशासनाकर्षणेन

विबोधः
कार्यमार्गणम्

विचिप्ताया वेण्याः पुनः संयमनम्। यथा वा रत्नावल्याम्- 'वसुभूतिः (निरूप्य) देव! कुन कन्यका राजा- देवी जानाति। वासवदत्ता-अज्जउत्त ! एसा सागरादा पाविअत्ति भणिअ अमचजोगन्धरात्रणेण मम हत्थे गिहिदा अदो उजेव सद्दावीअदियौगन्धरायणेन न्यस्ता। असौ मामनिवेद्य करिष्यति' इत्यनेन रत्नावली लक्षण कार्यमार्गणाद्विबोधः।

**भवान्, अनुभवतु तपस्विनी वेणीसंहारम्' इति। अनेन केशसंयमनकार्य- स्यान्वेषणाद्विबोधः।**

**उपन्यासस्तु कार्याणां प्रथनं-**

**यथा तत्रैव—'भीमः पाञ्चालि! न खलु मयि जीवति संहर्त्तव्या दुःशासन- विलुलिता वेणिरात्मपाणिभ्याम्। तिष्ठ, स्वयमेवाह संहरामि' इति।**

**अनेन कार्यस्योपक्षेपाद् ग्रथनम्**

**- निर्णयः पुनः।**

**अनुभूतार्थकथनं -**

**यथा तत्रैव, 'भीमः - देव अजातशत्रो ! अद्यापि दुर्योधनहृतकः। मया हितस्य दुरात्मनः-**

**भूमौ क्षिप्तं शरीरं निहितमिदमक चन्दनाभं निजाङ्गे**
**लक्ष्मीरार्थी निषिक्ता चतुरुदधिपयः सीमया सार्द्ध मुर्व्या।**
**भृत्या मित्राणि योधाः कुरुकुलमनुजा दग्धमेतद्रणाग्नौ**
**नामैकं यद् ब्रवीपि क्षितिप ! तदधुना धार्त्तराष्ट्रस्य शेषम्।**

कार्याणां उपन्यासः उपक्षेपणम् प्रकृतसन्दर्भे योजनं प्रथनम्

**2.प्रथनम्-** कार्याणां कर्त्तव्यविषयाणाम् उपन्यासः उपक्षेपणम् प्रकृतसन्दर्भे योजनं प्रथनं नामाङ्गं मतम्। उदाहरति -दुःशासनेन शकलीकृता। संहरामि बध्नामि। लक्ष्ये लक्षणं योजयति कार्यस्य कर्त्तव्यवेणीबन्धनस्यउपन्यासात्। यथा च रत्नावल्याम् - 'यौगन्धरायणः - देव! क्षम्यतां यद्देवस्यानिवेद्य मयैतत्कृतम्' इत्यनेन वत्सराजस्य रत्नावलीप्रापणकार्योपक्षेपाद् ग्रथनम्।

अनुभूतार्थस्य प्रत्यक्षादिना पूर्वं ज्ञातविषयस्य कथनं पुनः निर्णीतविषयकत्वात् निर्णयः

**3.निर्णयः** - अनुभूतार्थस्य प्रत्यक्षादिना पूर्वं ज्ञातविषयस्य कथनं पुनः निर्णीतविषयकत्वान्निर्णयो नामाङ्ग भवेत्। मन्दारमरन्देपि-'पश्चाच्च स्वानुभूतार्थ- कथनं निर्णयो मतः' इति। उदाहरति- युधिष्ठिरस्येदमपरं नाम भूमाविति। मया तस्य दुरात्मनो दुर्योधनहतकस्य शरीरं भूमौ क्षिप्तं निष्प्राणीकृत्य पृथिव्यां पातितम्। इदम् असृक शोणितं तस्य दुर्योधनस्य निजाङ्गे स्वावयवे निहितम् उपन्यस्तं स्थापितमित्यर्थः, चतुर्णाम्

उदधीनाम् समुद्राणां पयांसि जलानि सीमा यस्याः सा तथोक्तया उर्व्या पृथिव्या सार्द्धं लक्ष्मीः आर्यें भवति स्थापिता, सचिवादयः मित्राणि योधा तथा कुरुकुलस्य मनुजा दुःशासनप्रभृतयः एतत् समयं रणमेवाग्निरिति रूपकतस्मिंस्तथोक्ते दग्धं विनाशितम्, क्षितिमवनि पातीति क्षितिपस्तत्सम्बोधने हे क्षितिष! एक नाम यत दुर्योधनेति संज्ञां ब्रवीषि दुर्योधनस्य तत् सर्वाणि विनाशितानीति भावः। अत्रात्मना विहितत्वात् प्रत्यक्षेणैवानुभूतविषयस्य कथनान्निर्णयः।

**वदन्ति परिभाषणम्॥**

**परिवादकृतं वाक्यम्-**

**यथा शाकुन्तले- 'राजा- आयें! अथ सा तत्र भवती किमाख्यस्य राजर्षेः पत्नी? तापसी -को तस्स धम्मदारपरिट्टाइणो णामं गेणहिस्सदि ।'**

**- लब्धार्थशमनं कृतिः।**

**यथा वेण्याम्- 'कृष्णः एते भगवन्तो व्यास वाल्मीकिप्रभृतयोऽभिषेकं धारयन्तस्तिन्ति'। अनेन प्रामराज्यस्याभिषेकमङ्गलः स्थिरीकरणं कृतिः।**

**शुश्रूषादिः प्रसादः स्यात्-**

**यथा तत्रैव भीमेन द्रौपद्याः केशसंयमननम्।**

**-आनन्दो वाञ्छितागमः॥**

**यथातत्रैव- द्रोपदी - बिसुमरिदं एदं वावारं णाधस्स पसादेण पुणो वि सिक्खिसं।"**

**समयो दुःखनिर्याणं-**

**यथा रत्नावल्याम् वासवदत्ता - ( रत्नावलीमालिङ्गय) समस्सस बहि-णिए! समस्सस ।'**

अपरिवादेन ,अपवादेन कृतं पुरस्कृतं वाक्यं वचनं परिवाद सूचकं भाषणं परिभाषणम्

**4.परिभाषणम्-** परिवादेन ,अपवादेन कृतं पुरस्कृतं वाक्यं वचनं परिवाद सूचकं भाषणं परिभाषणं नामा बदन्ति। उदाहरति कुशकुन्तला नाटकदृश्यकाव्ये इत्यर्थः। आयें! अथ सेत्यादिपृच्छा दुर्वाससः शापाधीन विस्मरणकृतशकुन्तलापरित्यागस्य पश्चात्तां स्मृत्वा तामनासाद्य विरहिणः स्वर्गादागच्छतस्तापसीमुखात् तत्प्रसङ्गं श्रुत्वा दुष्यन्तस्य प्रश्नः। तापसी 'राजानं प्रत्याह' इति शेषः। को तरस इति 'कस्तस्य धर्मदारपरित्यागिनो नाम ग्रहीष्यति' इति। अब दुष्यन्तस्य परिवादसूचना परिभाषणम्।

उपलब्धविषयैः शमनं शोकादि नाशनं चेतसः स्थिरीकरणमित्यर्थः, कृतिः

**5.कृतिः** - लब्धैरर्थैः उपलब्धविषयैरित्यर्थः शमनं शोकादिनाशनं चेतसः स्थिरीकरणमित्यर्थः, कृतिर्नामाङ्गं स्यात्।उदाहरति- अभिषेकसामग्रीं प्रापयन्तः। स्थिरीकरण राज्यलाभसूचनेन चेतसः स्थैर्यरिपादनम्। अन्ये पुनरस्य स्थाने प्राप्तस्य प्रातिकूल्यशमनं यतिमाहुः। यथा मुद्राराक्षसे- 'चाणक्यः- अमात्य राक्षस! अपीष्यते चन्दनदासस्य जीवितम्' इत्यादिना 'का गतिरेष गृह्णामि इत्यनेन लब्धस्य राक्षसस्य साचिव्यग्रहणवामताप्रशमनात् द्युतिः।

शुश्रूषा करादिना सेवा आदिपदाचामरव्यज नादिश्च, प्रसीदत्यनेनेति प्रसादः

**6.प्रसादः-** शुश्रूषा करादिना सेवा आदिपदाचामरव्यज नादिश्च, प्रसीदत्यनेनेति प्रसादो नामाङ्गं स्यात्। उक्तं च भरतेन 'शुश्रूषाद्युपसंपन्ना प्रसादः प्रीतिरुच्यते' इति। मन्दारमरन्देऽपि - 'स्याच्छुश्रूषादिसम्भूता प्रसादस्तु प्रसन्नता' इति। उदाहरति - यथा वा स्वावल्याम्- 'देव! क्षम्यताम्' इत्यादि।

वान्छितागमः अभिलषितप्राप्तिज न्या प्राप्तिः आनन्दः

**7.आनन्दः-** वान्छितागमः अभिलषितप्राप्तिजन्या प्राप्तिः आनन्दो नामाङ्गं भवेत्। तदुक्तं भरतेन- 'समागमस्तु योऽर्थानामानन्दः स तु कीर्त्तितः" इति। मन्दारमरन्देऽपि- 'अभीप्सितार्थप्राप्तिरानन्दः परिकीर्तितः' इति। उदाहरति- 'विस्मृतमेनं व्यापारं नाथस्य प्रसादेन पुनरपि शिक्षिप्ये इति। पुनं व्यापारं केशसंयमनरूपम्। प्रसादेन बन्धनरूपेण। अत्र वेणीसंयमनरूपाभिलपितमाप्ति जन्यप्रीतिरानन्दः। यथा च रत्नावल्याम्- 'राजा- यथाह देवि! इनि (रावली गृहाति)।' अत्रेअप्सितरत्नवलीप्राप्तत्वादानन्दः।

दुःखस्य निर्याणम् अपगमः विसर्जनमिति यावत्। समयः

**8.समयः-** दुःखस्य निर्याणम् अपगमः विसर्जनमिति यावत्। समयो नामाङ्गं भवेत। मन्दारमरन्दे तु 'समयः स्यात्सुखावाप्तिः दुखप्रशमनं च वा इति। उदाहरति- 'समाश्वसिहि भगिनि! समाश्वसिहि।' इति। इयं साग-रिकायाः मातुलकन्यकात्वेन परिचये सति वासवदत्ताया उक्तिः। अत्र रत्नावल्या दुःखापगमात् समय।

**-तद्धवेदुपगूहनम्।**

**यत् स्याददद्भुत सम्प्राप्तिः --**

**यथा मम प्रभावत्यां नारददर्शनात् प्रद्युम्न ऊर्ध्वमवलोक्य-**

**दधद्विद्युल्लेखामिव कुसुममालां परिमल-**
**भ्रमद्भृङ्गश्रेणीध्वनिभिरुपगीतां तत इतः।**
**दिगन्तं ज्योतिभिस्तुहिनकर गौ रैर्धवलय-**
**न्नितः कैलासाद्रिः पतति वियतः किं पुनरिदम्॥**

**-सामदानादि भाषणम्॥**

**यथा चण्डकौशिके - 'धर्मः- तदेहिः धर्म लोकमधितिष्ठ'।**

**पूर्ववाक्यं तु विज्ञेयं यथोक्तार्थोपदर्शनम्॥११३॥**

**यथा वेण्याम्- 'भीमः - बुद्धिमतिके! क्क सा भानुमती। परिभवतु सम्प्रतिपाण्डवदारान्।'**

यत् अद्भुतस्य विस्मयस्थायिभावात्मकाः संग्रामः उपलब्धिः तत उपगूहनम्

9.उपगूहनम्- यत् अद्भुतस्य विस्मयस्थायिभावात्मकाः संग्रामः उपलब्धिः तत उपगूहन नामाङ्गं भवेत्। उदाहरति—ऊर्ध्वम् आकाशो,अवलोक्य अवतरन्तंनारदमिति। परिमलेन पुष्पविमर्दनादुत्थित सुगन्धेन भ्रमन्तीनां ध्वनिभिः उपशब्दिताम्, तथा विद्युल्लेखामिव द्वीप्यमिनमिति कुसुममालां धारयन् तथा तुहिनकरगौरैः शशितुल्यस्वच्छवर्णैः ज्योतिभिः शरीरकान्तिभिः तत इतः सर्वतः दिगन्तं धवलयन् कैलासाद्रेरपेतोआकाशादवधेः पतति कश्चित् पदार्थ इति। अत्र नारदस्याद् भुतप्राप्तेःउपगूहनम्।

साम सन्तोषजनके वचनं दानादि च आदि-पदेन प्रियहितादिपरिग्रहः भाषणम्

10.भाषणम्- साम सन्तोषजनके वचनं दानादि च आदि- पदेन प्रियहितादिपरिग्रहः भाषणं नामाङ्गं स्यात्। उदाहरति- अत्र तदेहीति सन्तोषजनकवचनाद् धर्मलोकस्य दानाञ्च भाषणम्।

यथोक्तार्थोपदर्शनं परेण यथोक्तकटुवा क्यस्य स्मरणं मुखसन्ध्याद्युक्तवाक्यदर्शनं वा पूर्ववाक्यम्

11.पूर्ववाक्यम् - यथोक्तार्थोपदर्शनं परेण यथोक्तकटुवा क्यस्य स्मरणं मुखसन्ध्याद्युक्तवाक्यदर्शनं वा पूर्ववाक्यं नामाङ्ग विज्ञेयम्। उक्तं च महर्षिणा 'पूर्ववाक्यं तु विज्ञेयं यथोक्तार्थप्रदर्शनम्' इति। उदाहरति- 'बुद्धिमतिके! (एतदाख्येयं चेटी) भानुमती दुर्योधनस्य पत्नी तथा दासीद्वारा प्राक् कटूक्तिः कृतेति पूर्ववाक्यम् ।

**वरप्रदानसंप्राप्तिः काव्यसंहार इष्यते।**

**यथा सर्वत्र - 'कि ते भूयः प्रियमुपकरोमि।' इति ।**

**नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते।।११४।।**

**यथा प्रभावत्याम्-**

**राजानः सुतनिर्विशेषमधुना पश्यन्तु नित्यं प्रजा**
**जीयासुः सदसद्विवेकपटवः सन्तो गुणग्राहिणः।**
**सस्यस्वर्णसमृद्धयः समधिकाः सन्तु क्षमामण्डले**
**भूयादव्यभिचारिणी त्रिजगतो भक्तिच नारायणे।।**

**अत्र चोपसंहारप्रशस्त्योरन्त एकेन क्रमेणैव स्थितिः।**

वरप्रदानसंप्राप्तिः काव्यसंहार इष्यते

12.काव्यसंहारः- वरप्रदानस्य अभिलषितविषयदानेच्छायाः सम्प्राप्तिरुपस्थितिः तत्र सति सर्वस्मिन्नेवेप्सिते सम्पन्ने प्रस्तुतकाव्यमेव संह्रियत इति काव्यसंहारो नामाङ्ग इष्यते। नन्दार मरन्दे-'उपसंहार इत्युक्तः कार्यार्थस्योपसंहृतिः' इति। उदाहरति- सर्वत्रेति प्रायेण दृश्यकाव्ये। स च प्रतिगृहीते वरेऽप्रतिगृहीते च बरे काव्योपसंहारः। यथा कृत्यारावणे- सीतारचणे रामस्य प्रिये हिते च महति कर्मणि कृतेऽ प्यसन्तुष्यन्नग्रिराह -

'बस! उच्यतां कि ते भूयः प्रियमनुकरोमि' 'रामः भगवन्! अतः परमपि प्रियमस्ति?' इति।

13.प्रशस्तिः - नृपदेशादति। नृपस्य देशस्य, आदिपदाद् देवतादीनां च शान्तिः स्वस्त्ययनम् आशीर्वाद इत्यर्थः, प्रशंसा उक्तिः प्रशस्तिमाङ्गम् अभिधीयते। मन्दारमरन्देऽपि - 'शुभप्रशंसनं धीरैः प्रशस्तिरिति कथ्यने' इति। उदाहरति- अधुना राजानः नित्यं सर्वदेव प्रजाः। सुतनिर्विशेषं पुत्रानिवेति तात्पर्यम्, यथा स्यात्तथा पश्यन्तु। सदसद्विवेके पटवः समर्थां गुणग्राहिणः परेषां दोषानगृहीत्वा गुणान्ग्रहीतारः सन्तः, शिष्टा जना जयन्तु उत्कर्षमानो भवत्वित्यर्थः। पृथ्वीमण्डले सस्यानां धान्यानां स्वर्णानां च समृद्धयः सम्पदः समधिकाः सन्तु। स्वर्णानामितिपदमुपलक्षणं तेन धनसामान्यस्य ग्रहणम्। नारायणे परमात्मनि त्रिजगतो भुवनत्रयवासिनो जनस्य अव्यभिचारिणी अनैकान्तिकी अकादाचित्कीत्यर्थः भक्तिश्च भूयात्। भक्तिनम-

नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते

> द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।
> सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते।।

अत्र नृपादेशादिशाम्स्यादेराशंसनात् प्रशस्तिः

लक्ष्ये लक्षणं- काव्य संहाररूपमङ्गोपसंहारः। अन्ते नाटलान्ते उसंहारप्रशस्त्योरेकेन निर्दिष्टक्रमेणैव स्थितिरुपस्थितिरित्यर्थः।

**अथ वृत्तयः-**

> **शृङ्गारे कौशिकी धीरे सारखत्यारभटी पुनः।**
> **रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती॥१२२।।**
> **चतस्रो वृत्तयो ह्येताः सर्वनाटयस्य मातृकाः।**
> **स्युर्नायिकादिव्यापार विशेषा नाटकादिषु ।।१२३।।**

वृत्तयः -

नाटकवृत्तीः प्रदर्शयितुं इति - शृङ्गारे रसे कौशिकी नाम वृत्तिः शृङ्गारप्रतिपादिका वृत्तिः कौशिकीत्यर्थः। वीरे रसे सात्वती नाम वृत्तिः वीरप्रतिपादिका वृत्तिः सात्वतीत्यर्थः। रौद्रे बीभत्से च रसे पुनरारभटी नाम वृतिः, रौद्रबीभत्सप्रतिपादिका वृत्तिः आरभटीत्यर्थः। सर्वत्र अन्येषु रसेषु भारती नाम वृत्तिः स्यात्। नायिकादीत्यत्रादिपदेन नायकप्रतिनायकादिसमस्तपात्रपरिग्रहः तथा च नायिकादीनां पात्राणां व्यापार विशेषारचेष्टाविशेषरूपाः, सर्वनाट्यस्य सकलप्रकाराभिनयस्य मातृवदुपजीव्या मूलभूता जनम्य इति यावत्, एताश्चतस्रो वृत्तयो नाटकादिषु नाटकप्रकरणादिदशरूपकेषु नाटिकाद्यष्टादशोपरूपकेषु च स्युः। आसां मध्ये कविः शृङ्गाररसप्रधानं नाटिकादिकं कौशिकीं वृत्ति-

वृत्तयः–कौशिकी, सात्वती, आरभटी, भारती च

नाश्रित्य वर्णयेदित्यर्थः। एवमन्यत्रापि। कौशिकीवृत्तिश्च सामवेदोत्पन्ना। तदुक्तं भरतेन-

'ऋग्वेदाद्भारती'वृत्तिर्यजुर्वेदात्तु सात्वती।

कौशिकी सामवेदाच्च शेषा चाथर्वणी तथा ॥' इति ।

तत्र वर्त्तते रसोऽनयेति नायिकादिचेष्टाविशेषो वृत्तिलक्षणम्। कौशिक्यादिशब्दास्तु गोमण्डलादिवत्तद्विशेषे रूढाः। कौशिकीति पाठे तु अतिशायिनः केशाः सन्ति आसामिति केशिकाः स्त्रियः 'स्तनकेशवतीत्वं' हि स्त्रीणां लक्षणम्। तत् प्रधानत्वात् तासामियं कौशिकीति व्युत्पत्तिर्ज्ञेया सर्वप्रथमशृङ्गाररससम्बन्धिवृत्तेरेव प्रथमं बुद्धिविषयत्वात् नायिकायाश्च तत्प्रयोजकत्वात् नायिकादिव्यापारत्यभिहितम्। ध्वन्यालोके अभिनवगुप्तपादास्तु-वर्त्तन्ते अनुप्रासभेदा आसु इति वृत्तयः।

'सरूपव्यञ्जनन्यासं तिसृष्वेतासु वृत्तिषु।

पृथक् पृथगनुप्रासमुशन्ति कवयस्तथा॥

'पृथक् पृथगिति परुषानुप्रासः, उपनागरिकानुप्रास इति वृत्तयोऽनुप्रासजातय एव इत्याहुः। सरस्वतीकण्ठाभरणे तु-

या विकासेऽथ विक्षेपे सङ्कोचे विस्तरे तथा ।
चेतसे वर्त्तयित्रि स्यात् सा वृत्तिः सापि षड्विधा।।

**तत्र कौशिकी-**

**या श्लक्ष्णनेपथ्यविशेषचित्रों स्त्रीसंकुला पुष्कलनृत्यगीता।**
**कामोपभोगप्रभवीपचारा सा कौशिकी चारुविलासयुक्ता॥१२४॥**

**नर्म च नर्मस्फूर्जी नर्मस्फोटोऽथ नर्मगर्भश्च।**

**चत्वार्यान्यस्या-**

**तत्र-**

**-वैदग्ध्यक्रीडितं नर्म।।१२५।।**

**इष्टजनावर्जन कृत्तच्चापि त्रिविच मतम्।**
**विहितं शुद्धहास्येन सशृङ्गारभयेन च।।१२६।।**

**तंत्र केवलहास्येन विहितं यथा रत्नावल्यान्- 'वासवदत्ता - (फलक मुद्दिश्य सहासम्) एसा वि अवरा तब समीचे जघालिहिदा एवं किं अज्जवसन्तस्स विण्णाणम्। सशृङ्गारहास्येन यथा शाकुन्तले - राजानं प्रति शकुन्तला - असंतुटठो उण किं करिस्सदि। राजा-इदम्। (इति व्यवसितःशकुन्तलाबक्त्रं ढौकते) सभयहास्येन यथा रत्नावल्याम्--आलेख्यदर्शनावसरे सुसंगता-जाणिदो मए एसो वृत्तन्तो समं चित्तफलएण। ता देवीए गदुअ निवेदइस्सम्। एतद्वाक्यसम्बन्धि नर्मोदाहृतम् । एवं वेषचेष्टासम्बन्ध्यपि।**

**कौशिकीवृत्तिः-**

शृङ्गारप्रतिपादिका वृत्तिः कौशिकी

कौशिक्यारभटी चैव सात्वती भारती तथा।
मध्यमारभटी चैव तथा मध्यमकौशिकी।

तासां यथाक्रमं विशेषणान्यभिधातुम् इति।

श्लक्ष्णेन मनोरमेण नेपथ्यविशेषेण नायिकादिभूषणविशेषेण चित्रा शोभातिशयशालिनी स्त्रीबहुला विपुलानि नृत्यगीतानि यस्यां सा. तथोक्ता कामेन हेतुना य उपभोगः सम्भोगस्तत्प्रभवाः कारणानि उपचाराश्चन्द्र चन्दनधनसारादयो यस्य सा तथोक्ता तथा चारुभिर्विलासैःपूर्वक्तस्वरूपैर्युक्ता या वृतिः सा कौशिकी स्यात्। नाट्यशास्त्रपि-

'या लचणनेपथ्यविशेषचित्रा स्त्रीसंयुक्ता वा बहुनृत्यगीता।

कामोपभोगप्रभवोपचारा तां कौशिकी वृत्तिमुदाहरन्ति॥' इति।

अस्य अङ्गानि चत्वारि इति। नर्म, नर्मस्फूर्जः, नर्मस्फोटः, नर्मगर्भश्च- इत्येतानि चत्वारि अस्याः कौशिकीवृत्तेरङ्गानि।

वैदग्ध्येन क्रीडनं नर्म स्यात्

1.नर्मः- प्रियजनस्य सामाजिकादेरिति यावत्, आवजनं प्रीत्याधानं तत्करोतीति तथोक्तम्, प्रीतिकारकमित्यर्थः। नैपुण्येन वैदग्ध्येन क्रीडनं नर्म स्यात्। तथापि नर्म, शुद्ध केवलं यत हास्यं तेन शृङ्गारभयाभ्यां सहेति तेन च विहितं सत् एवं च केवलहास्पेन विहितम् शृङ्गारहास्येन विहितम्, सभयहास्येन विहितञ्चेत्यर्थः।

उदाहरति-तत्रेति। रत्नावल्यां द्वितीयेऽङ्के। वासवदत्ताफलकं रत्नावली चित्रपटमिति भावः सहासं वत्सराजं 'प्रत्याह' इति। एषाऽप्यपरा तब समीपे यथा लिखिता, एतत् किमार्य वसन्तकस्य विज्ञानम्' इति। चित्रफलके सागरिकया लिखितं राजानं दृष्ट्वा सुसङ्गतया तत्समीपे सागरिकापि लिखिता। तत्र लिखितं राजानं दृष्ट्वा वासवदत्तया पृष्ठे केन त्वमत्र लिखिता इति। ततो राज्ञोऽर्थं शिल्पविज्ञानार्थं समुल्लिखितमिदमिति। ततस्तदन्तिके सागरिका लिखितं दृष्ट्वा 'एषा सा अवरेत्याद्या वासवदत्तायाः पृच्छा। विज्ञानं शिल्पनैपुण्यम्। अत्र केवलहास्येन विहितं वासवदत्ताया नर्म, अन्तःक्रोधेन तस्याः शृङ्गाराभावात्। प्रबन्धरसस्तु शृङ्गार इति तत्रेयं वृत्तिः। ननु कमलस्यमधुकरःसन्तुष्यति गन्ध- मात्रेण' इति राज्ञ उक्त्यनन्तरं शकुन्तलाया इयं पृच्छा। असन्तष्टो मधुकर इति पूर्वोक्तेनान्वयः। व्यवसितश्चुम्बितुं प्रवृत्तः। वक्त्रमाननं ढौकते आच्छादयति। अत्र सशृङ्गार- हास्येन विहितं शकुन्तलाया नर्म। अत्र राज्ञो भीतियुक्तेन सुसङ्गताया हासेन विहितं नर्म।

**नर्मस्फूर्जः सुखारम्भो भयान्तो नवसंगमः।**

**यथा मालविकायाम् सङ्केतनायकमभिसृतायां 'नायकः-**

विसृज सुन्दरि ! सङ्गमसाध्वसं ननु चिरात्प्रभृति प्रणयोन्मुखे।
परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि॥'

मालविका - 'भट्टा, देवीए भएण अप्पणो वि पिअं क ण पारेमि' इत्यादि। अथ नर्मस्फोटः-

नर्मस्फोटी भावलेशैः सूचितात्परसो मतः॥१२७॥

यथा मालतीमाधवे –

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किन्त्वेतत् स्यात् किमन्यदितोऽथवा।
भ्रमति भुवने कन्दर्पाणां विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम्॥

अलसगमनादिभिर्भावलेशैर्माधवस्य मालत्यामनुरागः स्तोकः प्रकाशितः।

नर्मस्फूर्जः सुखारम्भो भयान्तो नवसंगमः

2.नर्मस्फूर्जः- सुखमारम्भे यस्य सः तथोक्तः भयं भीतिरन्ते यस्य सः तथोक्तः सङ्गमः, नर्मणा स्फूर्जते ,देदीप्यते इति नर्मस्फूर्जः स्यात्। उक्तं च महर्षिणा विंशाध्याये-

'नवसङ्गमसंभोगी रतिसमुदयवेशवाक्यसंयुक्तः।

ज्ञेयो नर्मस्फूर्जी ह्यवमानभयात्मकश्चैव ॥' इति।

उदाहरति - मालविकानामकनाटिकायामित्यर्थः। सङ्केते स तस्थाने आगतो नायकसङ्केतनायकः तं तथोक्तम्। सङ्गमविषये साध्वसं भयं विसृज परि- त्यज चिरात्प्रभृति बहुसमयावधि प्रणयोन्मुखे भवत्याः प्रेमाभिलाषुके सहकारताम् अतिसौरभरसालताम् गते प्राप्ते मयि, त्वं शौक्ल्यान्मुक्तामतिक्रान्तासा चासौ लता माधवी तस्याश्चरितं वेष्टनरूपं प्रतिगृहाण। अत्र सुन्दरीति सम्बोधनेन सुखारम्भात् अवसाने भयाच्च पद्यमारभ्य गद्यांशे मालविकाया नर्मस्फूर्जः। सरस्वतीकण्ठाभरणे तु—

प्राप्ताऽसौ वृषपर्वणः प्रियसुता सङ्केतखण्डे नवे
वृष्टिः सेयमनबुदाऽमृतमयी गात्राणि मे सिञ्चति।
किं जानासि विनोदयिष्यति मनः सन्तप्तमेवाद्य मे
दुर्वास्येव निवर्त्तयिष्यति न भोस्तां देवयानीं प्रति !इत्युदाहरणम्।

नर्मस्फोटो भावलेशैः सूचितात्परसो मतः

3.नर्मस्फोटः- भावलेशैः ईषत्प्रकाशितैर्भावैः सूचितो द्योतितः अल्पो रसः शृङ्गारो यत्र स तथोक्तो व्यापारो नर्मणः स्फोटः अभिव्यक्तिर्यत्र स नर्म-स्फोटो-मतः।यथ- आगमिष्यन्तं माधवं दृष्ट्वा मकरन्दस्योक्तिरियम्। माधवस्य गमनम् अलसम्,दृष्टिः शून्या-

'समतारा समपुरा निष्कम्पा शून्यदर्शना

बाह्यार्थग्राहिणी सध्या शून्या दृष्टिः प्रकीर्तिता ॥'

इति भरतोक्त लक्षणरूपा, शरीरम् असौष्ठवम् अङ्गसंस्काराभावात् भाविसौन्दर्यशून्यम्, निश्वासः अधिकं प्राकृतिकाद्बहुलम् स्यात्। लक्ष्ये लक्षणं योजयति- अलसगमनादिभिः सूचितैरित्यर्थः। अनुरागी विप्रलम्भरसः। सम्भोगरूपनच्छायच्चात् अत्र नर्म।

**नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः ।**

**यथा-तत्रैव सखीरूपधारिणा माधवेन मालत्या मरणव्यवसायवारणम् । अथ सात्वती-**

**सात्वती बहुला सत्त्व-शौर्यत्यागद्याजवः।**
**सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा।**
**उत्थापकोऽथ सांघात्यः संलापः परिवर्त्तकः।**
**विशेषा इति चत्वारः सांवत्याः परिकीर्त्तिताः॥**
**उत्तेजनकरी शत्रर्वागुत्थापक उच्यते।**

**यथा महावीरचरिते-**

**"आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा**
**वैतृष्ण्यन्तु 'ममापि सम्प्रति कुतस्त्वदर्शने चक्षुषः।**
**'त्यत्सात्यमुखस्य नाऽस्मि विषयस्तत् किं वृथा व्याहृतै-?**
**रस्मिन् विश्रुतजामदग्न्यदमने पाणी धनुर्जृम्भताम्॥**

नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः

**4.नर्मगर्भः -** प्रच्छन्नवत्तिनः प्रच्छन्नीभूय तिष्ठतः नेतुर्नायकस्य व्यवहुतिष्यवहारः नर्म गर्भ यस्य स नर्मगर्भः स्यात्। उदाहरति- सखीरूपधारिणा लवङ्गिकास्थाने विद्यमानेनेत्यर्थः। अत्रत्योदन्तस्तु - सखी लवङ्गिका, पित्रा राजाज्ञया जरते नन्दाय दातुं कृतनिश्चया माल सीति देवतागृहे स्वनिधनं याचयन्ती लवङ्गिकायाः पादे पतिता मालती। स्तम्भान्तरतः स्थितो माधवश्च लवङ्गिकावेशेनागत्य लवङ्गिकामपसार्य तत्स्थाने स्वपादं दत्वा स्थितः। ततो मालती उत्थाय वङ्गिकाबुद्ध्या तमालिङ्गय पश्चादवलोक्य परिचीयमाना व्यवसायानिववृते इति मालतीमाधवे द्रष्टव्यः। एवं 'दृष्ट्वैकासनसंस्थिते' इत्यादावपि बोध्यम्।

## सात्वतीवृत्तिः-

वीररसप्रतिपादिका वृत्तिः सात्विती

कौशिकी वृत्तिनिरूपणानन्तरं सात्वतीनिरूप्यते इति। सत्वमध्यवसायः, शौर्यं बलम्, त्यागो दानसामर्थ्यम्, दया कृपा, आर्जवम् अकौटिल्यम् तैबाहुल्यवती, सहर्ष सानन्दा, क्षुद्रशृङ्गारा वीरे रसे शृङ्गारस्यानुषङ्गिकत्वेन क्षुद्रत्वम्, विगतशोका तया साद्भूता या वृत्तिरिरिति। सा सात्वती सत् सत्वं प्रकाशस्तद्यत्रास्ति तत्सत्वं मनस्तत्र भवा सात्वती संज्ञा शब्दस्वेन बाहुलकात् स्त्रीत्वम्। तथा च शोकहीनः सत्वशौर्यत्यागद्यार्जवहर्षादिभावोत्तरी नायकव्यापारः। सात्वती

उत्थापकः, सांघात्यः, संलापः, परिवर्त्तकश्च

वृत्तिरित्यर्थः। अत्र शृङ्गारत्वेन स्त्रीसंकुलस्य कामोपभोगराहित्येन वीररसत्वेन च कौशिकीतो भेदोऽवगन्तव्यः। नाटयशास्त्रे चैषा परिष्कृत्योक्ता-

'या सखजेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च। हर्षोत्कटा
संहृतशोकभावा सा सात्वती नाम भवेत्त वृत्तिः॥

वागङ्गाभिनयवतो सत्त्रोत्थानवचनप्रकरणेषु। सत्त्वाधिकारयुक्ता विज्ञेया सात्वतीवृत्तिः ॥

वीराद्भुतरौद्ररसा निरस्त शृङ्गारकरुण निर्वेदा।
उद्धृतपुरुषप्राया परस्परधर्षणकृता च॥' इति।

अस्याः चत्वारो भेदाः इति -- उत्थापकः, सांघात्यः, संलापः, परिवर्त्तकश्चेति चत्वारो विशेषा भेदाः।

उत्तेजनकरी शत्रवर्गात्थापक उच्यते

**1.उत्थापकः**- शत्रोः प्रतिपक्षस्य प्रतिनायकस्येत्यर्थः, उत्तेजनकरी उत्साहातिशयजनकक्रोधोत्पादिनी वचनम् उत्थापयति उत्थापको नाम सात्वतीभेद उच्यते। इदमपि परिष्कृत्य --

'अहमवास्यामिएवंतावदर्शयात्मनःशक्तिम्।
इतिसङ्घसमाश्रयमुत्थितमुख्यापको शेयः॥ इति।

उदाहरति- श्रीरामं प्रति रावणप्रेरितस्य वालिन उक्तिरियम्। मया त्वं प्रियदर्शनत्यादानन्दाय विलक्षणसौन्दर्यातिशयात् विस्मयाय च मारयितव्यत्वात् दुःखाय क्लेशाय वा दृष्टोऽसि। तु किन्तु अद्य सम्प्रति तव विनाशहेतौत्वदर्शनेऽवलोकने मम चक्षुषो तृष्णानिवृत्तिः कुतो भवेत्, बहुकालस्थित्तेः सम्भवादिति भावः। तच माङ्गल्येन सम्मेलनेन यत् सुख तस्य विषय आश्रयो नास्मि प्रतिपक्षित्वादिति भावः। तत्तस्मात् वृथा ईदृशैर्व्यर्थकथनैः किं प्रयोजनम्? अपि तु न किमपीत्यर्थः। अस्मिन् अवलोक्यमाने विश्रुतं महावीरत्वेन प्रसिद्धं जामदग्न्यं परशुरामं विजयत इति तस्मिन् तथोक्ते तव बाहौ धनुर्जृम्भतां सङ्ग्रामाय प्रवरत्तताभिति।अन्ये तु परशुरामागमने रामं प्रति जनकस्य वाक्यमिदं- धनुर्भङ्गेन प्रतिज्ञातार्थसिद्ध्या योग्यवरप्राप्त्या चानन्दः। वीर्य्यातिशय- दर्शनाद्विस्मयः। रामं हन्तुं परशुरामागमनात् दुःखम्। अतोऽद्यत्वदर्शने सम्प्रति एतत्क्षणे चक्षुषः कृतो वैतृष्ण्यम्। उत्कण्ठबाहुल्यात् क्षणान्तरेऽनिष्टनिवृत्तौ तु उत्कण्ठानिवृत्या वैतृष्ण्यंस्यादिति सम्प्रतिपदभावार्थः। बहुव्याहृतैर्वा किं यतो माङ्गल्यमुखस्य न विषयोऽस्मि अतोऽस्मिन् विस्मृतस्य जामदग्न्यस्य विजयनिमित्तं तब बाहौ धनुर्जृम्भतामित्यर्थः। अत्र विस्मयवशाद् रामसीन्दर्य्येणानन्दादिना च वैशिष्ट्यम्। अनेन रामस्य जेतुमुतेजनकरणादव उत्थापकः।

**मन्त्रार्थदेवशक्त्यादेः सांघात्यः सङ्घभेदनम्।।**

मन्त्रशक्त्या यथा-मुद्राराक्षसे राक्षससहायानां चाणक्येन स्वबुद्धया भेदनम्। अर्थशक्त्यापि तत्रैव। देवशक्त्या यथा- रामायणे रावणाद्विभीष- णस्य भेदः।

संलापः स्याद्गभीरोक्तिर्नानाभावसमाश्रयः।

यथा वीरचरिते - 'रामः- अयं सः, यः किल सपरिवारकार्त्तिकेयविजया- वर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः। परशुरामः- राम दाशरथे ! स एवायमार्यपादानां प्रियः परशुः। इत्यादि।

प्रारब्धादन्यकार्याणां कारणं परिवर्तकः।

यथा वेण्याम्- 'भीमः - सहदेव! गच्छ त्वं गुरुमनुवर्तस्व। अहमप्यस्त्रागारं प्रविश्यायुधसहायो भवामीति यावत्। अथवा आमन्त्रयितव्यैव मया पाञ्चाली।" इति।

मन्त्रार्थदेवशक्त्यादेः सांघात्यः सङ्घभेदनम्

**2.साङ्घात्यः**- मन्त्रस्य , वित्तस्य, अदृष्टस्य वा शक्तिरःआदिपदात्सहायशक्त्यादयश्च तस्माद्धेतोः सङ्घभेदनं सैन्यसमूहादिसहायानां पृथक्करणं साङ्घात्यो नाम सात्वतीभेदः स्यात्। संघात एव सांघात्यः तथा च रूढिवशाद्विपरीतलक्षणया सङ्घातभेदेऽपि स्थितिः अस्यावगन्तव्या।उदाहृत- राक्षसो मलयकेतुर्मन्त्री। चाणक्यो राजमन्त्री स्वबुद्धया स्वमन्त्रणया। तत्रैव यथा पर्वतकाभरणस्य राक्षसहस्तगमनेन मलयकेतु- सहोत्थायिभेदनम्। अत्र चाणक्यस्य सत्वदानाद्यनेकत्वं संघभेदनवशात् साङ्घात्यः।"

स्याद्गभीरोक्तिर्नाना भावसमाश्रयः

**3.संलापः**- नानाभावानाम् अनेकविधाशयानां समाश्रयः व्यञ्जकतासम्बन्धेनाश्रयीभूतः अनेकविध भावप्रकाशक इत्यर्थः। गभीरा परिपक्वबुद्धिभिरु- न्नेयार्था उक्तार्व्यवहारः, संलापो नाम सात्वती भेदो भवेत्।उदाहरति-- सपरिवारस्य कुमारस्य विजयेन आवर्जि तेन प्रीणितेन। अत्र कौतुकेनेव विजयो न तु वास्तव इति तत्पितृप्रसादगम्यम्। परिवत्सरसहस्रं सहस्रसंख्यकवत्सरपर्यन्तं अन्तेवासिने शिष्यत्वं गतायेत्यर्थः। तथा चापरप्रसादलब्धेन परशुना कोऽयं गर्व इति रामस्य गभीरात्मिका उक्तिः। परशुरामोक्तौ तत्प्रियवस्त्वपि मह्यं प्रदत्तमिति स्वमहत्त्वख्यापनमेव गभीरता । अत्र सपरिवारेत्यादिना त्वं महावीर इति अतिशयोद्यमीति प्रिय इत्यनेन च परशुः नितान्तमुत्कृष्टमिति च द्योतनात् संलापः।

प्रारब्धादन्यकार्याणां कारणं परिवर्तकः

**4.परिवर्तकः**- प्रारब्धात् प्रस्तुतकार्यात् अन्यानि यानि कार्याणि तेषां करणम् आचरणम्, कर्त्तारमिति परिवर्त्तको नाम सात्वतीभेदो भवेत्। उदाहरति- गुरुं युधिष्ठिरम्, अनुवर्त्तस्व अनुसर। आयुधगृहं प्रविश्य आयुधसहायो गृहीतशखः। अत्र प्रारब्धं कार्यं युद्धं ततोऽन्यत्, अथवेत्यादिना पाञ्चाल्यामन्त्रण कार्यकरणात् परिवर्त्तकः।

अथारभटी-

मायेन्द्रजाल संग्रामकोद्भ्रान्तादिचेष्टितैः।।१३२।।
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता।
वस्तूत्थापनसंफेटौ संक्षिप्तिरवपातनम्।।१३३।।
इति भेदास्तु चत्वार आरभटयाः प्रकीर्तिताः।
मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते।।१३४।।

यथोदात्तराघवे--

जीयन्ते जयिनोऽपि सान्द्रतिमिरत्रातैर्वियद्व्यापिभि-
र्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी।
एते चोग्रकबन्धकण्ठ रुधिरैराध्मायमानोदरा
मुञ्चन्त्याननकंदरानलमुचस्तीनान् रवान् फेरवाः।।

इत्यादि।

## आरभटीवृत्तिः-

रौद्रबीभत्सप्रतिपादका आरभटीवृत्तिः

आरभटी लक्षयति इति। क्रमशःसात्वती निरूपणानन्तरम्इत्यर्थः। माया 'असतो मा सद्भावना तथा' इत्युक्तलक्षणा, इन्द्र जालः परस्परविरुद्धनानावस्तुप्रदर्शनं च विस्मयजनकव्यापारविशेष इति यावत्। उक्तं च तल्लक्षणम्-

इन्द्रजालः स्थितार्थस्य मन्त्रचूर्णौषधादिभिः।
अदर्शनमपारोक्ष्यमन्यथाकृतिरुच्यते ॥ इति।

युद्धम्, क्रोधेन उद्भ्रान्तम् अधीरतया कार्यसम्पादनम् आदिपदात् साहसादयश्च तथोक्तैश्चेष्टितैर्व्यापारैःवधवन्धाद्यैः च संयुक्त उग्रावृत्तिः आरम्भेण तुल्या भटा उद्धताः पुरुषा आरभटास्ते सन्त्यस्यामिति आरभटी नाम।

या चित्रयुद्धभ्रमशस्त्रपातमायेन्द्र जालप्लुतिलङ्घिताह्वाया।
ओजस्विगुर्वक्षरबन्धगाढाज्ञेया बुधैः सारभटीति वृत्तिः॥ इति।

तस्या आरभट्याः वस्तूत्थापनम्, सम्फेटः, संक्षिप्तिः, अवपातनः च इति चत्वारो भेदाः प्रकीर्तिताः।

मायया उक्तलक्षणया आदिपदादिन्द्रजालेन च वस्तुपदार्थः यत् उत्थापितं भवति तद्वस्तूत्थापनं

**1.वस्तूत्थापनम्** - मायया उक्तलक्षणया आदिपदादिन्द्रजालेन च वस्तुपदार्थः यत् उत्थापितं भवति तद्वस्तूत्थापनं नाम आरभटीभेद उच्यते। उदाहरति- अकस्मात् प्रकटकारणं विना वियद्व्यापिभिः सान्द्रतिमिरव्रातैः निशीथान्धकारः सर्वाभिभाविनोऽपि वीराः, भास्वन्तो देदीप्यमानाः सकलाः अमीदिनकरस्य हस्ता अपि आच्छादयन्ते इति यावत्। उग्राणां कबन्धानां शिरोहीन शरीराणाम् कण्टरुधिरैः उत्फुल्लमानानि उदराणि येषां ते आध्मायमानोदराः पीयमानरुधिराणां मुखानलेन उष्णत्वाज्जटरदाह इति। अत्र परस्परविरुद्धालौकतिमिरर

विकिरणादिप्रदर्शनरूपमिन्द्रादीनां वस्तूनां माययोत्थापितम्। केवलम् इन्द्रजालोत्थापितं वस्तु यथा-

एष ब्रह्म सरोजेरजनीकरकलाशेखरः शङ्करोयं
दोर्भिर्दैत्यान्तकोसौ सधनुरसिगदाचक्रचिह्नैशचतुर्भिः।
एषोऽप्यैरावतस्थ स्त्रिदशपतिरमी देवि ! देवास्तथान्ये
नृत्यन्ति व्योम्नि चैताश्चचरणरणन्नूपुरा दिव्यनार्यः ॥

**संफेटस्तु समाधातः क्रुद्धसत्वरयोर्द्वयोः।**
**यथा मालत्यां माघवाघोरघण्टयोः।**
**'संक्षिप्ता वस्तुरचना शिल्पेरितस्थापि वा।।१३५।।**
**संक्षिप्तिः स्यानिवृत्ती च नेतुर्नत्रन्तरग्रहः।**
**यथोदयनचरिते कलिञ्जहस्तिप्रयोगः। द्वितीयं यथावालिनिवृत्यासुग्रीवः। यथा वा परशुरामस्यौद्धत्यनिवृत्त्या शान्तत्वापादनम्—पुण्याब्राह्मणजातिः—इति।**
**प्रवेशत्रासनिष्क्रान्तिहर्षविद्रवसंभवम्॥१३६॥**

**2.सम्फेटः -** क्रुद्धौ च तौ सत्वरौ शीघ्रयुक्तौ चेतिकर्मधारयः तयोस्तथोक्तयोरेवान्योन्यं समाघातः प्रहारोक्तिस्तु सम्टो नाम आरभरीभेदः। उदाहरति- मालतीमाधवपञ्चमाङ्के। तत्र हि मालती चण्डिकायैवलीकर्तुमुद्यतमघोरघण्टं समीक्ष्य माधवस्यत्वरितम्- 'अलं दुरात्मन्। अपंहि प्रतिहतोऽसि कापालिकापसद' इति प्रवेशः। तथात्र द्वयोः क्रुद्धता सत्वरता परस्परप्रहारोक्तिश्च स्फुटैव।

संक्षिप्ता वस्तुरचना शिल्पेरितस्थापि वा। संक्षिप्तिः स्यानिवृत्ती च नेतुर्नत्रन्तरग्रहः।

**3.संक्षिप्तिः-** शिल्पः विलक्षणवस्तुनिर्माणकौशलः इतरथाशिल्पातरेण प्रकारेणापि या वस्तुनः पदार्थविशेषस्य संक्षिप्ता रचना निर्माण संक्षिप्तिः भवेत् तथा नेतुरेकस्य नृत्यपात्रस्य निवृत्तौ सत्यां नेत्रन्तरग्रहः भिन्नपात्रत्वेन ग्रहणंबोधश्चसंक्षिप्ति भवेत् भिन्नपात्रत्वेन ग्रहणं च व्यक्तिभेदाद्धर्मभेदाच्च द्विधा भवति। उदाहरति-- तत्र वास्तवहस्तिरूपपात्रनिवृत्तौ शिल्पेन काष्टमयहस्तिन आविर्भावनम्। अत्र शिल्पेन काष्ठमयहस्तिरचनया संक्षिप्तिः। अत्र वालिरूपस्य पात्रस्य निवृत्तौ व्यक्तिभेदेन सुग्रीवरूपपावस्थावगमात् संक्षिप्तिः।

**अवपातनमित्युक्तं –**
**यथा कृत्यरावणे षष्ठेऽङ्के-'( प्रविश्य खड्गहस्तः पुरुषः )' इत्यतः प्रभृति निष्क्रमणपर्यन्तम्।**

**- पूर्वमुक्तैव भारती।**

**अथ नाटयोक्तयः-**
**अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्॥१३७।।**
**सर्वभाव्यं प्रकाशं स्यात्तद्ध्रुवेदपवारितम्।**

रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते॥१३८॥

प्रवेशः, त्रासो भीतिः, निष्कान्तिः,उत्सवः, पलायनश्च तेभ्यः सम्भवति स्पर्द्धनमिति शेषः, अवपातनम्

**4.अवपातनम्**- प्रवेशः, त्रासो भीतिः, निष्कान्तिर्निष्क्रमणम्,हर्ष उत्सवः, विद्रवः पलायनश्च तेभ्यः सम्भवति यत्तत्तथोक्तं स्पर्द्धनमिति शेषः, अवपातनं नाम आरभटीभेदान्तरमभिहितं नाट्यविद्भिरिति शेषः। उदाहरति- तेन पुरुषेण सर्वमिदं कृतम्। यथा च रत्नावल्याम्-

'कण्ठे कृत्वावशेष कनकमयमधः श्रृङ्घलाम कर्षन्
क्रान्त्वा द्वाराणि हेलावलचरणवलत्किङ्किणी चक्रवालः।
दत्तातङ्को गजानामनुसृतसरणिः सम्भ्रमादश्वपालैः
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरातः।।

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः

**भारतीवृत्तिः**- 'भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयःइति अर्थः। स्थापककृत्यप्रसङ्गेन प्रागुक्तेनेत्यर्थः। सा च सर्वसाधारण्येनेत्युक्तं रथे सर्वत्र भारतीति। अथ नाय इति। नाट्यपरिभाषाविशेष इत्यर्थः। यत्तु वस्तु वाक्यम् अश्राव्यम् अन्यस्य श्रवणायोग्यम् इह दृश्यकाव्ये तद्वाक्यं स्वस्मिन्नात्ममात्रे प्रत्यक्षत्वेन स्थितमिति स्वगतं मतम्। आत्मात्मीय ज्ञातिधनवाचिनोऽपि स्वशब्दस्येहात्मवाचित्वमेव ग्रहणं बोध्यम्। तथा च आत्मगतमित्यस्यैव नामान्तरमिदम्। सर्वैः श्राव्यं श्रवणयोग्यं यद्वस्तु तद् सर्वेषु प्रकाशते, परावृत्य स्थानान्तरं गत्वा परस्य जनस्य समक्षे यत्तु रहस्यं गोपनीयम् अन्यैरकथनीयमित्यर्थः वस्तु प्रतिपाद्यते तत् अवपारितं स्थानान्तरं गत्वान्यजनस्य श्रवणो बाधिकमिति अवपारितं नाम भवेत् परावृत्यान्यस्य श्रवणयोग्यं रहस्यकथनम् अपवारितमित्यर्थः।

## Summarised Overview

सन्धेः पञ्च प्रकाराः सन्ति। अथैषां लक्षणानि यथाक्रममुपपादयितुं। तथा च आरम्भ अवस्थायुक्तः इतिवृत्ताद्याभासो मुखसन्धि, यत्नयुक्तः प्रतिमुखसन्धिः, प्रास्याशायुक्तो गर्भसन्धिः, नियताप्तियुक्तो विमर्शसन्धिः, फलागमयुक्तः उपसंहृतिः निर्वहणसन्धिः इत्यर्थः। तथा च यथोद्देशमित्यस्य सुखं प्रतिसुखं गर्भः इत्यादि नाम कीर्त्तनक्रमश इत्यर्थः। अत्र मुखसन्धेर्द्वादशाङ्गानि प्रतिपादयत- उपक्षेपः, परिकरः, परिन्यासो, विलोभनम् , युक्तिः, प्राप्तिः, समाधानं, विधानं, परिभावना, उभेदः, करणं, भेद एतानि। वै शब्दः पादपूरणे मुखे मुखसन्धौ इत्यर्थः। प्रतिमुखसन्धेत्रयोदशाङ्गानि दर्शयति- विलासः, परिसर्पः, विधुतं, तापनं, नर्म, नर्मद्युतिः, प्रगमनं,विरोधः, पर्युपासनं,पुष्पं, वज्रं,उपन्यासः, वर्ण संहार इत्यपि। गर्भसन्धेः त्रयोदशाङ्गानि निरूपयति। अभूतहरणं, मार्गं, रूपं, उदाहरणं, क्रमं, सङ्ग्रहं अनुमानं, प्रार्थना, क्षिप्ति, त्रोटकं, अधिबलं, उद्वेगं, विद्रवम् इत्यादि। विमर्शसन्धेयोदशाङ्गानीति अपवादं, संफेटं, व्यवसायं, द्रवं, द्युति, शक्ति, प्रसङ्गं, खेदं,प्रतिषेधं, विरोधं, प्ररोचनं, आदानं, छादनम्। निर्वहणसन्धेः चतुर्दशाङ्गानि- संहारे निर्वणाख्या परनामकोपसंहारसन्धौ सन्धिर्विबोध इत्यादीनि चतुर्दशाङ्गानि नामतो बोध्यानीत्यर्थः। नाटकवृत्तीः प्रदर्शयितुं इति ,शृङ्गारप्रतिपादिका वृत्तिः कौशिकीत्यर्थः। वीरप्रतिपादिका वृत्तिः सात्वतीत्यर्थः। रौद्रबीभत्सप्रतिपादिका वृत्तिः आरभटीत्यर्थः। सर्वत्र अन्येषु रसेषु भारती नाम वृत्तिः स्यात्।

# Assignments

1. संस्कृतनाटके पञ्चसन्धीनां लक्षणं स्वरूपं च विशदयत।
2. नाटके वृत्तीः प्रतिपादयत।
3. मुखसन्धेः अङ्गानि विशदयत ।

# Suggested Readings


1. कविराजद्विजेन्द्रनाथशास्त्री, संस्कृतसाहित्यविमर्शः, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन वाराणसी।
3. T.K.Ramachandra Iyer, A Short History of Sanskrit Literature, R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018.
4. Dr. Kapildev Dwivedi, Samskrithanibanthasathakam, Viswavidyalaya Varanasi.
5. Acharya Lohamani dahala, Samskrita sahitya ithihasam, Chaukhambha, krishnadasa Accadami, Varanasi


# References


1. Acharya Krishna mohan Sastri, Sahityadarpanam, Chaukhambha Samskrita Samsthan, Varanasi.
2. Devadetta Kausika, Sahityadarpanam Ed., Bharathiyavidyaprakasan, NewDelhi.
3. Saligramasastri, Sahityadarpanam Ed., Motilal Banarsidass, New Delhi.


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# साहित्यदर्पणम् परिच्छेदः - 6 (भाषाविभागः)

## Learning Outcomes

- संस्कृतसाहित्ये भाषायाः स्वाधीनं अवगच्छति।
- संस्कृतभाषायाः उत्पत्तिं ज्ञायते।
- विविधभाषायाः शैलीं, प्रयोगं च जानाति।

## Background

प्रकृतेः आगतं प्राकृतम्। अत्र प्रकृतिशब्देन वैदिकभाषा संस्कृतभाषा वा ग्राह्या। वैदिकभाषाया एवं प्राकृतभाषायाः उद्भवो विज्ञायते। लोकभाषा शिष्टभाषाप्रयैव परिलक्ष्यते। प्राकृतभाषा लोकभाषा, या च शिष्टभाषारूपेण वैदिकभाषामेव- आश्रयते। प्रकृत्तिशच्दैनः जनसाधारणो गृह्यते, तन्मूला भाषा प्राकृतभाषेति केषांचिन्मतम् ।

प्राकृतभाषा त्रिधा विभज्यते। 1. प्राचीन -प्राकृतं पाली- भाषा वा। तत्र तृतीय शताब्दी ईसवीयपूर्वाद् आरभ्य द्वितीय शताब्दी ईसवीयं यावत् प्राप्ताः शिलालेखाः, 'पालीभाषाग्रन्थाः, महावंश- जातकादयो बौद्धग्रन्थाश्च संगृह्यन्ते। 2. मध्यकालीन- प्राकृतम्। तत्र माहाराष्ट्री, शौरसेनी, मागधी, जैनग्रन्थानां भाषा अर्धमागधी, पैशाची च भाषा गृह्यन्ते। 3. परकालीन- प्राकृतम्। तत्रापभ्रंशः संगृह्यते।

प्राकृतेषु माहाराष्ट्री प्राकृतं सर्वोत्कृष्टं गण्यते।उक्तं च दण्डिना काव्यादर्शे (१.३५) 'महाराष्ट्रात्रयां भाषा प्रकृष्टं प्रकृतं विदुः। नाटकेषु पद्यरचना महाराष्ट्री प्राकृते एव प्राप्यते। गउडवहो- प्रभृतिकाव्यं माहाराष्ट्री भाषावामेवोपलभ्यते। शौरसोनी- प्राकृतं मथुरासमीपवर्ति शूरसेन- प्रदेशे प्रायुज्यत। तस्मादेव हिन्दी भाषोत्पत्तिः। नाटकेषु इदमेव प्राकृतं प्राधान्येन प्रयुज्यते। मागधी प्राकृतं पूर्व-विहारस्य मगधदेशे प्रायुज्यत।

संस्कृत प्राकृतयोर्महत् साम्यम् अङ्गीक्रियते। संस्कृतभाषावत् प्राकृतेऽपि सैव वर्णमाला, तथाविध एव सन्धिविचारः, शब्दरूपाणि, धातुरूपाणि, कृत्तद्धितादिप्रत्ययाः, स्त्रीप्रत्ययाः, समासादिकं च सममेव दृश्यते। एकस्मात् कारणादेव प्राकृतभाषा, सारल्येन संस्कृतभाषायाम् अनुवक्तुं पार्यते।

## Keywords

संस्कृतभाषा, महाराष्ट्री, वैदर्भीभाषा, अर्धमागधी, सौरसेनी, आभीरीभाषा, पैशाची, गौडीया, शाबरीभाषा, द्राविडी, आभीरी।

## Discussion

अथ भाषाविभागः--

**पुरुषाणामनीचानां संस्कृतं स्यात्कृतात्मनाम् ।।१५८।।**

**सौरसेनी प्रयोक्तव्या तादृशीनां च योषिताम्।**
**आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्।।१५९।।**

**अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम्।**
**चेटानां राजपुत्राणां श्रेष्ठानां चार्धमागधी।।१६०।।**

**प्राच्या विदूषकादीनां धूर्तानां स्यादवन्तिजा**
**योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्॥१६१॥**

**शबराणां शकादीनां शाबरीं संप्रयोजयेत्।**
**बाह्लीकभाषोदीच्यानां द्राविडी द्राविडादिषु।।१६२।।**

**आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु।**
**आभीरी शावरी चापि काष्टपत्रोपजीविषु॥१६३।।**

**तथैवाङ्गारकारादौ पैशाची स्यात्पिशाचवाक्।**
**चेटानामप्यनीचानामपि स्यात्सौरसेनिका॥१६४॥**

वक्तृविशेषस्य भाषाविशेष इत्यर्थः। महर्षिणा चात्र विशेषो दर्शितः। तथा च-

मागध्यवन्त्यजा प्राच्या सूरसेन्यर्धमागधी।
बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्त्तिताः॥ इति।

अत्र रुद्रस्तु प्राकृतसंस्कृतमागधपिशाचभाषाश्च सूरसेनी च।

षष्ठोऽत्र भूरिभेदो देश विशेषादपभ्रंशः इत्याह।

पुरुषाणां संस्कृतं नाम भाषा भवेत्

अत्र दृश्यकाव्ये अनीचानां नीचेतरेषामुत्तममध्यमानाम् कृतात्मनां पण्डितानां शिक्षितात्मनामित्यर्थः पुरुषाणां संस्कृतं नाम भाषा भवेत्। अत

नाटके विभिन्नकथापात्राणां भाषा विविधाः

एव शकुन्तलादौ कृतात्मनां दुष्यन्तादीनामुत्तमानां कृतात्मनांतत्सारथ्यादीनां च मध्यमानां संस्कृतम्। तत्रैव राजपुरुषस्य शिक्षितत्वेऽपि नीचत्वात् न सं स्कृतम्। तादृशीनाम् अनीचानां कृतात्मनां च योषितां स्त्रीणां सौरसेनी नाम भाषा कार्या। आसामुक्तप्रकाराणां योषितामेव तु गाथासु श्लोकेषु महाराष्ट्री भाषां प्रयोजयेत् इति। राजान्तःपुरचारिणां वामनादीनां मागधी भाषा उक्ता नाटयविद्भिरिति। राजसेवकानां राजपुत्रा श्रेष्ठानां राजवैश्यानां च अर्धमागधीभाषा उक्तेत्यत्रान्वयः। एवमग्रेऽपि। विदूषकस्य आदिपदात् राजसुतोपमात्रादीनां प्राच्या गौडीया भाषा। धूर्तानामसदेवनानाम् अवन्तिजा भाषा अवन्तदेशोत्पन्ना भाषा। दीव्यतां खेलनतत्पराणां योधनागरिकादीनांयोद्धृनागरिक पौरादीनां दाक्षिणात्या वैदर्भीभाषा। शबराणां पर्वतीयभिल्लानां किरातानामित्यर्थः,शकयवनादीनां च शावरी भाषां सम्प्रयोजयेत्। उदीच्यानां नागप्रभृतिजातीनां बाह्लीक भाषा। द्राविडादिषुतत्पात्रेषु द्राविडी भाषा। आभीरेषु ब्राह्मणादुग्रकन्यायामुत्पन्नेषु जातिविशेषेषु आभीरीभाषा। पुक्कसादिषुचाण्डालविशेषेषु चाण्डालीभाषा। काष्टोपजीविषु तक्षकादिषु आभीरीभाषा पत्रोपजीविषु चावि शाबरीभाषेति यथाक्रममन्वयः। अङ्गारकारजातौ लोहादिधातुजीवजातौआदिपदात् चर्मकार जात्यादौ च तथैवआभीरी शावरी वा भाषा। पिशाचानां देवयोनिविशेषाणां वाग् भाषा पैशाची भवेत्। अनीचानामुत्तममध्यमाधमानां सेविकानामपि सौरसेनिका भाषा भवेत्। बालानां नपुंसकानां अधमदैवज्ञानाम् उन्मत्तानां विक्षिप्तानां आतुराणाञ्च सा सौरसेनी एव भाषाभवेत्क्काचित्कं संस्कृतमप्यमीषाम्।

**बालानां षण्डकानां च नीच ग्रहविचारिणाम्।**
**उन्मतानामातुराणां सैव स्यात्संस्कृतं क्वचित्।।१६५।।**

**ऐश्वर्येण प्रमत्तस्य दारिद्रयोपहृतस्य च।**
**भिक्षु वल्कधरादीनां प्राकृतं संप्रयोजयेत्॥१६६॥**

**संस्कृतं संप्रयोक्तव्यं लिङ्गिनीषूत्तमासु च।**
**देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम्।।१६७।।**

**कार्यतश्चोत्तमादीनां कार्यो भाषाविपर्ययः।।१६८।।**

**योषित्सखीबालवेश्याकितवाप्सरसां तथा।**
**वैदग्ध्यार्थ प्रदातव्यं संस्कृतं चान्तरान्तरा।।१६९।।**

ऐश्वर्येण धनमदेन प्रमत्तस्य दारिद्र्यण उपस्कृत्य वैकृत्यमापन्नस्य भिक्षोः लिङ्गिनः वल्कलधरस्यवृक्षत्वग्धारिणः परिव्राजकस्यदिपदात् बौद्धपरिव्राजकादेव प्राकृतं सौरसेन्यादि द्राविटीपर्यन्तानां अन्यतमं महाराष्ट्री वा संप्रयोजयेत्। लिङ्गिनीषु सन्यासादि चिह्नधारिणीषु

उत्तमासु उच्चजातीयासु च निरीषुकविभिः स्वेच्छया संस्कृतं सम्प्रयोक्तव्यम्। कैश्चित् नाट्यविद्भिः देवी महिषी अमात्यपुत्री वाश्या च तास्वपितथा संस्कृतं सम्प्रयोक्तव्यम् अभिहितम्। नीचपात्रं तनतुवायादिकंयद्देश्यं, तस्य भाषितं तद्देश्यीयम्। अपि च कार्यतः प्रयोजनविशेषवशात् उत्तमादीनां नायिकादीनां नारीणां भाषाविपर्ययः पूर्वोक्तभाषाव्यत्यासः कर्तव्यः उत्तमस्य राजान्तपुरःचारित्वे मागधी न तु संस्कृतम् अत एव अनर्घराघवादौ राजपुत्रस्यापि रामचन्द्रादेरुत्तमकार्य विधायित्वेन संस्कृतेनैव व्यवहारो वर्णितः न अर्धमागध्या। तथा वैदग्ध्यार्थंवैचित्र्यविशेषज्ञापनार्थ कविना योषिन्नायिका सखी नायिकायाः सहचरी बालो राजपुत्रादिः वेश्या उत्कृष्टवारयोषित् कितवो धूर्तः, अप्सरसश्च तासां तथोक्तानाम् अन्तरा अन्तरा तत्तद् भाषाणां मध्ये संस्कृतं प्रदातव्यम्। तत्र मालतीमाधवे मालत्या योषितो यथा- ज्वलतु गगने रात्रिः इति। तत्रैव सख्युः लवङ्गिकया यथा वयं तथा नाम इत्यादि। अनर्धराधवे यथा बालस्य रामस्य। मृच्छकटिके वसन्तसेनायाबेश्याया यथा गर्ज वा वर्ष वा इत्यादि। भाषाविशेषाणामित्यर्थः। आकरेषु महाकवि प्रबन्धेषु बोधव्यानि।

भाषालक्षणानि, भाषार्णवे तन्निर्मितस्वप्रबन्धे अवगन्तव्यानि।

## Summarised Overview

वक्तृविशेषस्य भाषाविशेष इत्यर्थः। नीचम् अधमं, मध्यमाभ्यां पात्राभ्यां कल्पितः प्रयोजितः संस्कृतप्राकृतात्मकः सङ्कीर्णमिश्रः स्यात्। तथा च एकजातीयपात्रप्रयुक्तत्वेन शुद्धत्वम्, विभिन्नजातीयपात्रप्रयुक्तत्वेन सङ्कीर्णत्वं इत्यवगन्तव्यम्। इदमत्र बोध्यम् विष्कम्भके पात्राणां संस्कृतभाषितवस्य च मध्यमपात्राणां हि प्राकृतभाषित्वम्। तदुक्तं भाषार्णवे- वि'भाषा मध्यमपात्राणां नाटकादौ विशेषतः। महाराष्ट्री शौरसेनीत्युक्ता भाषा द्विधा बुधैः।

## Assignments

1. संस्कृतसाहित्ये भाषायाः स्वाधीनं महत्वं च प्रतिपादयत।
2. संस्कृत- प्राकृत भाषयोः साधर्म्यं वैधर्म्यं च विशदयत।
3. भाषायाः उत्पत्तिं विकासं च निरूपयत।

## Suggested Readings

1. कविराजद्विजेन्द्रनाथशास्त्री, संस्कृतसाहित्यविमर्शः, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन वाराणसी ।
3. T.K.Ramachandra Iyer, A Short History of Sanskrit Literature, R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018.
4. Dr. Kapildev Dwivedi, Samskrithanibanthasathakam, Viswavidyalaya Varanasi.
5. Acharya Lohamani dahala, Samskrita sahitya ithihasam, Chaukhambha, krishnadasa Accadami, Varanasi

## References

1. Sahityadarpanam, Acharya Krishna mohan Sastri, Chaukhambha Samskrita Samsthan, Varanasi.
2. Sahityadarpanam, Ed. Devadetta Kausika, Bharathiyavidyaprakasan, NewDelhi.
3. Sahityadarpanam, Ed. Saligramasastri, Motilal Banarsidass, New Delhi.

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# साहित्यदर्पणम् परिच्छेदः – 6 (प्रकरणम्)

## Learning Outcomes

- रूपकाणां परिचयः भवति।
- रूपकभेदान् जानाति।
- प्रकरणं अधिकृत्य सामान्यपरिचयं लभते।

## Background

भारतीयसंस्कारे वेदानां महान् प्रभावो विद्यते। 'इतिहासपुराणेषु वेदार्थमुपबृंहयेत्' इति ब्रह्माण्डपुराणे उक्तम्। वैदिकानाम् आशयानां प्रपञ्चनम् इतिहासपुराणेषु क्रियते च। तेषामाशयानामधिकतया प्रचारः काव्यनाटकादिभिः उद्दिष्टमासीत्। ततः रूपकरचनायै इतिहासप्रसिद्धमेव इतिवृत्तं मुख्यतया स्वीक्रियते स्म। यद्यपि कवीनां स्वेच्छानुसारेण अन्येषामितिवृत्तानां स्वीकरणे स्वातन्त्र्यमासीत्ततोऽपि इतिवृत्तस्वभावः, नायिकानायकयोः प्रकृतिः, मुख्यो रसः, अङ्कानां संख्या चेत्यादिकमाधारीकृत्य रूपकाणां दशधा विभागः कृतः। तदुक्तं दशरूपके –

" नाटकं सप्रकरणं भाणः प्रहसनं डिमः।

व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति॥"(द.रू. 1.8) इति।

सर्वेषां रूपकाणां मूलं नाटकमेव; नाटके नानारसानां अङ्गाङ्गिभावेन प्राचुर्यं विद्यते; रूपकाणां सम्पूर्णलक्षणं नाटक एव विद्यते। एभिरेव हेतुभिः नाटकस्य प्रामुख्यं सर्वैरङ्गीकृतं वर्तते। एवं दशसु रूपकेषु मध्येप्रामुख्यं भजतो नाटकस्य प्रारंभः परिसमाप्तिश्च मङ्गलपूर्वको भवितव्य इत्यपि व्यवस्था क्रियते।नाटकारंभे रङ्गविघ्नोपशमाय नान्दी कार्या। तत्र प्रयुज्यमानो मङ्गलात्मकः श्लोकः भवति 'नान्दी'। नाटकान्तेविश्वशान्त्याशंसापूर्वकं प्रायः नायकेनैव प्रयुज्यमानं आशंसावाक्यं भवति 'भरतवाक्यम्'। प्रायेण नाटकेषुनान्दीपाठानन्तरं सूत्रधारः प्रविशति। नाटके अभिनीयमानायाः कथायाः सूचनां करोति सूत्रधारः। नटैःक्रियमाणेन चतुर्विधाभिनयेन सहैव नृत्तगीतवाद्यरूपस्य तैर्यत्रिकस्य च समञ्जससन्निवेशोऽपि नाटके विद्यते।ततः, नाटके न केवलं नाट्यवस्तुनः सम्यगवधारणाय, अपि तु नानारूपाणां कलानामास्वादनायाप्यवसरोविद्यत इत्यतः 'काव्येषु नाटकं रम्यम्' इति सहृदयसम्मतिरजायत। इतिहासप्रसिद्धं इतिवृत्तं चाधिकारिकं कर्तव्यम्। "नाटकं ख्यातवृत्तं स्यात्" इति सिद्धान्तयन्

आचार्यविश्वनाथोऽपि नाटकस्येतिवृत्तंइतिहासपुराणादिषु प्रसिद्धमेव भवितव्यमिति स्पष्टयति। वैदिकानामाशयानां जनहृदयेषु सङ्क्रमणं, तद्वाराजनानां मोक्षमार्गनिदेशनञ्च काव्यानां लक्ष्येषु मुख्यतया गण्येते। नायकस्य रसस्य वा विरुद्धं किमपि तत्र न स्यात्। तदर्थं इतिवृत्ते परिवृत्तिं कर्तुं कवेरधिकारोऽस्ति। कथावस्तु पूर्णतयैव मनसि कृत्वा इतिवृत्तं पञ्चसन्धिषुविभज्य च नाटके वस्तुप्रपञ्चनं कार्यमिति निष्कर्षः।

## Keywords

नाटकम्, प्रकरणम्, इतिवृत्तम्, सूत्रधारः, दृश्यकाव्यम्, नायिकालक्षणम्।

## Discussion

### प्रकरणम्

स्पष्टान्युदाहरणानि।

एतदेव यदा सर्वैः पताकास्थानकैर्युतम्॥२२३॥

अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे।

एतदेव नाटकम्। यथा - बालरामायणम् ।

अथ प्रकरणम्--

भवेत्प्रकरणे वृत्तं लौकिकं कविकल्पितम् ॥२२४॥

शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सापायधर्मकामार्थपरो धीरप्रशान्तकः।।२२५।।

विप्रनायकं यथा मृच्छकटिकम्। अमात्यनायकं मालतीमाधवम् । वणिङ् नायकं पुष्पभूषितम्।

नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः।।२२६।।

कितवद्यूतकारादिविटचेटक संकुलः।

कुलस्त्री पुष्पभूषिते। वेश्या तु रङ्गवृत्ते। द्वे अपि मृच्छकटिके। अस्य।। नाटकप्रकृतित्वाच्छेषं नाटकवत्।

प्रकरणं निरूपयत-

नाटकप्रकरणात् महानाटकाख्यं नाटकप्रभेदं निरूपयति। यदा–

सहसैवार्थ सम्पत्तिर्गुणवत्युपचारतः।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ।।

दशाङ्कयुक्तनाटकत्वमेव महानाटकत्वम्

इत्यादिभिरुक्तैः चतुर्भिः पताकास्थानकैः दशाभिः अङ्कैः च युतं भवेत्, तदा धीरा बुद्धिमन्तो जनाः तत् महानाटकमिति सूचितम्। एवं च पताकाचतुष्टययुक्तत्वे सति दशाङ्कयुक्तनाटकत्वमेव महानाटकत्वमिति लक्षणं फलितम्। नाटकप्रकरणभागादयो ये रूपकोपरूपकप्रभेदास्तत्र साङ्गोपाङ्गनाटक लक्षणमभिधाय उद्देशक्रमात्प्रकरणाख्यं द्वितीयरूपकं निरूपयिति। नाटकलक्षणानन्तरं प्रकरणं निरूप्यते इत्यर्थः। प्रकर्षेण क्रियते नेता फलं वस्तु वा व्यस्तसमस्ततयाऽत्रेति प्रकरणं तस्मिन् प्रकरणे तत्संज्ञके दृश्यकाव्ये वृत्तं तन्नाट्यवर्णनीय नायकचरितम्, लोकमात्रप्रसिद्धं मर्त्यलोकसम्भव योग्यं, अत एव कविकल्पितंस्वप्रतिभामात्रेण निर्मितं न तु नाटकवत् पुराणादिप्रसिद्धम् भवेत् तथाचोक्तं महर्षिणा –

प्रकर्षेण क्रियते नेता फलं वस्तु वा व्यस्तसमस्ततयाऽत्रेति प्रकरणम्

यत्र कविरात्मबुद्धया वस्तु शरीरं नायकं चैव।
औत्पत्तिकं प्रकुरुते प्रकरणमिति तद् बुधर्ज्ञेयम्॥ इति।

शृङ्गाररसोऽङ्गी मुख्यो भवेत्

शृङ्गाररसोऽङ्गी मुख्यो भवेत् न तु नाटकवत् वीररसोऽप्यङ्गी भवेत्। नायकस्तु विप्रो ब्राह्मणवर्णः अमात्योब्राह्मणातिरिक्तोऽपि राजसचिवः, अथवा वणिक् वैश्यः, सापाया विचारशालिनो ये धर्मकामार्थाः तत्परस्तेष्वासक्तः, न तु मुक्तितत्परः, धर्मस्य स्वर्गसाधनत्वेन कामस्य पुत्रपश्वादिविषयकत्वेन, अर्थस्य भोगसाधनत्वेन सापायत्वं बोध्यम्। तथा धीरप्रशान्तकः सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् इति पूर्वलक्षितधीरप्रशान्त लक्षणयुतो भवेत्। तथा च कविकल्पितलौकिकवृत्तान्तजन्यत्वं सति विनाशशालि धर्मार्थकाम तत्परधीरप्रशान्त कविप्रामात्य वणिगन्यतम नायकवत् श्रृङ्गारसप्रधान दृश्यकाव्यत्वंप्रकरणत्वमिति सामान्यलक्षणं फलितम्। अत्र सापायपदोपादानात् प्रकरणे धर्मादीनामपाय उपत्यसनीय एवेति बोधितम। उदाहरति- विप्रेति। अमात्य नायकमित्यमात्यपदं तत्पुत्रस्योपलक्षणं तेन माधवस्थानात्य पुत्रत्वेऽपि न चतिः। एवं चमूलेप्युपलक्षणं बोध्यम्। पुष्पभूषितमिति प्रकरणविशेषः ।अथ प्रकरणभेदं दर्शयति- क्वापि, कुत्रापि प्रकरणे कुलस्त्रि, नायिका क्वापि वेश्य सः अस्य जीवनमिति वेष्या

तत्विशेषो गणिका। यदुक्तम्--

आभिरन्यर्थिता वेश्या रूपशीलगुणान्विता।
लभते गणिकाशब्दं स्थानं च जनसंसदि इति।

नायिका क्वचिच्च द्वयं कुलजा वेश्ये द्वे अपि नायिके उपलभ्येते इति शेषः। तथा चैनमेव परिष्कृत्योक्तम्

काव्येन्दुप्रकाशे-

शुद्ध पूर्ण मिश्रमिति भेदात्रिविधं पुनः।

कुलस्त्रीनायिका शुद्धं गणिकानायिका परम् ॥
प्राधान्यमुभयोर्यत्र मिश्रं प्रकरणं विदुः ।।इति ॥

शुद्ध पूर्ण मिश्रमिति भेदा त्रिविधं पुनः

अनयोर्भाषाविषये तु मन्दारमरन्दे –तत्र वेश्या प्राकृतं तु कुलजा संस्कृतं वदेत्। इति तेन नायिकाभेदेन तस्यप्रकरणस्य त्रयो भेदाः प्रकारा भवन्ति। तत्र तेषु भेदेषु मध्ये तृतीय भेदा उभयनायिकावत् प्रकरणमित्यर्थः,कितवो धूर्त्तः द्यूतकरादयः तथा विटः चेटश्चपूर्व लक्षितः तैः सङ्कुलो व्याप्तः।अस्य प्रकरणस्य नाटकप्रकृत्वादिति। यन्न समग्राङ्गोपदेशः सा प्रकृतिः इति जैमिन्युक्त लक्षणेन नाटकेसर्वाङ्गोपदेशात् प्रकृतित्वेन तत एवातिदेशविधानात् प्रकरणादौ सन्ध्यङ्गनाटकलक्षणादिकमवशिष्टं नाटकदेवज्ञेयमित्यर्थः। तथा च उक्तम्- 'विना विशेषं सर्वेषां लक्षम नाटकवन्मतम्।'इति।

## Summarised Overview

रूपकाणां भेदपरिकल्पने नायकभेदाः अपि हेतवः। नेता नाम नायकः। सः विनयान्वितः प्रियदर्शनः, त्यागशीलः, क्षिप्रकारी, प्रियभाषी, लोकप्रियः, संशुद्धः, मितं सारञ्च वदन्, प्रख्यातवंशः, स्थैर्योपेतः, यौवनयुक्तः, स्थिरः (मनेवाक्कर्मभिः अचञ्चलः), उत्साहयुक्तः, स्मरणशक्तिसमेतः, प्रज्ञाशाली, कलापरः, अभिमानी च भवितव्यः। नायकाः चतुर्विधाः। धीरललितः, धीरशान्तः, धीरोदात्तः, धीरोद्धतश्चेति। त्रिविधाः नायिकाः।

नायिकालक्षणमुच्यते- "स्वान्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा।" (दशरू. 2.25) तद्गुणेति यथोक्तसंभवे नायकसामान्यगुणयोगिनी नायिकेति विवृतिरत्र दत्ता। सा च स्वस्त्री परस्त्रीसाधरणस्त्रीति त्रिविधा। आसु स्वस्त्री मुग्धा, मध्या, प्रगल्भा इति त्रिप्रकारा। परकीया विवाहिता, अविवाहिता चेति द्विप्रकारा। साधारणस्त्री इत्यनेन गणिका एवोक्ता। उक्तमेतत् –

"साधारणस्त्री गणिका कलाप्रागल्भ्यधैर्ययुक्" (द.रू.2.23) इति।

## Assignments

1. प्रकरणे नायकस्य लक्षणं भेदं च विशदयत ।
2. प्रकरणे नायिकायाः स्वाधीनं परामर्शयत ।
3. साहित्यदर्पणानुसारं प्रकरणं विशदयत।

## Suggested Readings


1. कविराजद्विजेन्द्रनाथशास्त्री, संस्कृतसाहित्यविमर्शः , भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. डा.उदयशंकर् झा, संस्कृतनिबन्धमञ्जूषा, चौखम्बा, सुरभारती प्रकाशन वाराणसी ।
3. T.K.Ramachandra Iyer**,** A Short History of Sanskrit Literature, R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018.
4. Dr. Kapildev Dwivedi**,** Samskrithanibanthasathakam**,** Viswavidyalaya Varanasi.
5. Acharya Lohamani dahala, Samskrita sahitya ithihasam, Chaukhambha, krishnadasa Accadami**,** Varanasi


## References


1. Acharya Krishna mohan Sastri, Sahityadarpanam, Chaukhambha Samskrita Samsthan, Varanasi.
2. Devadetta Kausika, Sahityadarpanam, Ed. Devadetta Kausika, Bharathiyavidyaprakasan, NewDelhi.
3. Saligramasastri, Sahityadarpanam, Ed. Saligramasastri, Motilal Banarsidass, New Delhi.


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# साहित्यदर्पणम् भागः 3

# BLOCK -3

UNIT 1

# साहित्यदर्पणम् परिच्छेदः- 6 (भाणं,व्यायोगः,समवकारः)

## Learning Outcomes

- नाटकप्रकरणादिरूपकभेदान् अधिकृत्य विस्तरेण ज्ञायते।
- संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।
- नाट्यप्रयोगपरिचयः प्राप्नोति।
- नाटकप्रभृतीनां आस्वादनाय क्षमतोत्पादनम्।

## Background

काव्यं दृश्यं श्रव्यं चेति द्विविधम्। तत्र तत् 'श्रव्यम्' इत्युच्यते यत्र श्रवणमात्रं सम्भवति न पुनः दर्शनम्। तस्मादत्र श्रोत्रेन्द्रियमात्रस्य प्रवृत्तिः। श्रवणस्य सद्भावात् काव्यमिदं श्रव्यम्। यत्र पुनः श्रवणं दर्शनं च सम्भवति तत् दृश्यम् इत्युच्यते। इदं च नटैः अभिनीयते इति अभिनेयम् इत्यप्युच्यते। नटादौ रामदेः स्वरूपस्य अरोपात् अस्य रूपकं इति पदेनापि व्यवहारः। तदुक्तं - 'तद्रूपारोपात्तु रूपकम्'(साहित्यदर्पणं ६.१)। दशरूपकाणि सन्ति। तदुक्तं-

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।

साहित्यदर्पणे विश्वनाथः रूपकाणां दश प्रधानप्रभेदान् निर्दिशति– ते च नाटकं, प्रकरणम्, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः च। क्रमभेदेन धनञ्जयविरचिते दशरूपकनामके ग्रन्थेऽपि रूपकस्य एते भेदाः उद्दिष्टाः सन्ति। अत्र नाटकमिति दृश्यकाव्यस्य प्रथमः प्रभेदः। प्रकरणमित्यादयः अन्ये प्रभेदाः। अत्रापि नाटकाख्ये प्रथमप्रभेदे दृश्यकाव्यसंबन्धिनः सर्वेऽपि अंशा उपदिश्यन्ते। तस्मात् सा प्रकृतिः। अन्येषु च विशेषमात्रम्। तस्मात् सा सर्वापि विकृतिः। क्रमेण एतेषां निरूपणं विधीयते- प्राचीनतादृष्ट्या भाणस्यापि स्थानं नाटकवत् प्रतिष्ठितम्। धूर्तस्य नायकस्य चरितम्, एक एवाङ्क, हास्यरसस्य प्राधान्ये सत्यपि सौभाग्यशौर्यादिवर्णनया शृङ्गारवीररससूचना, भारतीवृत्तिः च भवति। भाणग्रन्थेषु वररुचेः उभयाभिसारिका, शूद्रकस्य पद्माप्राभृतकम्, ईश्वरदत्तस्य धूर्त्तविटसंवादः, वामनभट्टबाणस्य शृङ्गारभूषणम्, वरदाचार्यस्य वसन्ततिलकं, साहित्यदर्पणोक्तः लीलामधुकरः च इत्येवमादयो ग्रन्था स्मर्यन्ते। अथ व्यायोगः– व्यायोगनामकरूपकप्रभेदसाहित्यमपि संस्कृते न दुर्लभम्। व्यायोगे प्रसिद्धम् इतिवृत्तं, स्त्रीपात्रविरहा, बहुपुरुषपात्रता,गर्भविमर्शसन्ध्यभावः,

कौशिकी वृत्तिः प्रख्यातश्च नायको भवति। हास्यशृङ्गारशान्तभिन्नाः रसाः। व्यायोगग्रन्थेषु भासस्य मध्यमव्यायोगः, प्रह्लादनदेवविरचितः पार्थपराक्रमः, रामचन्द्रस्य निर्भयभीमव्यायोगः, विश्वनाथस्य सौगन्धिकाहरणम् इत्यादयो ग्रन्थाः प्रख्याताः। समवकारः निरूप्यते– समवकारे देवासुरावयं ख्यातं वृत्तं, द्वादश नायकाः, वैदिकानि गायत्र्यादीनि छन्दांसि, वीरप्रधानो रसः। अस्य उदाहरणं– वत्सराजस्य समुद्रमथनम्।।

## Keywords

भाणः, धूर्तचरितः, विटः, भारती, सात्वती, आरभटी, कपटः, स्वाभाविकः, कृत्रिमः, दैवजः, विद्रवः।

# Discussion

### भाण:

भाणः दशरूपके तृतीयो प्रभेदः। अत्र आकाशभाषितद्वारा स्वस्य परस्य वा वृत्तं नायको भणतीति भाण इति सार्थकं नाम। भाणः नाट्यस्य एकपात्री प्रयोगमस्ति। भण शब्दे इति धातोः भणत्यत्रेति 'करणाधिकरणयो' इत्यधिकरणाथेर् ल्युटि भाणशब्दः। अस्य लक्षणं तावदिदं –

**भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्मकः। (६.२२७)**

भाणः एकाङ्कयुक्तः, विटो नायकः च

**अन्वयः** - धूर्तचरितः नानावस्थान्तरात्मकः स्याद् भाणः।

धूर्तस्य(नायकस्य) चरितं(चरित्रः) यस्मिन् सः धूर्तचरितः। अत्र व्यधिकरणबहुव्रीहिसमासो भवति।

अन्या अवस्था अवस्थान्तरम्। नाना (बहुविधम्) अवस्थान्तरं (दशान्तरं) यस्य सः नानावस्थान्तरात्मकः। तादृशः भाणः रूपकविशेषः स्याद्।।

**अर्थः** - अत्र धूर्तानां नानावस्थवृत्तान्तस्य वर्णनं भवति, तत्र भाणः।

**एकाङ्क एक एवात्र निपुणः पण्डितो विटः।**
**रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा। । (६.२२८)**

**अन्वयः –** एकाङ्क एव। अत्र निपुणः पण्डितः विटः एव। स्वेन वा इतरेण अनुभूतं रङ्गे प्रकाशयेत्।

अयं एकाङ्कयुक्त एव स्यात्। अत्र(भाणे) प्रवीणः विद्वान् षिङ्गः इत्यादिलक्षणलक्षितः। आत्मना वा अन्येन वा जनेन अनुभवविषयीकृतं वृत्तान्तं नाट्यभवने सूचयेत्।

**अर्थः –** एकाङ्कयुक्तेऽस्मिन् बुद्धिमान् निपुणा विटो नायकः। यद्यपि नटस्य एकत्वात् संभाषणं निरवकाशं तथापि आकाशभाषितद्वारा स वचनं प्रतिवचनं च करोति। आकाशभाषितं नाम पात्रं विना आकाशं दृष्ट्वा भाषणं, तदुक्तं दर्पणे,

> **किं ब्रवीषतिं यन्नाट्ये विना पात्रं प्रयुज्यते।**
> **श्रुत्वेवानुक्तमप्यर्थं तत्स्यादाकाशभाषितम्।** । (६.१४०)

आकाशं पश्यन् किं कथयसि? अस्तु, नगरं गच्छामीति? भवतु भवतु, भवान् गच्छतु इत्यनेन प्रकारेण प्रश्नमुत्तरं च यत् स्वयमेव कथयति तदाकाशभाषितमित्यर्थः। नायकः स्ववाक्ये शौर्यसौभाग्यादीनां गुणानां सूचनां करोति। तेन वीरस्य शृङ्गारस्य च रसस्य प्रतीतिर्भवति।

कल्पितकथावस्तुसंयुतेऽत्र प्रायेण भारती वृत्तिः दृश्यते। अत एव संस्कृतस्य बाहुल्यम्। भारती वृत्तिर्नाम संस्कृतबहुलं भाषणं, तदुक्तं –

> **तत्रेतिवृत्तमुत्पाद्यं, वृत्तिः प्रायेण भारती।**
> **मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च।।** (६.२३०)

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः। तदभावे कौशिकी वृत्तिः । कौशिकी नाम सुन्दरनेपथ्यवान् स्त्रीप्रधानः नृत्यगीतयुक्तः सुविलासः कामोपपभोगादिरूपो व्यापारः। मुखं प्रतिमुखं चेति केवलं सन्धिद्वयमत्र सम्भवति। गेयपदं स्थितपाठ्यम् इत्यादीनि लास्यस्य दशापि अङ्गान्यत्र भवितुमर्हन्ति। अस्य उदाहरणं – लीलामधुकरः।।

## व्यायोगः

व्यायोगप्रभेदस्य उत्तमोदाहरणत्वेन मध्यमव्यायोगः वर्तते। व्यायोगः इत्येषः चतुर्थः प्रभेदः। अत्र विशेषेण कार्यार्थं बहवः आयुज्यन्ते – प्रवृत्ता भवन्तीति व्यायोगः इति सार्थकं नाम। बहूनां प्रवृत्तेः अधिकरणमित्यर्थः। अस्य लक्षणं तावदिदं– मनुष्यबहुलेऽस्मिन् अत्र कथावस्तु रामायणमहाभारतादेः स्वीकारात् प्रसिद्धम्। स्त्रीपात्राणि न्यूनानि। अत्र मुखं, प्रतिमुखं, निर्वहणं चेति त्रयः एव सन्धयः, तदुक्तं दर्पणे –

**ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।**
**हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः।।** (६.२३१)

**अन्वयः** – ख्यातेतिवृत्तः स्वल्पजनस्त्रीसंयुतः गर्भविमर्शाभ्यां हीनः नरैः आश्रितः व्यायोगः।

**अर्थः** – पुराणादिप्रसिद्धं वर्णनीयवस्तु यस्मिन् सः स्तोकयोषिज्जनसहितः तदाख्यसन्धिभ्यां रहितः बहुभिः नरैः आश्रितः।।

व्यायोगे एकः अङ्कः, स्त्रीपात्राणि न्यूनानि च

एकाङ्गे अत्र स्त्रीनिमित्तं युद्धं संभवति। भारती, सात्वती, आरभटी चेति वृत्तित्रयमात्रस्य अत्र संभवः। रामायणादौ प्रसिद्धः कश्चित् राजा इह नायको भवति दिव्यो वा कश्चित् पुरुषः। स पुनः धीरोद्धत्तो भवतीति विशेषः। धीरोद्धत्तस्य लक्षणं तावदिदं –

**मायापरः प्रचण्डापलोऽहङ्कारदर्पभूयिष्ठः।**
**आत्मश्लाघानिरतो धीरैः धीरोद्धत्तः कथितः।।**

अत्र करुणः, वीरः, रौद्रः,भयानकः, बीभत्सः,अद्भुतश्च इत्येतेषु रसेषु अन्यतमो प्रधानः भवति। कथञ्चिदपि हास्य-शृङ्गार-शान्ता अत्र न भवन्ति। यथा-

**राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।**
**हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः।।** (६.२३३)

**अन्वयः** - अथ सः राजर्षिः दिव्यो वा भवेत् धीरोद्धत्तः। हास्यशृङ्गारशान्तेभ्यः इतरे रसाः अत्र अङ्गिनः।।

**अर्थः** - स च, नायको राजर्षिरथ वा दिव्यः (देवताविशेषो धीरोद्धतः) इत्युक्तलक्षणलक्षितो भवेत्। हास्यशृङ्गारशान्तेभ्यः अन्ये रसाः व्यायोगे मुख्या भवेयुः।।

अस्य उदाहरणं सौगन्धिकाहरणम्। मध्यमव्यायोगः इत्यप्यस्यैव प्रसिद्धमुदाहरणान्तरम्।।

**व्यायोगस्य लक्षणम्**

1. व्यायोगस्य नायकः प्रसिद्धः पुरुषः भवेत्।
2. पुरुषपात्राणि अधिकानि, स्त्रीपात्राणि न्यूनानि च भवेयुः।
3. अत्र नाटके एकः एव अङ्कः भवेत्।
4. व्यायोगस्य कथा (इतिवृत्तं) प्रसिद्धा भवेत्। सा च कथा एकस्मिन् एव दिने प्रवृत्ता स्यात्।
5. नायकः दिव्यः राजर्षिः क्षत्रियः वा भवेत्। सः धीरोद्धत्तः भवेत्।

6. अस्मिन् युद्धस्य, नियुद्धस्य, संघर्षस्य दृश्यं भवितुमर्हति। एतानि सर्वाणि लक्षणानि मध्यमव्यायोगे अन्वितानि भवन्ति।।

## समवकारः

रूपके समवकारः पञ्चमः प्रभेदः। समवकारे देवासुराश्रयं ख्यातं वृत्तं, द्वादश नायकाः, वैदिकानि गायत्र्यादीनिछन्दांसि, वीरः प्रधानो रसः। तदुक्तं दर्पणे-

**वृत्तं समवकारे तु ख्यातं देवसुराश्रयम् ।**
**सन्धयो निर्विमर्शास्तु, त्रयोऽङ्कास्तत्र चादिमे ।। (६.२३४)**

त्रयोऽङ्काः, चत्वारः सन्धयः च

**अन्वयः** – समवकारे तु ख्यातं देवसुराश्रयं वृत्तम्। तत्र निर्विमर्शाः सन्धयः त्रयोऽङ्काः। तत्र आदिमे।

**अर्थः** – रूपकविशेषे तु (समवकारे) प्रसिद्धं सुरदैत्याधारं चरित्रं भवेत्। समवकारे विमर्शसन्धिरहिताः मुखप्रतिमुखगर्भोपसंहृतिनामकाः चत्वारः सन्धयः, त्रयोऽङ्काः रचनीया इति शेषः। अङ्केषु अग्रिमे अङ्के।।

समकीर्त्यन्ते बहवो रसाः यत्रेति व्युत्पत्या सर्वरसावस्थानं सूच्यते। अस्य लक्षणं तावदिदं–अत्र विचित्रा बहवोऽर्थाः समवकीर्णा राशीकृता भवन्तीति समवकारः इति सार्थकं नाम। एतत्प्रभेदसाहित्यमल्पं, यथा वत्सराजस्य समुद्रमथनम्।

अत्र प्रसिद्धं तादृशं कथावस्तु भवति यद्देवासुरसम्बन्धि। विमर्शं विना अन्ये मुखादयः चत्वारोऽपि सन्धयो भवन्ति। अङ्काश्च त्रय एव। तत्र प्रथमेऽङ्के मुखं प्रतिमुखं चेति सन्धिद्वयं सम्भवति। द्वितीयो गर्भः। तृतीये निर्वहणम् । अत्र प्रसिद्धा द्वादश धीरोदात्ता नायका भवन्ति। तेषु केचित् देवाः केचिच्च दानवाः । तेषां सर्वेषामपि पृथक् पृथगेव प्रयोजनं भवति। अत्र वीरस्य प्राधान्यम् अन्येषां तु अप्राधान्यम्। भारती, सात्वती, आरभटी चेति वृत्तित्रयं प्रचुरं भवति, कौशिकी तु न्यूना। बीजं बिन्दुं च वर्जयित्वा अन्याः सर्वा अपि अर्थप्रकृतयो भवन्ति। अत्र केवलं पताका, प्रकरी, कार्यं चेति अर्थप्रकृतित्रयमेव दृश्यते नान्यत्।

वीथीति रूपकस्य यो दशमः प्रभेदः तस्य त्रयोदश अङ्गान्यप्यत्र संभवन्ति। गायत्री, उष्णिक् इत्यादीनि छन्दांसि च। प्रथमेऽङ्के कथावस्तु द्वादशनाटिकापरिमिते अर्थात् प्रायेण सार्धनवघण्टापरिमिते काले संभवितुं योग्यम्। द्वितीये नाडिकाचतुष्टयपरिमिते अर्थात् प्रायेण सपादघण्डात्रयपरिमिते काले संभवितुं योग्यम्। तृतीये तु

नाडिकाद्वयपरिमिते अर्थात् प्रायेण सार्धैकघण्टापरिमिते काले संभवितुं योग्यमिति शेषः।

कपटः त्रिविधः - स्वाभाविकः, कृत्रिमः, दैवजः

अत्र हि स्वाभाविकः, कृत्रिमः, दैवजोति त्रिविधोऽपि कपटः संभवति। कपटो नाम वञ्चना। अयं कपटो यदि स्वस्य अजननादिना भवति तर्हि सः स्वाभाविकः। यदि पुरुषान्तरात् कपटो भवति तर्हि सः कृत्रिमः। यदि काकतालीयन्यायेन अकस्मात् कपटो भवति सः दैवजः। एतादृशः त्रिविधोऽपि कपटः अत्र संभवति। अत्र शृङ्गारः धर्मसंबन्धी, अर्थसंबन्धी, कामसंबन्धी चेति त्रिविधः। तत्र स्वपुरुषस्य स्वपत्न्यां यः शृङ्गारः स धर्मसंबन्धी। पुरुषस्य वैश्यायां यः शृङ्गारः स अर्थसंबन्धी। पुरुषस्य परपत्न्यां कान्यायां वा यः शृङ्गारः सः कामसंबन्धी।

तत्र धर्मशृङ्गारः प्रथमाङ्के एव। अन्ययोः तु नियमाभावात् शिष्ठयोः अङ्कयोः अनियमेन सम्भवः। तदेतदादुक्तं –

**त्रिशृङ्गारस्त्रिकपटः कार्यायां त्रिविद्रवः ।**
**वस्तु द्वादशनालीभिर्निष्पाद्यं प्रथमाङ्कगम् ।।**(६.२३८)

**द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके ।**

**अन्वयः** – अयं त्रिशृङ्गारः त्रिकपटः त्रिविद्रवः कार्यः। प्रथमाङ्कगं वस्तु द्वादशनालीभिः निष्पाद्यम्। द्वितीयेऽङ्के तृतीयके चतसृभिर्द्वाभ्यामङ्के।।

**अर्थः** – अयं समवकारः धर्मार्थकामभेदैः त्रिविधः शृङ्गारः, अनुपदं वक्ष्यमाणः स्वाभाविकादिभेदैः त्रिविधः कपटः अचेतनादिकृतभेदैः त्रिविधो विद्रवः, शङ्काभयत्रासकृतः संभ्रमो विद्रवा मतः (६.१००) कर्तव्यः। एवं विद्रवो नाम उपद्रवः। आदिमाङ्घस्थित इतिवृत्तं द्वादशमुहूर्तैः सम्पादनीयम्। द्वितीये अङ्के वस्तु चतसृभिः तिसृभिः इति पाठान्तरम्। तृतीयके अङ्के नालीभ्यां निष्पाद्यम्।।

स यदि पुरुषादेः चेतनात् जायते तर्हि प्रथमः प्रभेदः। यदि अचेतनात् वाय्वग्निभूकम्पादेः जायते तर्हि स द्वितीयः। अथ चेतनाचेतनात् गजव्याघ्रादेः जायते तर्हि सः तृतीयः। अत्र एते त्रयोऽपि प्रभेदाः अत्र संभवन्ति। एवमत्र त्रिविधः शृङ्गारः, त्रिविधो कपटः, त्रिविधो विद्रवा संभवतीति ज्ञातव्यम्। तदुक्तं दर्पणे-

**धर्मार्थकामैः त्रिविधः शृङ्गारः, कपटः पुनः ।**(६.२३९)

**स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः।**
**अचेतनैः चेतनैश्च चेतनाचेतनैः कृतः ।।**(६.२४०)

**अन्वयः** – शृङ्गारः धर्मार्थकामैः त्रिविधः, पुनः कपटः। स्वाभाविकः कृत्रिमः दैवजः च पुनः विद्रवः। चेतनाचेतनैः अचेतनैः चेतनैश्च कृतः।।

शृङ्गार- कपट-विद्रवान् प्रदर्शयति -

**अर्थः** – शृङ्गार-कपट-विद्रवान् विभज्य प्रदर्शयति – धर्मार्थकामैरिति । शृङ्गारः त्रिविधः – धर्मार्थकामाख्याः। 'ऋतौ भार्यामुपेयात्' इत्यादिशास्त्रवचनस्य आनुकूल्येन कृतः शृङ्गारो धर्मशृङ्गारः अथवा शास्त्राविरोधेन कृतो धर्मशृङ्गारः। अर्थलाभार्थकल्पितः शृङ्गारः अर्थशृङ्गारः। प्रहसनशृङ्गार एव कामशृङ्गारः। तत्र कामशृङ्गारः समवकारे प्रथमाङ्क एव, द्वितीयतृतीयाऽङ्कयोस्तु न नियम इत्याहुः। पुनः कपटः। सांसिद्धिकः, क्रियया निर्वृत्तः, नियतिजन्यश्चेति कपटोऽपि त्रिविधः। पुनः विद्रवः। अचेतनैः काष्ठपुत्तलिकादिभिः कृतः एकः, चेतनैः कृतः द्वितीयः, गजादिभिः कृतः तृतीयः। अस्य उदाहरणं – समुद्रमथनम्।।

## Summarised Overview

रूपकसाहित्यं संस्कृतसाहित्यजगति साहित्यान्तरमिव सुसमृद्धं विद्यते। तत्र तस्य स्वकीया एव विशिष्टपरम्परा। लोकप्रियतादृष्ट्या काव्येषु रूपकसाहित्यस्य प्रथमस्थानं मन्यते। दृश्यश्रव्यभेदेन काव्यस्य भेदद्वयं प्रदर्शयति। तत् दृश्यं काव्यं नटे रामादिस्वरूपारोपात् रूपकमित्युच्यते। नटैरङ्गादिभि रामयुधिष्ठिरादीनां अवस्थानुकरणम् अभिनयः। रूपकं तु नाटकादि दशविधम्।

संस्कृतसाहित्ये प्राचीनतादृष्ट्या भाणस्यापि स्थानं नाटकवत् प्रतिष्ठितम्। भाणरचनायां यचोलाभः प्रयाससाध्यो भवति, यथोक्तं-

**वररुचिश्वदत्तः श्यामिलकः शूद्रकश्च चत्वारः।**
**एते भाणान् बभणुः का शक्तिः कालिदासस्य ।।**

भाणनामके रूपकभेदे धूर्तस्य नायकस्य नानावस्थात्मकं चरितं वर्णितं भवति। अत्र एक एवाङ्कः,एक एव च अतीवकुशलः पण्डितो नायको विटो वा नायकः भवति ।नयो हि एकाकी एव आकाशभाषितं करोति। अतः एव अस्य भाण इत्यन्वर्थासंज्ञा भवति। भण्यते व्योमोक्त्या नायकेन स्वपरवृत्तं प्रकाश्यते इति भाणः। भाणे धूर्तः चौरः द्यूतकारो वा नायको भवति। अत्र एवंविधानां जनानां अनेकावस्थात्मकं चरित्रं वर्णितं भवति। व्यायोगनामके रूपके पुराणेतिहासादिषु प्रसिद्धमितिवृत्तं भवति। विशेषेण आसमन्ताद् युज्यन्ते काव्यार्थं समारभन्ते अनेके पुरुषाः यत्रासौ व्यायोगः। स्त्रीनिमित्तमत्र युद्धं वर्जितं भवति। यथा परशुरामेण पितृवधकोपात् सहस्रार्जुनस्य वधः कृतः। व्यायोगनामके रूपके हास्य-शृङ्गार-शान्तेभ्यः अतिरिक्ताः ये करुण-रौद्र-वीर-भयानाकादयो रसाः तेष्वेव कश्चिदङ्गी रसो भवति। तथा चोक्तं साहित्यदर्पणे एव–हास्यशृङ्गारशान्तेभ्य इतरे अत्राङ्गिनो रसाः इति। समवकीर्यते कविभिः निबध्यते इति समवकारः। लक्ष्मीटीकायाम् अस्यार्थोऽस्ति– यत्र सङ्गतैः अवकीर्णैश्चार्थैः त्रिवर्गोपायैः पूर्वसिद्धैरेव क्रियते निबध्यते स समवकारः इति। समवकारे देवासुरयोः आश्रितम् इतिहासपुराणादिषु प्रसिद्धं इतिवृत्तं वर्णितमस्ति। यथा समुद्रमथनाख्ये समवकारे शिव-विष्णु-इन्द्रादीनां नायकानां

विषपान-लक्ष्मीप्राप्ति-ऐरावत-लाभादीनि फलानि ।।

## Assignments

1. मध्यमव्यायोगे अन्वितानि लक्षणानि कानि? विशदयत।
2. धीरोद्धत्तस्य लक्षणं विशदयत।
3. त्रिशृङ्गारः, त्रिकपटः, त्रिविद्रवः इत्यस्य कोऽभिप्रायः?

**निबन्धात्मकम् उत्तरत।**

1. समवकारं इति नाटकं समुद्रमथनम् अधिकृत्य विशदयत।
2. रूपकभेदान् विवृणुत।
3. मध्यमव्यायोगे प्रतिपादिताः विषयाः संक्षिप्य लिखत।

## Suggested Readings


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन् वाराणसी।
3. A Short History of Sanskrit Literature, T.K.Ramachandra Iyer, R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018
4. Dasarupaka, Dhannjaya, Chapter III, Chaukhamba Sanskrit Series, Varanasi, 2014


## References


1. साहित्यदर्पणम् –Ed.Devadattakausika, Bharatiyavidyaprakashan, New Delhi,1978.
2. साहित्यदर्पणम् – Ed.AcharyashesharajasharmaRegmi, Krishnadas Academy, Varanasi, 1993.
3. साहित्यदर्पणम् –Ed.Saligramasastri, Motilal Banarasidas, New Delhi,1992.
4. साहित्यदर्पणम् –Ed.J.R. Ballantyne Paramdasa Mitra, Motilal Banarasidas, New Delhi, 1994.
5. साहित्यदर्पणम् –Ed.Acharya Krishnamohan Sastri, Chaukhamba Sanskrit Sanssthan, Varanasi, 2011.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# साहित्यदर्पणम् परिच्छेदः-6
# (डिमः, ईहामृगः, अङ्कः)

## Learning Outcomes

- रचनादृष्ट्या कृतान् काव्यभेदान् जानाति।
- अभिनयप्रकारान् जानाति।
- रूपकभेदान् विस्तरेण जानाति।
- संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।
- नाट्यप्रयोगपरिचयः प्राप्नोति।
- नाटकप्रभृतीनां आस्वादनाय क्षमतोत्पादनम्।

## Background

विश्वनाथः रूपकाणां दश प्रधानप्रभेदान् निर्दिशति– ते च नाटकं, प्रकरणं ,भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः च। क्रमभेदेन धनञ्जयविरचिते दशरूपकनामके ग्रन्थेऽपि रूपकस्य एते भेदाः निर्दिष्टाः सन्ति। तेषु पञ्चमो भवति डिमः। डिमः सङ्घातः, इति नायकानां संघातात्मकत्वात् नायकानां समूहः संप्लवो वा डिम इत्युच्यते। तद्योगादिदं रूपकमपि डिम इति प्रसिद्धम्। अत्र इतिहासवृत्तं ऐतिहासिकं भवति। अङ्काः चत्वारः, अत्र विष्कम्भप्रवेशकयोः अभावः भवति। षोडशनायकाः भवन्ति। दीप्तरसेष्वपि प्रायेण रौद्ररसो अङ्गी भवति। मृगवदलभ्यां नायिकामत्र नायकः ईहते इति ईहामृगः। ईहामृगशब्दः पृषोदरादित्वात् साधीयः। अस्मिन् रूपके ख्याताख्यातरूपम् ऐतिहासिकं कल्पितं वृत्तं वा इतिवृत्तं चतुर्षु अङ्केषु वर्णितं भवति। अत्र एक एवाङ्कः, देव एव नायकः इति कस्यचिन्मतम्। केचन च षड्नायकं ईहामृगं स्वीकुर्वन्ति। इदमङ्कनामकं रूपकमेव उत्सृष्टाङ्क इति कथ्यते। अङ्काः नाटकेष्वपि भवन्ति ।तेभ्यः नाटकीय- अङ्केभ्यः पार्थक्यं प्रदर्शयितुम् उत्सृष्टिकाङ्क इति नामान्तरमस्ति ।

## Keywords

डिमः, उद्धतनायकः, दीप्तरसाः, मृगवदलः, उत्सृष्टिकाङ्कः, पताकानायकः, स्त्रीपरिदेवितैः।

## Discussion

### डिमः

कौशिकीहीना वृत्तयः निर्विमर्शाः सन्धयः, शान्तहास्यशृङ्गार वर्जिताः षड्रसाः

रौद्ररसप्रधानः, ख्यातेतिवृत्तः, चतुरङ्कः, षोडशभिरुद्धतनायकैरुपेतः, शान्तहास्यशृङ्गारभिन्नैः रसैरूपस्कृतं, कैशिक्यतिरिक्तवृत्तिशाली च भवति डिमः। तदुक्तं –

**अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः।**
**चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ॥**(६.२४२)

**अन्वयः** – तत्र अङ्गी रौद्ररसः, सर्वे रसाः अङ्गानि इह चत्वारोऽङ्का मता विष्कम्भकप्रवेशकौ न।

**अर्थः** – तस्मिन् डिमे मुख्यः रौद्ररसः इतरे शृङ्गारादयः अवयवाः, अस्मिन् डिमे चत्वारोऽङ्का मता विष्कम्भकप्रवेशकौ न भवतः॥

अस्य उदाहरणं च रिपुरदासः इति। तदुक्तं –

**इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम् ।**
**ततस्त्रिपुरदाहश्च डिमसंज्ञः प्रयोजितः ॥**

डिम-सङ्घाते इति नायकसंघातव्यापारात्मकत्वात् डिम इति संज्ञेति धनिकः। वेङ्कटवर्यस्य 'कृष्णविजयः' रामकवेः 'मन्मथोन्मथनम्' इति च अपरे उदाहरणे । अस्य लक्षणं तु –

**मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।**
**उपरागैश्च भूयिष्ठोडिमः ख्यातेतिवृत्तकः ॥**(६.२४१)

**अन्वयः** - मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः उपरागैः भूयिष्ठो ख्यातेतिवृत्तकः डिमः॥

**अर्थः** – भायया कुहकेन युद्धेन कोपेन चेष्टाभिः चन्द्रसूर्यग्रहणैश्च प्राचुर्ययुक्तः ख्यातम् इतिवृत्तं यस्मिन् सः डिमः॥

**नायका दैवगन्धर्वयक्षरक्षोमहारगाः ।**
**भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ।।(६.२४३)**

**अन्वयः** – दैवगन्धर्वयक्षरक्षोमहारगाः भूतप्रेतपिशाचाद्याः अत्यन्तम् उद्धताः षोडश नायकाः।।

**अर्थः** - दैवगन्धर्वयक्षरक्षोमहारगाः भूतप्रेतपिशाचाद्याः अविनीताः षोडश नायकाः भवन्ति।।

**वृत्तयः कौशिकीहीना निर्विमर्शाश्च सन्धयः।**
**दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्जिताः ।।(६.२४४)**

**अन्वयः** – कौशिकीहीना वृत्तयः निर्विमर्शाः सन्धयः शान्तहास्यशृङ्गारवर्जिताः षड्रसाः दीप्ताः स्युः ।।

**अर्थः** – कौशिकीरहिताः भारात्याद्याः भवन्ति। विमर्शरहिताः मुखप्रतिमुखगर्भोपसंहृतयः सन्धयो भवन्ति। शान्तहास्यशृङ्गारवर्जिताः करुणरौद्रवीरभयानकबीभत्साद्भुतसंज्ञकाः स्फुटस्वरूपाः भवन्ति ।।

## ईहामृगः

इहामृगे ख्यातं कल्पितकिनचिदंशं च वृत्तं, चत्वारो अङ्काः त्रयः सन्धयः, संघर्षसङ्कुलं कथानकं भवन्ति। तदुक्तं –

चतुर्भिः अङ्कैः तिसृभिः सन्धिभिः उपेतं भवति-

**ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः ।**
**मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा ।।(६.२४५)**

**अन्वयः** – मिश्रवृत्तश्चतुरङ्कः ईहामृगो प्रकीर्तितः, तत्र मुखप्रतिमुखे सन्धी तथा निर्वहणम् ।।

**अर्थः** – ख्याताऽख्यातेतिवृत्तः चत्वारः अङ्काः यस्मिन् सः तादृशो रूपकविशेषः ईहामृगः प्रवर्णितः। तस्मिन् ईहामृगे, मुखप्रतिमुखे सन्धी तथा निर्वहणं च सन्धिर्भवति।।

मिश्रं ख्याताख्यातम्। अन्यः प्रतिनायकः। पताकानायकस्तु नायकप्रतिनायकयोर्मिलिता दश । नायको मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीति ईहामृगः। साहित्यदर्पणोक्तः 'कुसुमशेखरविजय' नामकोऽपि ईहामृगग्रन्थोऽप्राप्य एव। मृगवदलभ्यायां नायिकायामभिलाषस्य वर्णनीयतया ईहामृग इति नामकरणम्। प्राचीनयोः वीरविजयः, रुक्मिणीहरणं नामकयोः ईहामृगग्रन्थयोः यद्यपि उपलब्धिर्न भवति, तथापि वत्सराजकृतं रुक्मिणीहरणं नामकयोः ईहामृगग्रन्थयोः यद्यपि

उपलब्धिर्न भवति, तथापि वत्सराजकृतं रुक्मिणीपरिणयपुस्तक प्राप्यत इति तदेवैकमस्योदाहरणं लभ्यम्।

**दिव्यस्त्रीहेतुकं युद्धं, नायकाः षडितीतरे।।**

**अन्वयः** – इतरे दिव्यस्त्रीहेतुकं युद्धं नायकाः षड्।

**अर्थः** – अन्ये दिव्यस्त्री कारणं यस्मिन् तत् संग्राम इति नेतारः षड् इत्याहुः।

## अङ्कः

अङ्कस्य नामान्तरं भवति उत्सृष्टिकाङ्कः। अत्र एक एवाङ्कः स्यात्।

अष्टमः प्रभेदः भवति अङ्कः। रूपके अवान्तरभागस्यापि अङ्क इति नाम वर्तते। तेन संशयो भवतीति प्रायेण सर्वे एतं प्रभेदम् 'उत्सृष्टिकाङ्क' इति वदन्ति। तदुक्तं –

**उत्सृष्टिकाङ्क एकाङ्को नेतारः प्राकृता नराः।**।(६.२५०)

**अर्थः** - अङ्कस्यैव केषांचित् मते नामान्तरम् उत्सृष्टिकाङ्क, स एकाङ्कः। अङ्के साधारणाः बहवो मनुष्याः नायकाः भवन्ति।

उत्सृष्टिश्च विपरीता सृष्टिः। सात्र वर्तते इति नामास्य सार्थकम्। लोकविरुद्धस्य क्रमस्य इह दर्शनं भवतीति तात्पर्यम्। अभिनवगुप्तस्तु शोकं कुर्वत्यः स्त्रियः बहव्यः अत्र सन्तीति उत्सृष्टिकाङ्क इति नाम सार्थकमिति वदति। स तावदेवं व्युत्पत्तिं प्रदर्शयति – उत्सृष्टिका उत्क्रमणीया सृष्टिः जीवितं यासां ता इति शोचयन्त्यः स्त्रिय उत्सृश्यिकाः। तादृशीभिः अङ्कितो भवत्यङ्क अत्रेति उत्सृष्टिकाङ्कः। अथवा विलोमरूपा, प्राकृतनायकत्वाद्विपरीतरूपेति भावः रचना यस्य स चाऽसौ अङ्कः उत्सृष्टिकाङ्कः। अस्य लक्षणं तावदिदम् – अत्र एक एवाङ्कः। नीचा जना अत्र नायकाः। अत्र करुणो रसः प्रधान इति स्त्रीणां रोदनमधिकं भवति। अत्र प्रसिद्धं कथावस्तु कविः स्वबुद्धिबलेन विस्तारयति, तदुक्तं –

उत्सृष्टिकाङ्कस्य लक्षणम् -

**रसोऽत्र करुणः स्थायी, बहुस्त्रीपरिदेवितम् ।**
**प्रख्यातमितिवृत्तं च कविर्बुद्ध्या प्रपञ्चयेत् ।।**(६.२५१)

**अन्वयः** – अत्र स्थायी करुणो रसः, बहुस्त्रीपरिदेवितम् । कविः प्रख्यातम् इतिवृत्तं बुद्ध्या प्रपञ्चयेत् ।।

**अर्थः** – अस्मिन् अङ्के स्थैर्यशीलः करुणरसः, बहूनां स्त्रीणां विलापः भवेत्। कवयिता प्रसिद्धं, नाट्यशास्त्रसिद्धान्तानुसारं क्वचिदप्रख्यातमपि वर्णनीयं वस्तु स्वमत्या विस्तारयेत्।।

भाणे इव अत्रापि मुखं प्रतिमुखं चेति सन्धिद्वयमात्रं भवति। प्रायेण भारती वृत्तिः दृश्यते। तदुक्तं दर्पणे-

**भाणवत्सन्धिवृत्त्यङ्गान्यस्मिञ्जयपराजयौ ।**
**युद्धं च वाचा कर्तव्यं निर्वेदवचनं बहु ।।**

अङ्के रसः करुणः, सन्धिद्वयमात्रम्

**अन्वयः** – अस्मिन् भाणवत् सन्धिवृत्यङ्गानि। जयपराजयौ। वाचा युद्धं कर्तव्यं बहु निर्वेदवचनम्।।

**अर्थः** – अस्मिन् (अङ्के) भाणे यथा मुखप्रतिमुखे भारतीकैशिक्यौ दशापि लास्याङ्गानि भवेयुः। नायकप्रतिनायकयोर्दर्शनीयाविति शेषः। वचनेन संग्रामश्च विधेयं न तु शास्त्रेण इति भावः। अधिकं स्वाऽवमाननसूचकं वाक्यं च कविना कर्तव्यमिति शेषः।।

दशापि लास्याङ्गानि इह सम्भवन्ति। अत्र वाचा युद्धं भवति न तु आयुधेन। प्रायेण वैराग्यजनकानि वचनानि अधिकानि भवन्ति। अन्यत्सर्वं नाटकवत् बोध्यम्। अस्य उदाहरणम् अज्ञातकर्तृकं शर्मिष्ठाययातिः।।

## Summarised Overview

तत्र दशविधेषु रूपकेषु नाटकमेव प्रधानं भवति । डिमरूपके कथावस्तु ऐतिहासिकम्। माया-इन्द्रजाल-सङ्ग्राम-क्रोध-उन्मत्तादीनां चेष्टाभिः सूर्य-चन्द्रमसोः च उपरागैः व्याप्तं कथावस्तु डिमे भवति। रौद्ररसोऽङ्की, चत्वारो अङ्काः, षोडशसंख्याकाः अत्यन्तमुद्धताः अत्र नायकाः भवन्ति। विष्कम्भकप्रवेशकौ अतिरिच्य कौशिकीवृत्तिरहिताः शान्तशृङ्गारहास्यानपहाय च भारत्यादयो वृत्तयः वीरबीभत्सरौद्रादयो रसाः भवन्ति। ईहामृगे चत्वारो अङ्काः भवन्ति। यत्र किमप्यैतिहासिकं किमपि कल्पितञ्च कथावस्तु भवति। अत्र शृङ्गाराभासः बाहुल्येन दृश्यते। दिव्याः मनुष्याः वात्र दश संख्याकाः पताकानायका अपि भवन्ति। केचित् षड्नायकाःइतीतरे कथयन्ति। अत्र मृगवदलभ्यां कामिनीं नायको अभिलषतीति हेतोः ईहामृगेति संज्ञा अन्वर्थतां भजते। अङ्कस्यापरं नाम उत्सृष्टाङ्क इत्यस्ति। अत्र एकोऽङ्को भवति। साधारणः पुरुषो नायकः, करुणरसः स्थायी, स्त्रीविलासादीनां बाहुल्यं ऐतिहासिकञ्च कथावस्तु भवति। जयपराजयौ, वाक्कलहः, निर्वेदः चात्र वर्ण्यन्ते।।

## Assignments

1. डिमे कथावस्तु कीदृशं भवति?

निबन्धं रचयत -

1. ईहामृगमधिकृत्य विशदयत।

2. उत्सृष्टिकाङ्कविषये एकां टिप्पणीं लिखत।
3. डिममधिकृत्य उपन्यस्यत ।

## Suggested Readings


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन् वाराणसी।
3. A Short History of Sanskrit Literature – T.K.Ramachandra Iyer, R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018.
4. Dasarupaka, Dhannjaya, Chapter III, Chaukhamba Sanskrit Series, Varanasi, 2014


## References


1. साहित्यदर्पणम् –Ed.Devadattakausika, Bharatiyavidyaprakashan, New Delhi, 1978.
2. साहित्यदर्पणम् – Ed.AcharyashesharajasharmaRegmi, Krishnadas Academy, Varanasi, 1993.
3. साहित्यदर्पणम् –Ed.Saligramasastri, Motilal Banarasidas, New Delhi, 1992.
4. साहित्यदर्पणम् –Ed.J.R. Ballantyne Paramdasa Mitra, Motilal Banarasidas, New Delhi, 1994.
5. साहित्यदर्पणम् –Ed.Acharya Krishnamohan Sastri, Chaukhamba Sanskrit Sansthan, Varanasi, 2011.


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# साहित्यदर्पणम् परिच्छेदः-6 (वीथी, प्रहसनम्)

## Learning Outcomes

- रूपकस्य ज्ञानं लभते।
- त्रयोदशवीथ्यङ्गानां भेदान् जानाति।
- प्रहसननामकं दशमरूपकस्य तद्विषयस्यापि विस्तरेण जानाति।

## Background

दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रियते। नाट्यशास्त्रानुरोधेन रूपकाण्यधिकृत्य धनञ्जयेन विरचितः ग्रन्थः भवति दशरूपकम्। दशरूपकात्पूर्वं भरतमुनेः नाट्यशास्त्रादन्यो ग्रन्थः रूपकशास्त्रे नोपलभ्यते। ततो धनञ्जयकृतस्य दशरूपकस्य सुमहत्स्थानमस्ति साहित्यशास्त्रे। धनञ्जयः रूपकेषु औत्सुक्यं भजतां जनानां कृते दशरूपकाख्यस्य स्वग्रन्थस्य रचनामकरोत्। रूपकाणां लक्षणप्रतिपादनपरतया दशरूपकाणां विवृतिं करोतीत्यतः 'दशरूपकं' इति अन्वर्थसंज्ञा अस्य ग्रन्थस्य । यतो हि पूर्वपाठे केवलं अष्टानामेव रूपकाणां वर्णनं कृतमस्ति। इदानीं रूपकस्य तौ एव अवशिष्टौ वीथी-प्रहसनाख्यौ भेदौ पठिष्यतः।

वीथीरूपकस्य नवमभेदोऽस्ति। अत्र एकः अङ्को भवति। अधम-मध्यम-उत्तमकोटिको वा कश्चिदेको नायकः कल्पितो भवति। शृङ्गाररसस्य बाहुल्यं भवति तथा केचिदन्ये रसाः यत्र तत्र सूच्यन्ते ।मनीषिभिरस्य वीथ्याख्यस्य रूपकस्य त्रयोदश अङ्गानि स्वीकृतानि। तथा चोक्तं – 'भारतीवृत्तिवर्तीनि वीथ्यङ्गानि त्रयोदश'।

प्रकृष्टं हसत्यनेन इति प्रहसनं नाम रूपकम्। अत्र एकाङ्केन कथा भवति। कथा च कविकल्पितं न तु पुराणेतिहासप्रसिद्धं निन्दनीया लोकानां वृत्तान्तं भवति। क्वचिद् क्वचिद् वीथ्यङ्गानि भवन्ति ।दर्पणे त्रयोभेदाः कीर्तिताः सन्ति – शुद्धं, सङ्कीर्णं, विकृतं चेति। भरतमुनिना प्रहसनस्य द्वौ एव भेदौ स्वीक्रियेते- शुद्धं संकीर्णं चेति। अत एव प्रहसनस्य सर्वैः आचार्यैः भेदत्रयं स्वीकृतम् । मुनिना द्वावेव भेदौ अङ्गीकृतौ यतो हि अनेन विकृतनामको भेदः संकीर्णैनैव गतार्थमिति मुनिना न प्रृथगुक्तं इति।।

## Keywords

वीथी, माधवीवीथी, कौशिकीवृत्तिः, उद्घात्यकः, अवलगितं, प्रपञ्चः, त्रिगतं, छलं, वाक्केलि, अधिबलं, गण्डं, अवस्यन्दितं, नालिका, असत्प्रलापः, व्याहारः, मृदवम्, आरभटी, विष्कम्भकप्रवेशकः, शुद्धं, संकीर्णं, विकृतम्।।

## Discussion

### वीथी

भाणसदृशं रूपकं, एक एवाङ्कः, शृङ्गाररसः, सन्धिद्वयमात्रम्

वीथीनामपि रूपकप्रभेदे भाणसमानैव कथा, एकोऽङ्कः शृङ्गारोऽनुद्भिन्नरूपो रसः, कौशिकी वृत्तिश्च। माधवीवीथी इति नाममात्रशेषोऽस्य निदर्शनग्रन्थः। दशरूपके वीथी नवमः प्रभेदः। नानारसानामत्र मालारूपतया अवस्थानात् वीथीवेति प्रभेदोऽयं वीथीवेति वीथीति सार्थकं नामेति मन्यते। अस्या लक्षणं तावदिदम् – अत्र एक एव अङ्को भवति। एक एव नायकः। स आकाशभाषितैः वचनप्रतिवचने करोति। तस्य वचनेषु आधिक्येन शृङ्गाररसस्य अभिव्यञ्जनं वर्तते, अत एवात्र कौशिकीवृत्तेराधिक्यं दृश्यते। अन्येषां तु अल्पत्वेन अभिव्यञ्जनम्। अत्र मुखं निर्वहणं च सन्धिद्वयमात्रं भवति। अन्ये सन्धयो न भवन्ति। बीजबिन्दुपताकादयः सर्वा अपि अर्थप्रकृतयोऽत्र संभवन्ति। तदुक्तम् –

**वीथ्यामेको भवेदङ्कः, कश्चिदेकोत्र कल्प्यते ।**
**आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः ।।(६.२५३)**

**अन्वयः** – वीथ्यामेको अङ्कः भवेत्। अत्र कश्चिद् एकः कल्प्यते । स च उक्तैः आकाशभाषितैः चित्रां प्रत्युक्तिं आश्रितः।।

**अर्थः** – अस्यां वीथ्यां एको अङ्को भवेत्। वीथ्यां कोऽपि उत्तमो मध्यमो अधमो वा नायकः कल्पयित्वा वर्ण्यते। अभिहितप्रकारैः आकाशभाषितैः (अभिनये पात्रमन्तरेण अकथितमपि विषयं आकर्ण्य इव श्रवणाभिनयं कृत्वेति भावः। कथयसि अभिधीयत्ते तत् आकाशभाषितं स्यात्) अद्भुतस्वरूपां प्रतिवचनं कृताश्रयः।।

**सूचयेद्भूरि शृङ्गारं किञ्चिदन्यान्रसान् प्रति।**
**मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः ।।(६.२५४)**

वीथ्याः त्रयोदश अङ्गानि-

अन्वयः – शृङ्गारं भूरि अन्यान् रसान् अपि किञ्चित् सूचयेत्। मुखनिर्वहणे सन्धी अखिलाः अर्थप्रकृतयः।।

अर्थः – आदिरसं अधिकं यथा तथा अपरान् रसान् अपि किञ्चित् सूचनां कुर्यात्। मुखनिर्वहणे सन्धी भवेतां तथा समस्ताः प्रयोजनसिद्धिहेतवः बीज-बिन्दु-पताका-प्रकरी कार्यरूपाः स्युः।।

अङ्कानि - अस्याः त्रयोदश अङ्गानि सन्ति ।

**अस्याः त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः।**
**उद्घात्य(त)कावलगिते प्रपञ्चस्त्रिगतं छलम्।।(६.२५५)**

**वाक्केल्यधिबले गण्डमवस्यन्दितनालिके।**
**असत्प्रलापव्यवहारमृद(मार्द)वानि च तानि तु ।।(६.२५६)**

अर्थः – विद्वांसः अस्याः(वीथ्याः) त्रयोदश अङ्गानि निर्दिशन्ति। तानि यथा - १. उद्घात्यकं, २. अवलगितं, ३. प्रपञ्चः, ४.त्रिगतम् ५.छलम् ६.वाक्केलिः ७.अधिबलम् ८.गण्डम् ९.अवस्यन्दितं १०.नालिका ११.असत्प्रलापः १२.व्याहारः १३.मार्दवम् चेति।

क्रमेण एतेषां निरूपणं क्रियते–

अवगतार्थस्य वाक्यार्थस्य अवगतये योजितः शकः -

१. उद्घात्यकम्

इदं तावत् वीथ्याः प्रथममङ्गम्। प्रस्तावनायाश्च प्रथमः प्रभेदः। तस्मादेतस्य निबन्धनं प्रस्तावनायामेव भवतीति विज्ञायते। अस्य लक्षणं तावदिदं –

**पदान्यत्वगतार्थानि तदर्थगतये नराः।**
**योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते ।।(६.३४)**

अन्वयः – नराः अगतार्थानि पदानि तदर्थगतये अन्यैः पदैः योजयन्ति, सः उद्घात्यक उच्यते।।

अर्थः – यत्र नटाः अज्ञातवाच्यानि शब्दान् तदभिप्रेताऽर्थज्ञानाय अपरैः शब्दैः संक्रमयन्ति तन्नामकः उद्घात्यकः अभिधीयते।।

सूत्रधारेण यानि पदानि प्रयुक्तानि तेषामर्थमविजानन् तेषामर्थान्तरं प्रकल्प्य तदनुसारेणैव नटो वाक्यं प्रयुञ्जानो यत्र प्रविशति तत्र उद्घात्यकमिति प्रभेद इत्यर्थः। उदाहरणं तावत् मुद्राराक्षसे दृश्यते, यथा-

क्रूरग्रहः सकेतुश्चन्द्रमसंपूर्णमण्डलमिदानीम्।

अभिभवितुमिच्छति बलात्।।

इत्यन्तरं (नेपथ्ये)

आः! क एष मयि जीवति चन्दगुप्तमभिभवितुमिच्छति।।

अत्र क्रूरग्रहः इति वाक्यं सूत्रधारेण प्रयुक्तम्। केतुसहितः क्रूरो ग्रहो पूर्णचन्द्रम् आक्रमितुम् इच्छति अर्थात् अचिरादेव चन्द्रस्य ग्रहणं भविष्यति इति तस्यार्थः। इमं चार्थं स नटीं बोधयितुम् इच्छति।

तदर्थं तां प्रति प्रयुक्तम् एतत् वाक्यम्। तस्मिन्नेव समये नेपथ्ये स्थितः चाणक्यो वाक्यमिदं शृणोति। श्रुत्वा च तद्वाक्यस्य 'सम्पूर्णराष्ट्रं चन्द्रगुप्तं क्रूरदुरग्राहवान् कश्चित् मलयकेतुना सहितः सन् आक्रमितुं इच्छति' इत्यर्थान्तरं कल्पयन् क्रुद्धः तदनुसारेणैव वाक्यं प्रयुङ्क्ते - आः! क एष इत्यादि। मयि रक्षके जीवति सति कोऽयं दुष्टः मच्छिष्यं चन्द्रगुप्तं आक्रमितुम् इच्छतीति तदर्थः। एवमत्र सूत्रधारेण यद्वाक्यं प्रयुक्तं तस्य तद्दृष्ट्या कस्मिंश्चिदर्थे सत्यपि रङ्गं प्रविशन् पुरुषः तदजानन् प्रत्युत तद्वाक्यस्य स्वबुद्ध्यनुसारेण अन्यमेवार्थं जानन् तदनुगुण्येन वाक्यं प्रयुङ्क्ते। तदिदं उद्धात्यकम्।।

## २. अवलगितम्

इदं वीथ्या द्वितीयमङ्गं यच्च प्रस्तावनायाः पञ्चमः प्रभेदोऽपि। तस्मात् पूर्वस्येव अस्यापि प्रस्तावनायामेव संभव इति विज्ञायते। लक्षणं तावदिदं–

**यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते।**
**प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः।।(६.३८)**

सादृश्यादिवशात् कस्याप्यन्यस्य समावेशेन कस्यापि पात्रस्य सूचना दीयते -

यत्र किञ्चित्कार्यार्थं क्रियमाणेन यत्नेन तत्कार्यस्येव रूपकारम्भरूपकार्यान्तरस्यापि सिद्धिर्भवति तदवलगितमिति अस्यार्थः। उदाहरणं चास्य अभिज्ञानशाकुन्तले दृश्यते, यथा तत्र वसन्तमासमधिकृत्य नट्या कृतं गानं प्रशंसन् सूत्रधारः एवं कथयति–

तवास्मि गीतरागेण हारिणा प्रसभं यतः।

एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ।।

अत्र अतिवेगशालिना हरिणेन आकृष्ठचित्तो दुष्यन्त इवेति कथनात् तस्य प्रवेशेन नाटकस्य आरम्भ इति विज्ञायते। एवमत्र गीताप्रशंसारूपे एकस्मिन् कार्ये कृतेन यत्नेन दुष्यन्तप्रवेशेन नाटकारम्भो भविष्यतीति कार्यान्तरमपि सूचितम्।।

## ३. प्रपञ्चः

इदं वीथ्याः तृतीयमङ्गम् । अस्य च लक्षणं तावदिदं –

**मिथो वाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः।**

यत्र परस्परं हास्यकोरकम् असद्वाक्यम् उच्यन्ते तत् -

यत्र हास्यजनकानि असत्यार्थप्रतिपादकानि वाक्यानि भवन्ति तादृशं द्वयोः संभाषणं प्रपञ्च इत्यर्थः। अस्य च उदाहरणं विक्रमोर्वशीये दृश्यते, यथा– वलभीस्थविदूषकचेट्योरन्योन्यवचनम्।

अत्र वलभ्यां (चन्द्रशालायां) उपविष्टौ चेटीविदूषकयोः संभाषणे असत्यार्थप्रतिपादकानि हास्यजनकानि च वाक्यानि स्पष्टानि।।

४. त्रिगतम्

इदं चतुर्थम् अङ्गम्। अस्य लक्षणं तावदिदं–

**त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः ।(६.२५७)**

**अन्वयः** - श्रुतिसाम्यतः अनेकार्थयोजनं त्रिगतं स्याद् ।

**अर्थः** – शब्दश्रवणसाम्यात् अनेकार्थप्रत्यायनं त्रिगतं नाम वीथ्यङ्गम्।

श्रूयमाणशब्द सादृश्यवशात् अनेकार्थकल्पनम्

यत्र वाक्यस्य समानत्वात् श्रवणं समानं किन्तु तद्वाक्यं प्रयोक्तृभेदात् भिन्नार्थकम्, अत एव च तदनेकार्थकं भवति तद्वाक्यं त्रिगतमित्यर्थः।

अस्यापि उदाहरणं विक्रमोर्वशीय एव, यथा –उर्वशीवियोगेन विक्रमः अत्यन्तं दुःखितो वर्तते। तद्दुःखेन तस्य तावान् मतिविभ्रमो जातः येन स तदानीं वाक्यस्य प्रयोक्ता क इत्यपि विवेक्तुं न जानाति। तच्चास्मिन् प्रसङ्गे स्फुटं भवति। उन्मत्तवत् प्रतीयमानः स विक्रमः स्वप्रेयसीं उर्वशीं सर्वत्रान्विष्यन् कञ्चन पर्वतमुपसर्पति। तं प्रति मम प्रेयसी उर्वशी कुत्रेति पृच्छत्येवं –

राजा –सर्वक्षितिभृतां नाथ !दृष्टा सर्वाङ्गसुन्दरी।

रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया।।

(नेपथ्ये प्रतिशब्दः)

राजा – कथं ! दृष्टेत्याह?

अत्र पर्वतं प्रति उर्वशीं ज्ञातुमिच्छन् विक्रमो यदा वाक्यं प्रयुक्तवान् तदा तद्वाक्यं पर्वते प्रतिध्वनितं सत् प्रतिनिवृत्तम्। तादृशं च वाक्यं शृण्वन् विक्रमः तद्वाक्यस्य 'हे राजन्! सर्वाङ्गसुन्दरी काचित् तन्वी त्वया विरहिता वनमध्यभागेऽस्मिन् मया दृष्टा' इत्यर्थान्तरं गृह्णाति। एतच्च कथं! दृष्टेत्याह? इति पुनः प्रयुक्तत्वात् तदीयादेव वाक्यात् विज्ञायते। एवमत्र वाक्यस्य समानत्वेऽपि पर्वतप्रयुक्तत्वभ्रान्त्या अर्थो भिद्यते इति स्पष्टम्।।

## ५. छलम्

इदं पञ्चममङ्गम्। अस्य लक्षणं तावदिदं –

**प्रियाभैरप्रियर्वाक्यैर्विलोभ्य च्छलना च्छलम्।**

यत्र प्रियवत् भासमानैः अप्रियैः वाक्यैः आशामुत्पाद्य वञ्चनं भवति तत्र छलमित्यर्थः। अस्य उदाहरणं वेणीसंहारे वर्तते ।

अप्रियैः वाक्यैः विलोम्य वञ्चनाकरणम्

तत्र दुर्योधनः तावत् अत्यन्तं पराजयमापन्नः। तस्य सैन्ये ये प्रमुखाः भीष्मादयः ते सर्वेऽपि पराजिताः केचिच्च मृताः। दुर्योधना एकाकी अवशिष्टः। अस्य अन्तराले सूर्योदयात् प्रागेव दुर्योधनमवश्यं नाशयामि, नो चेदात्मानं वह्नौ पातयामि इति घोरं प्रतिज्ञातं भीमेन। तेन च सर्वेषां महती चिन्ता सम्पन्ना यतः अन्वेषणे कृतोऽपि दुर्योधनो न दृश्यते। स तु जलस्तम्भनमन्त्रबलेन वैशम्पायनसरोवरे निमज्य निलीनो वर्तते। यदि एकं दिवसमतियाति तर्हि प्रतिज्ञाभङ्गात् भीमः वह्निं प्रविशति। तेन सर्वे पाण्डवाः दुःखिताः सन्तः स्वसमयानुसारेण प्राणान् मुञ्चन्ति। एतेन पर्यन्ते पाण्डवानामेव विनाशो भवति। एवं विचारयन् दुर्योधनः कथञ्चिदेकं दिनं सरोवरे निलीय नयामीति विचिन्त्य तत्र निमग्नो वर्तते। तस्मिन् समये अन्वेषणं कुर्वन्तौ भीमार्जुनौ सर्वत्रापि दुर्योधनं विचारयत; यथा –

भीमार्जुनौ –

कर्ता द्यूतच्छलानां, जतुमयशरणोद्दीपनः सोऽभिमानी

राजा दुशासनादेर्गुरुर्नुजशतस्याङ्गराजस्य मित्रम्।

कृष्णाकेशोत्तरीयव्यपनयनपटुः, पाण्डवा यस्य दासाः

क्वाऽऽस्ते दुर्योधनोऽसौ कथयत, न रुषा द्रष्टुमभ्यागतौ स्वः।।

अत्र दुर्योधनस्य यानि विशेषणानि इष्टवत् भासमानान्यपि अनिष्ठान्येव सन्ति। तैः जनानामाशामुत्पाद्य दुर्योधनवृत्तान्तस्य अवगमनं तयोरभीष्टम्। केचित्तु छलस्य लक्षणं तावदिदं कथयन्ति–

**अन्ये त्वाहुश्छलं किञ्चित्कार्यमुद्दिश्य कस्यचित् ।(६.२५८)**

उदीर्यते यद्वचनं वञ्चनाहास्यरोषकृत्।

किञ्चित् स्वाकीयं कार्यं साधयितुं पुरुषो यदि वञ्चनापरं हास्यजनकं रोषकारकं च वाक्यं उच्यते तत् छलं भवतीत्यर्थः। भरतेन तु एतदेव 'अन्यार्थमेव वाक्यं छलमभिसन्धानहास्यरोषकृत्' इति वाक्यान्तरेण अभिहितम्।।

६. वाक्केलिः

इदं षष्ठं अङ्गम् । अस्य लक्षणं तावदिदं–

**वाक्केलिर्हास्यसंबन्धो द्वित्रिप्रयुक्तितो भवेत् ।(६.२५९)**

यत्र द्वित्रिभिः चतुर्भिः वा उक्तिप्रत्युक्तिभिः हासपरिहासो भवति

बहुभिः उत्तरैः हास्यस्य वचनं वाक्केलिरित्यर्थः। अस्य उदाहरणं तावदिदं– यथा भिक्षुं सम्बोधयन् कश्चित् प्रश्नान् करोति। तेषां च उत्तरं स भिक्षुरेवं ददाति, यथा-

'भिक्षो! मांसनिषेवणं प्रकुरुषे, किं तेन मद्यं विना?

मद्यं चापि तव? प्रियमहो वाराङ्गनाभिः सह।

वेश्याप्यर्थरुचिः कुतस्तव धनं? द्यूतेन चौर्येण वा,

चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गतिः?।।

मांसं भक्षन्तं भिक्षुं प्रति कस्यचित् गृहिणः प्रश्ना भिक्षुकृतानि उत्तराणि। अत्र प्रश्नानाम् उत्तरं भिक्षुणा दीयमानं यदस्ति तत् स्वधर्मस्य विरुद्धत्वात् हास्यं जनयति।

केऽपि विद्वांसः अभिधानाऽपर्यवसानसहितस्य एव, प्रकान्तवाक्यस्य आरब्धवचनस्य समाप्तिः वाक्केलिः इत्याहुः। अन्ये च बहुविधस्य अनुयोगस्य एकं प्रतिवाक्यं वाक्केलिः इति वदन्ति।।

७.अधिबलम्

इदं सप्तमं अङ्गम्।

**अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं मतम्।**

स्पर्धावशात् अन्योन्यवाक्यैः अन्योन्यप्राधान्य - कथनं वाक्कलहो वा

इति अस्य लक्षणम्। स्पर्धया प्रयुक्तेषु वाक्येषु य उत्तरोत्तरं प्रकर्षः तदधिबलमित्यर्थः। अस्य चोदाहरणं प्रभावतीपरिणये यथा – तत्र नायकः प्रद्युम्नो वज्रनाभनामानं राक्षसं संबोधयन् एवं कथयति, यथा –

वज्रनाभः–

अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया।

लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः।।

अत्र अनया गदया तव वक्षःस्थलं सपद्येव विदार्य भुवनद्वयं सर्वथा नाशयामि इति वज्रनाभेन सक्रोधमभिहिते सति मम भुजदण्डे वर्तमानादस्मात् चापात् निर्गच्छता बाणसमूहेन भूतलं तथा करोमि येनेदं

भूतलं राक्षसरक्तार्द्रं पिशाचादीनामतीवास्वादनीयं स्यादिति तदपेक्षया प्रकर्षेण अभिहितं प्रद्युम्नेन।

प्रद्युम्नः – अरे रे असुरापसद! अलममुना बहुप्रलापेन।

मम खलु –

अद्य प्रचण्डभुजदण्डसमर्पितोरुकोदण्डनिर्गलितकाण्डसमूहपातैः।

आस्तां समस्तदितिजक्षतजोक्षितेयं क्षोणिः क्षणेन पिशिताशनलोभनीया।।

अत्र स्वधया मिथ आधिक्यस्योक्तेरधिबलम्।

**८. गण्डम्**

इदं अष्ठममङ्गम्। अस्य लक्षणं तु–

प्रस्तुतार्थसंबद्धं सत् पृथगर्थबोधकं त्वरासहितं वचनम्

**गण्डं प्रस्तुतसंबन्धि भिन्नार्थं सत्वरं वचः।(६.२६०)**

(प्रकृतार्थसंबद्धं अन्यार्थबोधकं त्वरासहितं वचनं गण्डम् ।)

यत्र प्रस्तुतार्थप्रतिपादनार्थं झटिति प्रयुक्तं वाक्यं अन्येनार्थेन संबध्यते तत्र गण्डमित्यर्थः । अस्य उदाहरणं तावत् वेणीसंहारे वर्तते।

तत्र कुरुक्षेत्रे समरे कर्णः युद्धार्थं गतः। दुर्योधनस्तु समरात् विमुखीभूय किञ्चित् विश्रान्तिमिच्छति। तदर्थं स्वभार्यया भानुमत्या साकं विहारार्थं क्रीडापर्वतं गतो वर्तते। तत्र दुर्योधनो स्वभार्यां प्रति मम ऊरुयुग्मं तवोपवेशनार्थं पर्याप्तं वर्तते। तदत्रैव उपविश्यताम् इति यावत् कथयति तावत्येव त्वरितं प्रविश्य दुर्योधनं प्रति 'भवतो रथकेतनं भयानकमारुतवशात् भग्नम्' इति वृत्तान्तं निवेदयति। स च प्रसङ्गो यथा-

राजा–अध्यासितुं तव चिराज्जघनस्थलस्य पर्याप्तमेव करभोरु! ममोरुयुग्मम् ।

अनन्तरं (प्रविश्य)

कञ्चुकी– देव ! भग्नं भग्नम् इत्यादि।

अत्र राज्ञा मनोरुग्मं इत्युक्ते सति कञ्चुकिना भग्नमिति पदेऽनुपदं प्रयुक्ते 'ममोरुग्मं भग्नं' इति वाक्ये निष्पन्ने 'तव ऊरुयुग्मं भग्नं भविष्यति' इति अनिष्ठस्य अर्थान्तरस्य प्रतीतिः। यद्यप्यत्र कञ्चुकिना सत्वरं प्रविश्य 'भग्नं भीमेन मरुता भवतो रथकेतनम्'इति वक्तुं उपक्रान्तम्। तथा तन्मनसि भवतो रथकेतनं भयङ्करेण वायुना भग्नं इत्यर्थे स्थितेऽपि पूर्ववाक्यस्थपदेन संबन्धात् अनर्थस्य प्रतीतिः।।

## ९. अवस्यन्दितम्

इदं नवममङ्गम्। अस्य लक्षणं तावदिदं–

**व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत्।**

अभिमतस्यार्थस्य प्रकाशनाय प्रयुक्तं यद्वाक्यं तस्य अर्थान्तरपरत्वेन व्याख्यानमित्यर्थः। अस्य उदाहरणं छलितरामे वर्तते।

स्वस्याः एव स्वाभाविकोक्तेः अन्यथा व्याख्यानम्

तत्र वाल्मीकिः यदा लवकुशयोः रामस्यास्थानं प्रति नयने कृतसङ्कल्पः तदा माता सीता स्वपुत्रौ प्रति इदं कथयति, यथा –

सीता– जाद! कल्यं खलु उपाध्यायेन गन्तव्यं तर्हि स राजा विनयेन पणायितव्यः।

लवः– अथ किमवाभ्यां राजोपजीवाभ्यां भवितव्यम्?

सीता– जाद! स खलु युष्माकं पिता।

लवः– किमावयो रघुपतिः पिता?

सीता – (साशङ्कं) मा अन्यथा शङ्कध्वं। न खलु युष्माकं सकालाया एव पृथिव्या इति।

अत्र स खलु युष्माकं पिता इरति मनोगतमर्थं प्रतिपादयितुं प्रयुक्तस्य वाक्यस्य सत्यस्य आच्छादनाय 'राजा सर्वेषामपि पिता भवति' इति सामान्याभिप्रायेण व्याख्यानम्।

## १०. नालिका

इदं दशमं अङ्गम्। अस्य लक्षणं तु–

**प्रहेलिकैव हास्येन युक्ता भवति नालिका।**

हास्ययुक्ता प्रहेलिका

सत्यस्य आच्छादकं हासजनकं च उत्तरमित्यर्थः। अस्य उदाहरणं रत्नावल्यां वर्तते ।

तत्र रत्नावली उपवने वत्सराजं अन्याविदिततया प्रतीक्षमाणा वर्तते। तदानीमेव तत्र आगता तत्सखी सुसङ्गता सर्वं जानत्यपि विनोदार्थं रहस्यास्य स्फोटनार्थं रत्नावलीं संलापयति, यथा-

सुसङ्गता – सखि ! यस्य कृते त्वमागता स इह एव तिष्ठति।

सागरिका – कस्य कृते अहमागता?

सुसङ्गता – ननु खलु चित्रफलकस्य।

अत्र 'चित्रफलकस्य कृते त्वमागता' इति वाक्येन वत्सराजस्य कृते त्वमागता' इत्यर्थस्य आच्छादनं कृतम्। पूर्वत्र आच्छादितोऽर्थः अन्यस्य न भासते इह तु भासते इति विशेषः।

११.असत्प्रलापः

इदम् एकादशमङ्गम्। अस्य च लक्षणं तावदिदं–

अगृह्णतोऽपि मूर्खस्य समक्षं यत् हितं वचः प्रतिभाति तत्

**असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम्।**
**अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः।।(६.२६२)**

असत्प्रलापः त्रिविधः– तत्र आद्यं पदसमूहः पूर्वापरसंबन्धरहितं, द्वितीयं यत् उत्तरं असंबद्धं तथा तृतीयं न स्वीकुर्वतः अपि हितं वचः इति शेषः। बालिशस्य अग्रे हितकारकं वचनं तदपि असत्प्रलापो नाम वीथ्यङ्गम्।

(असम्बद्धं वाक्यं असम्बद्धं उत्तरं उपदेशमशृण्वतः मूर्खस्य पुरतः हितं वचनं च असत्प्रलाप इत्यर्थः)। तत्र असम्बद्धं वाक्यं प्रभावतीपरिणये वर्तते। तत्र प्रभावतीविरहसन्तप्तः प्रद्युम्नः तामेव चिन्तयन् भ्रमति । तदा च तत्र किञ्चित् चूतसस्यं दृष्टिपथमायाति। तत्पश्यन् इयमेव मम प्रेयसी प्रभावतीति मनसि विचिन्तयन् एवं कथयति, यथा –

(प्रद्युम्नस्य सहकारवल्लीमवलोक्य प्रभावतीभ्रमादुक्तिरियम्)-

प्रद्युम्नः – (सहकारवल्लीमवलोक्य सानन्दं) अहो कथमिहैव–

अलिकुलमञ्जुलकेशी परिमलबहला रसावहा तन्वी।
किसलयपेशालपाणिः कोकिलकलभाषिणी प्रियतमा मे।।

अत्र चूतसस्यं अचेतनमिति हेतोः तत् प्रति वचनमेतत् न सङ्गच्छते। तस्मादिदं असंबद्धं वाक्यं भवति । असंबद्धं उत्तरं यथा विक्रमोर्वशीये – तत्र हि उर्वशीविरहपीडितो विक्रमः उन्मत्तः सन् सर्वत्र तामेव अन्विषति। तदानीं किञ्चित् पर्वतो दृश्यते। तं प्रति मम प्रेयसी उर्वशी कुत्रेति पृच्छति । तस्य ध्वनिः प्रतिफलितः प्रत्यायाति, तच्च वाक्यं यथा –

सर्वक्षितिभृतां नाथ ! दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्या वनान्तेऽस्मिन् मया विरहिता त्वया।।

इदं च विक्रमदृष्ट्या पर्वतस्य उत्तरम्। पर्वताचेतन इति हेतोः वाक्येन अनेन यदुत्तरं तदसंबद्धं भवति । एवं मृच्छकटिके शकारस्य वचनेऽपि इदं स्वयं ज्ञातव्यम्। मूर्खं प्रति हितं वचनं यथा वेणीसंहारे दुर्योधनं प्रति

गान्धार्या वचनेषु। अत्र सहकारवल्ल्यां प्रद्युम्नस्य स्वप्रियारोपकं वाक्यसम्बद्धमतोऽसत्प्रलापस्येदमेकमुदाहरणम्।

एवमसम्बद्धोत्तरे द्वितीयमुदाहरणम्। तृतीयं यथा वेणीसंहारे दुर्योधनं प्रति गान्धारीवाक्यम्।।

१२. व्याहारः

इदं द्वादशमङ्गम्। अस्य लक्षणं तावदिदं–

अन्यस्य प्रयोजनं साधयितुं यत् हास्यकरं शोभकरं वा वचः तत्

**व्याहारो यत्परस्यार्थे हास्यशोभकरं वचः।**

(अन्यस्य निमित्ते यत् हासचाञ्चल्योत्पादकं वचनं हास्यलोभकरम्। तत् व्याहारो नाम वीथ्यङ्गम् ।)

येन क्षेणमुद्वेगो भवति पर्यन्ते हासा तादृशं वचनं व्याहार इत्यर्थः। अस्य उदाहरणं मालविकाग्निमित्रे वर्तते, यथा – तत्र राजा मालविकायामनुरक्तः तां स्वच्छब्दं द्रष्टुमिच्छति। तदर्थं तत्सुहृत् गौतमः हरदत्तगणदत्तयोः कलहमुत्पाद्य तच्छिष्ययोःनाट्यस्पर्धामायोजयन् मालविकाया दर्शनं व्यवस्थापयति। प्रथमं गणदासशिष्याया मालविकाया नाट्यं भवति तत इरावत्या हरदत्तशिष्यायाः। मालविका सम्यक् नाट्यं कृत्वा निर्गतुमिच्छति। तदा तद्दर्शनानुवृत्तिं सम्पादयितुमिच्छन् गौतमः तां तत्रैव क्षणमवस्थापयितुं प्रवर्तते, यथा-

विदूषकः – म तावदुपदेशशुद्धा गमिष्यसि।

(इत्युपक्रमेण)

गणदासः – (विदूषकं प्रति) आर्य! उच्यतां यस्त्वया क्रमभेदो लक्षितः।

विदूषकः– प्रथमं ब्राह्मणपूजा भवति। सा अनया लङ्घिता। (मालविकास्य मते) इत्यादिना नायकस्य विशुद्धनायिकाप्रयुक्तेन हासशोभकारिणा वचसा व्याहारः।

अत्र विदूषकस्य परस्य अग्निमित्रस्य कृते मालविकाया हास्यदर्शनार्थ प्रयुक्ताद् वाक्यात् व्याहारः।।

१३.मार्दवम्

दोषाः गुणाः गुणाश्च दोषाः स्युः

इदं त्रयोदशम् अन्तिमं अङ्गम् । अस्य लक्षणं तावदिदं –

**दोषा गुणा गुणा दोषा यत्र स्युर्मृद(मार्द) वं हि तत् ।(६.२६३)**

यस्मिन् वाक्ये दोषा गुणाः, गुणाश्च दोषाः भवेयुः तत् मृदवं नाम वीथ्यङ्कम्। तत्र दोषाणां गुणत्वं यथा-

प्रिय! जीवितताकौर्यं निःस्नेहत्वं कृतघ्नता।

भूयस्त्वद्दर्शनादेव ममैते गुणतां गताः।।

अत्र यद्यपि प्रियकरे दूरं देशे गते सति प्रियकरं विना जीवनमित्यादयो यद्यपि दोषाः, प्रियवियोगेन मरणस्यैव उचितत्वात् तथापि पुनः तत्प्राप्तिरूपस्य गुणस्य लाभे त एव दोषा गुणाः संपन्नाः। यदि मरणमभविष्यत् तर्हि पुनः प्रियस्य दर्शनं न समभविष्यदिति वियोगकालिकजीवनादीनां तद्दर्शनरूपगुणप्राप्त्या गुणत्वमिति बोध्यम्। गुणानां च दोषत्वं यथा –

तस्यास्तद्रूपसौन्दर्यं भूषितं यौवनश्रिया।
सुखैकायतनं जातं दुःखायैव ममाधुना।।

अत्र नायिकायां रूपादयो यद्यपि गुणाः तथापि तामलभमानस्य कस्यचित् विरहदुःखजननद्वारा ते दोषा एव संपन्ना इति गुणानां दोषत्वम्। इमानि तावत् त्रयोदश अङ्गानि। यद्यपि एतेषां यत्र कुत्रापि रूपकभेदे निवेशनं युज्यते, अत्रैवेति नियमो न युज्यते तथापि वीथ्यामवश्यमेतानि भवेयुः इत्यभिप्रायेण अमीषां वीथ्यङ्गत्वमुक्तमिति मन्तव्यम्। नानाविधोपकरणानाम् आधारभूता यथा वीथी तथैव शृङ्गारादीनां स्वस्वरूपत्वेन स्थितत्वात् इयं रूपकविशेषो वीथी। अस्या उदाहरणं मालविका।।

## प्रहसनम्

प्रहसनम् इत्येषः दशमः अन्तिमश्च प्रभेदः। प्रहसन्ति सहृदया अनेनेति प्रहसनम्। अस्य लक्षणं तावदिदं –

एकाङ्कः, सन्धिद्वयं, हास्यरसः

**भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम्।**
**भवेत्प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्** ।।(६.२६४)

अत्र भाणे इव सन्धयः तदङ्गानि लास्याङ्गानि अङ्काः भवन्ति। मुखं निर्वहणं चेति सन्धिद्वयं, अङ्का एको भवतीति ज्ञायते। कुत्सितानां जनानां संबन्धिकल्पितम् इतिवृत्तं भवति। अत्र आरभटी वृत्तिः न भवति। विष्कम्भकः प्रवेशका न भवति। हास्यरसात्र प्रधानः। तदुक्तं –

अत्र नारभटी, नापि विष्कम्भप्रवेशकौ।

अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा।।(६.२६५)

आरभटी तु माया इन्द्रजालं संग्रामः क्रोधः तेन उद्भ्रान्तं तदादिचेष्टितैः हननबन्धनप्रभृतिभिः व्यापारैः सहिता।

अत्र यानि वीथ्यङ्गानि प्रयुक्तानि तानि न भवन्ति। इदं च प्रहसनं शुद्धं सङ्कीर्णं चेति द्विविधम्। तत्र शुद्धे तपस्वी, संन्यासी विप्र इत्यादिषु अन्यतमो नायको भवति। स च भवति धृष्ठः, तदुक्तं –

तपस्विभागद्विप्रप्रभृतिषु नायकः।

एको यत्र भवेद्धृष्ठो हास्यं शुभमुच्यते।।

अस्मिन् प्रहसने तापसाः संन्यासिनः ब्राह्मणाः तदादिषु अन्यतमः नेता भवेत्।

(विहिताऽपराधोऽपि शङ्कारहितः भर्त्सितः अपि अवलोकितदूषणोऽपि असत्यवचनः एतादृशो जनः दृष्टनायकः कथितः।)

प्रहसनस्य भेदत्रयं – शुद्धं, सङ्कीर्णं, विकृतं च

- हास्यं प्रहसनं शुद्धं उच्यते, यथा कन्दर्पकेलिः।
- संकीर्णं प्रहसनं लक्षयति –

**आश्रित्य कञ्चन जनं सङ्कीर्णमिति तद्विदुः ।**

धृष्ठभिन्नं नायकम् आश्रित्य यत् प्रहसनं भवति तत् सङ्कीर्णम् । यथा धूर्तचरितम् ।

**वृत्तं बहूनां धृष्टानां सङ्कीर्णं केचिदूचिरे ।**
**तत्पुनर्भवति द्व्यङ्कमथवैकाङ्कनिर्मितम् ।।**(६.२६७)

मतान्तरेण सङ्कीर्णं प्रहसनं लक्षयति– वृत्तमिति। कतिपये विद्वांसः प्रभूतानां नायकानां चरित्रं यत्र भवति, तत् प्रहसनं तद्विशेषणं रूपकविशेषं जगदुः। पुनः तत् प्रहसनम् अङ्कद्वयोपेतं अथवा एकाङ्कनिर्मितं भवति। यथा लटकमेलकादिः।

- विकृतं प्रहसनं लक्षयति–

**विकृतं तु विदुर्यत्र षण्ढकञ्चुकितापसाः ।**
**भुजङ्गचारणभटप्रभृतेर्वेषवाग्युताः ।।**(६.२६८)

यस्मिन् प्रहसने नपुंसकः वारवाणधारी तपस्वी च एते विटनटयोद्धातदादेः प्रभृतिपदेन राजपुरुषादयो गृह्यन्ते। तथा च एतेषां वेषवाग्युताः नेपथ्यभाषाभिः सहिताः भवन्ति, तत्प्रहसनं विद्वांसः विकृतनायकं जानन्ति।

अत्र मुनिमतं निर्दिशति – 'इदं तु सङ्कीर्णेनैव गतार्थमिति मुनिना(भरतेन) पृथग्नोक्तम्'। (इदं विकृतप्रहसनं संकीर्णप्रहसनेन गतप्रयोजनं तत्रैव अन्तर्भूतम्।।)

## Summarised Overview

वीथीनामके रूपके एकोऽङ्कः, मुखनिर्वहणे सन्धी, कौशिकी वृत्तिः, सर्वा अर्थप्रकृतयश्च भवन्ति। वीथीनाट्ये त्रयोदशअङ्गानि सन्ति। वीथ्यङ्गेभ्यः पृथक् उद्घात्यकस्य चर्चा प्रस्तावनायाः पञ्च भेदेषु वर्तते। तत्र प्रस्तावनायाः (आमुखस्य) ये उद्घात्यक- कथोद्घात-प्रयोगातिशय-प्रवर्तकावलभितमिति पञ्चभेदाः, तेषु उद्घात्यकावलगितयोः उल्लेखः वीथ्यङ्केष्वपि भवति। प्रहसने एकोऽङ्कः, कविकल्पितमितिवृत्तं भवति। साहित्यदर्पणे नामके ग्रन्थे तु त्रयोभेदाः कीर्तिताः- शुद्धं, सङ्कीर्णं, विकृतं च। विकृतं तु संकीर्णभेदे एव गतार्थं भवतीति पृथक् नोक्तम्। विकृतभेदे षण्डकञ्चुकीतापसादीनां वेषमाकलय्य नटादयः विकृतमभिनयं कुर्वन्तीति विकृतरूपप्रयुक्तभिनयात्मकत्वाद् विकृतं नाम प्रहसनमिदमुच्यते ।।

## Assignments

1. मृदवाङ्कस्य लक्षणं सोदाहरणं विशदयत।
2. असत्प्रलापनाम्नो वीथ्यङ्गस्य लक्षणोदाहरणप्रदर्शनपूर्वकं व्याख्यानं कुरुत।
3. वीथ्यङ्गेषु किमङ्कं प्रस्तावनायां वर्णितमस्ति इति उल्लिख्य कस्याप्येकस्य लक्षणोदाहरणे प्रस्तूयताम्।
4. प्रहसनस्वरूपं विलिख्य तस्य शुद्धभेदस्य ग्रन्थानुसारेण लक्षणोदाहरणे विलिख्यताम्।

## Suggested Readings


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन् वाराणसी।
3. A Short History of Sanskrit Literature- T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
4. Dasarupaka, Dhannjaya, Chapter III, Chaukhamba Sanskrit Series, Varanasi, 2014.

# References


1. साहित्यदर्पणम् –Ed.Devadattakausika, Bharatiyavidyaprakashan, New Delhi,1978.
2. साहित्यदर्पणम् – Ed.AcharyashesharajasharmaRegmi, Krishnadas Academy, Varanasi, 1993
3. साहित्यदर्पणम् –Ed.Saligramasastri, Motilal Banarasidas, New Delhi, 1992
4. साहित्यदर्पणम् –Ed.J.R. Ballantyne Paramdasa Mitra, Motilal Banarasidas, New Delhi, 1994
5. साहित्यदर्पणम् –Ed.Acharya Krishnamohan Sastri, Chaukhamba Sanskrit Sanssthan, Varanasi, 2011


## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# साहित्यदर्पणम् परिच्छेदः- 6 (उपरूपकाणि)

## Learning Outcomes

- भारतीयोपरूपकान् अधिकृत्य ज्ञानं प्राप्नोति।
- नाटिकादि उपरूपकभेदान् अधिकृत्य विस्तरेण जानाति।
- रचनादृष्ट्या कृतान् भेदान् जानाति।
- अभिनयप्रकारान् ज्ञास्यति।।

## Background

भासादारभ्य लोकमणिपर्यन्तं सन्त्यनेकैः कविभिः प्रणीतानि विविधानि रूपकाणि ज्ञातानि तथैव संभवन्ति कतिपयानि अज्ञातान्यपि वा कालकवलितानि। तानि च रूपकाणि सन्ति दशसु मुख्यभेदेषु विभक्तानि अष्टादशसु उपभेदेषु च। तत्र नाटक- प्रकरण- भाण- व्यायोग- समवकार- डिम- ईहामृग- अङ्क- वीथी- प्रहसनाख्या रूपकस्य मुख्यभेदाः। तथैव नाटिका- त्रोटक- गोष्ठी- सट्टक- नाट्यरासक- प्रस्थान- उल्लाप्य- काव्य- प्रेङ्घण- रासक- संलापक- श्रीगदित- शिल्पक- विलासिका- दुर्मल्लिका- प्रकरणी- हल्लीश- भाणिकाख्यानि अष्टादश उपरूपकाणि। तानि चेत्थम्–

नाटिका क्लृप्तवृत्ता स्त्रीप्राया चतुरङ्किका। अत्र धीरललितः प्रख्यातो नायकः। त्रोटकं हि सप्ताष्टनवञ्चाङ्कं दिव्यमानुषसंश्रयं प्रत्यङ्कं सविदूषकम् । गोष्ठी कामशृङ्गारयुक्ता नोदात्तवचना प्राकृतैः पुरुषैः युक्ता। सट्टकं हि प्राकृताशेषपाठ्यमप्रवेशकम्। नाट्यरासकं हि बहुगेयं हास्यप्रधानञ्च। प्रस्थानं हीननायकं दासीनायिकञ्च। उल्लाप्यं हि एकाङ्कम् उदात्तनायकम्। काव्यमेकाङ्कं स्त्रीनायकम्। प्रेङ्घणमसूत्रधारं हीननायकं च। रासकं हि पञ्चपात्रयुतं मूर्खनायकं च। संलापकं हि चतुरङ्कं पाखण्डनायकम्। श्रीगदितं हि प्रख्यातनायकद्वययुक्तम्। शिल्पकं चतुरङ्कं ब्राह्मणनायकम्। विलासिका शृङ्गारभूयिष्ठा एकाङ्का। दुर्मल्लिका चतुरङ्का कौशिकीवृत्तियुता। प्रकरणी सार्थवाहादिनायका। हल्लीशः एकाङ्कः स्त्रीबहुलः। भाणिका हि भाणवद्दृपता।।

## Keywords

क्लृप्तवृत्ता, स्त्रीप्राया, दिव्यमानुषसंश्रयं, उदात्तवचना, प्राकृताशेषपाठ्यं, बहुगेयं, मूर्खनायकः, पाखण्डनायकः, प्रख्यातनायकः, कौशिकीवृत्ति, सार्थवाहादिनायका।।

## Discussion

### उपरूपकाणि

**नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकं**
**प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा।**
**संलापकं श्रीगदितं शिल्पकं च विलासिका**
**दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च।**
**अष्टादश प्राहुरुपरूपकाणि मनीषिणः**
**विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्।।**

१.नाटिका

वृत्तं कल्पितं,
चत्वारः अङ्काः,
चत्वारः सन्धयः

दशरूपके प्रकरणनाटकयोर्मिलितं रूपं नाटिका इत्युक्तम्। नायके प्रख्यातिवंशे सत्यपि वृत्तं तस्य कल्पितमुपादीयते । संस्कृते महाराजहर्षस्य रत्नावली प्रियदर्शिका चेति नाटिकाद्वयं प्रसिद्धम्। अस्याः लक्षणं तु -

**नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।**
**प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ।।(६.२६९)**

**अन्वयः** - क्लृप्तवृत्ता स्त्रीप्राया चतुरङ्किका नाटिका स्यात्। तत्र प्रख्यातः धीरललितः नृपः नायकः स्यात्।

**अर्थः** – कविकल्पितं नायकादिचरितं यस्या सा, नारीप्रचुरा चत्वारः अङ्काः यस्या सा नाटिका भवेत्। तस्यां नाटिकायां प्रसिद्धः धीरललितः राजा नायकः स्यात्।।

धीरललितस्य लक्षणं तु– निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्। (राज्यचिन्तारहितः, कोमलस्वभावः निरन्तरं नृत्यगीताद्यासक्तः नायकः धीरललितः। यथा रत्नावल्यादौ वत्सराजादिः। वत्सराजः उदयनः।)

अस्यां(नाटिकायां) नायकानायिकौ –

**स्यादन्तःपुरसंबद्धा सङ्गीतव्यापृताथवा।**
**नवानुरागा कन्यात्र नायिका नृपवंशजा ।।(६.२७०)**

**अन्वयः** – अत्र अन्तःपुरसंबद्धा अथवा सङ्गीतव्यापृता नवानुरागा नृपवंशजा कन्या नायिका ।

**अर्थः** – अस्यां नाटिकायां शुद्धान्तसंबन्धयुक्ता अथवा नृत्यगीतवाद्यासक्ता नूनप्रयणपरा राजकुलोत्पन्ना कुमारी नायिका ।।

**सम्प्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः।**
**देवी भवेत्पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा ।।(६.२७१)**

अन्वयः – नेता देव्याः त्रासेन शङ्कितः अस्यां संप्रवर्तेत । देवी प्रगल्भा नृपवंशजा ज्येष्ठा भवेत्।

**अर्थः** – नायकः कृताऽभिषेकाया राज्ञ्याः भयेन शङ्कायुक्तः सन् नवाऽनुरागायां नायिकायां आचरेत्। कृताऽभिषेका राज्ञी, प्रगल्भा (स्मराऽतिशयेन धार्ष्ट्यं प्रकर्षयतीति प्रगल्भा) राजकुलोत्पन्ना नवप्रणयोपेताया नायिकाया ज्यायसी भवेत्।

प्रगल्भा षड्विधा – स्मराऽन्धा, गाडतारुण्या, समस्तरतकोविदा, भावोन्नता, दरव्रीडा, आक्रान्तनायका चेति।

कौशिकीवृत्तिः

**पदे पदे मानवती, तद्वशः सङ्गमो द्वयोः।**
**वृत्तिः स्यात्कैशिकी, स्वल्पविमर्शाः सन्धयः पुनः ।।(६.२७२)**

**अन्वयः** - पदे पदे मानवती, तद्वशः द्वयोः सङ्गमः। वृत्तिः कौशिकी स्यात्, पुनः स्वल्पविमर्शः सन्धयः।।

**अर्थः** – सा च ज्येष्ठा नायिका, प्रतिपदम् अभिमानसंपन्ना भवेत्। उभयोः (नवनायिकानायकयोः) समागमः भवेत्। वृत्तिः कौशिकी स्यात्, पुनः स्तोकविमर्शसन्धियुक्ताः मुखप्रतिमुखगर्भोपसंहृतिसन्धयः भवन्ति।।

यथा रत्नावली –विद्धशालभञ्जिकादिः।

कौशिकी –

**या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंकुला पुष्कलनृत्यगीता ।**
**कामोपभोगप्रभवोपचारा सा कौशिकी चारुविलासयुक्ता।।**
**(६.१२४)**

अर्थः – या सूक्ष्मः नायिकादिभूषणविशेषः अद्भुता नारीबहुला प्रचुराणि नर्तनगानानि यस्यां सा, शृङ्गारकारणभूतव्यवहारा यस्यां सा, मनोहराः शृङ्गारचेष्टा सहिता वृत्तिः कौशिकी।।

**२. त्रोटकम्**

विदूषकसहितम् उपरूपकं त्रोटकम्

दिव्यमानुषसंश्रयं, पञ्चाङ्कतोऽन्यूनं प्रत्यङ्कं सविदूषकञ्च भवति। तदुक्तं दर्पणे -

> **सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् ।**
> **त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम् ।।**(६.२७३)

**अन्वयः** - सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयं प्रत्यङ्कं सविदूषकं तत् त्रोटकं नाम प्राहुः।

**अर्थः** – सप्त अष्टौ नव पञ्च वा अङ्कोपेतं देवमनुष्योभयवृत्ताश्रितं सर्वेष्वपि अङ्केषु विदूषकसहितम् उपरूपकं त्रोटकमिति प्रत्याहुः।।

त्रोटकेऽस्मिन् शृङ्गारः प्रधानरसः। पञ्चाङ्कं यथा कालिदासस्य विक्रमोर्वशीयम् , सप्तताङ्कं यथा अज्ञातकर्तृकं स्तम्भितरम्भञ्च।

**३. गोष्ठी**

प्रहसनशृङ्गारेण संयुक्ता एकाङ्केन रचिता उपरूपकः

पञ्चषड्योषिदन्विता, नवर्दशभिर्वा प्राकृतपात्रैर्युक्ता, एकाङ्कविनिर्मिता च भवति, तदुक्तं –

> **प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलंकृता ।**
> **नोदात्तवचना गोष्ठी कौशिकीवृत्तिशालिनी ।।**(६.२७४)

**अन्वयः** – प्राकृतैः नवभिः वा दशभिः पुंभिः अलंकृता नोदात्तवचना कौशिकीवृत्तिशालिनी गोष्ठी।

**अर्थः** – साधारणैः नवभिः अथवा दशभिः पुरुषैः भूषिता अनुदातवचना कौशिकीवृत्तिशालिनी उपरूपकभेदः गोष्ठी।।

> **हीना गर्भविमर्शाभ्यां पञ्चषड्योपिदन्विता ।**
> **कामशृङ्गारसंयुक्ता स्यादेकाङ्कविनिर्मिता ।।**(६.२७५)

**अन्वयः**–गर्भविमर्शाभ्यां हीना पञ्चषड्योपिदन्विता कामशृङ्गारसंयुक्ता एकाङ्कविनिर्मिता स्यात्।

**अर्थः–** गर्भविमर्शसन्धिभ्यां रहिता (मुखप्रतिमुखोपसंहृतयः) पञ्चभिः षड्भिः वा स्त्रीभिः युक्ता तथा प्रहसनशृङ्गारेण संयुक्ता एकाङ्केन रचिता उपरूपको भवति गोष्ठी।।

यथा रैवतमदनिका।।

**४. सट्टकम्**

प्राकृतभाषायां रचितम् उपरूपकम्

प्राकृताशेषपाठ्या नाटिका सट्टकं नाम । तद्यथा –

**सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।**
**न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ।।(६.२७६)**

**अन्वयः** – प्राकृताशेषपाठ्यं अप्रवेशकं सट्टकं स्यात्। अत्र विष्कम्भको न, अद्भुतो रसश्च प्रचुरः।।

**अर्थः** – प्राकृतभाषायां समस्तं अविद्यमानः प्रवेशकः यस्मिन् तत् उपरूपकं सट्टकं स्यात्। अस्मिन् प्रवेशको न अद्भुतो रसश्च प्रचुरो भवति।

अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम्।

अत्र अङ्काः जवनिकानामकाः स्युः। अन्यत् नाटिकासदृशमेव। यथा राजशेखरस्य कर्पूरमञ्जरी।।

**५. नाट्यरासकम्**

नाट्यरासकमेकाङ्कं बहुताललयस्थिति ।।(६.२७७)

धीरोदात्तः नेता तद्वत् पीठमर्दः उपनायकः

एकः अङ्कः यस्मिन् तत् प्रचुराणां काललयानां (तालः= कालक्रियामानम्, लयः = साम्यं) अवस्थानं यस्मिन् तत् नाट्यरासकम्।

**उदात्तनायकं तद्वत्पीठमर्दोपनायकम्।**
**हास्योऽङ्ग्यत्र सशृङ्गारो नारी वासकसज्जिका ।।(६.२७८)**

**अन्वयः** – उदात्तनायकं तद्वत्पीठमर्दोपनायकम् अत्र सशृङ्गारो हास्यो वासकसज्जिका नारी।।

पीठमर्दः – नायकसहायकप्रसङ्गे पीठमर्दं लक्षयति।(३.३९) नायकस्य बहुव्यापिनि प्रसङ्गगतचरित्रे स्तोकनायकगुणरहितः पीठमर्दनायकः, शृङ्गाररसेतरः सहायक एव।

वासकसज्जिका- परिष्कृते निवासभवने नायिकायाः अलङ्करणं विदधाति इति सखी। ज्ञातकान्तसमागमा नायिका तु वासकसज्जका।

**अर्थः** – धीरोदात्तः नेता यस्मिन् तत् तद्वत् पीठमर्दः उपनायको यस्मिन् तत् तादृशमुपरूपकं नाट्यरासकं स्यात्। अस्मिन् शृङ्गारसहितः हास्यो रसः प्रधानं वासकसज्जिका इत्युक्तलक्षणलक्षिता स्त्री नायिका भवति ।।

> **मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च।**
> **केचित्प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम् ।।**(६.२७९)

**अन्वयः** - मुखनिर्वहणे सन्धी दशापि च लास्याङ्गानि। केचित् इह प्रतिमुखं सन्धि केवलं न इच्छन्ति।।

**अर्थः** - मुखनिर्वहणे सन्धी दशापि च लास्याङ्गानि उद्घात्यकानि स्युः। कतिपयाचार्याः नाट्यरासकेऽस्मिन् प्रतिमुखं सन्धि एव न इच्छन्ति, अन्यान् मुख-गर्भ-विमर्शोपसंवृत्याख्यान् चत्वारः सन्धीस्तु इच्छन्तीति भावः।।

तत्र सन्धिद्वयवती यथा नर्मवती, विलासवती सन्धिचतुष्टयवती।।

**६. प्रस्थानकम्**

किङ्करः नायकः, नायिका दासी, द्वौ अङ्कौ

हीनो नायकः, दासी नायिका, सुरापानं विषयः सर्वमिदं प्रस्थानके भवति। तदुक्तं दर्पणे –

> **प्रस्थाने नायको दासो हीनः स्यादुपनायकः।**
> **दासी च नायिका, वृत्तिः कौशिकी भारती तथा।।**

**अन्वयः** –प्रस्थाने दासः नायकः हीनः स्यात्। उपनायकः नायिका दासी तथा वृत्तिः कौशिकी भारती च।।

**अर्थः** –प्रस्थाने किङ्करः नायकः, दासादपि निकृष्टः, उपनायकः, नायिका दासी, कौशिकी भारती च।।

> **सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः।**
> **अङ्कौ द्वौ लयतालादिविलासो बहुलस्तथा ।।**(६.२८१)

**अन्वयः** – सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः। द्वौ अङ्कौ लयतालादि तथा बहुलः विलासः।।

**अर्थः** – मदिरापानसम्बन्धात् आरब्धविषयस्य उपसंहारः कर्तव्यः। द्वौ अङ्कौ साम्यकालक्रियामानादिः कर्तव्यः। तथा प्रचुरः शृङ्गारचेष्टाविशेषः भवेत्।।

यथा शृङ्गारतिलकम्।

७. उल्लाप्यम्

हास्यशृङ्गारकरुणैः रसैः युतं उपरूपकं

उदात्तनायकं एकाङ्कं संग्रामरोदनगीतादिबहुलञ्च भवति। तदुक्तं –

**उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् ।**
**शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणै रसैः ।।(६.२८२)**

**अन्वयः** - उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणै रसैः।।

**अर्थः** – धीरोदात्तनेता यस्मिन् तत्, देवविषयकं चरित्रं यस्मिन् तत्,एकाङ्केन भूषितं शिल्पकस्य (वक्ष्यमाणस्य उपरूपकविशेषस्य) आशंसादिभिः सहितं तथा हास्यशृङ्गारकरुणैः रसैः युतं उपरूपकं भवति उल्लाप्यम्।।

**उल्लाप्यं बहुसंग्राममस्रगीतमनोहरम् ।**
**चतस्रो नायिकास्तत्र त्रयोऽङ्का इति केचन।।(६.२८३)**

**अन्वयः** – बहुसंग्रामं अस्रगीतमनोहरं उल्लाप्यम् । तत्र चतस्रो नायिका, केचन त्रयोङ्का इति।।

**अर्थः** – प्रचुराः युद्धानि यस्मिन् तत् अस्रगीतेन मनोहरं उपरूपकं उल्लाप्यम्। तस्मिन् उल्लाप्ये चतस्रो नायिका भवन्ति, कतिपये विद्वांसस्तु त्रयोङ्का इति वदन्ति।।

अस्रगीतं – अन्तर्जवनिकं गीतमस्रगीतम्।

यथा देवीमहादेवम्।।

८. काव्यम्

एकाङ्कं, हास्यसंकुलं, भरतोक्तैः गीतविशेषणैः भूषितं

एकाङ्कं स्त्रीनायकं आरभटीहीनञ्च काव्यं नामोरिपकम् ।

**काव्यम् आरभटीहीनमेकाङ्कं हास्यसंगुलम् ।**
**खण्डमात्राद्विपादिकाभग्नतालैरलंकृतम् ।।(६.२८४)**

**अन्वयः** – आरभटीहीनं एकाङ्कं हास्यसंकुलं खण्डमात्राद्विपादिकाभग्नतालैरलंकृतम् काव्यम्।।

**अर्थः** – आरभट्या वृत्या रहितं एकोऽङ्को यस्मिन् तत् हास्यरसेन व्याप्तं खण्डमात्रा, द्विपदिका,भग्नतालानि इत्यादीनि भरतोक्तैः गीतविशेषणैः भूषितं उपरूपकं भवति काव्यम्।।

**वर्णमात्राछड्डुलिकायुतं शृङ्गारभाषितम् ।**
**नेता स्त्री चाप्युदात्ताऽत्र सन्धी आद्यौ तथान्तिमः।।**

**अन्वयः** - वर्णमात्राछड्डुलिकायुतं शृङ्गारभाषितम्। अत्र नेता उदात्तः स्त्री, तथा च आद्यौ सन्धी तथा अन्तिमः।।

**अर्थः** – वर्णमात्राछड्डुलिके (छन्दोविशेषौ) सहितं, शृङ्गाररसेन भाषणं यस्मिन् तत् तादृशमुपरूपकं काव्यं भवेत्। अत्र नायकः धीरोदात्तः योषित् च उदात्ता धीरोदात्तनायिका। तथा च प्रथमद्वितीयौ मुखप्रतिमुखे सन्धी तथा अन्तिमः (चरमः) निर्वहणं सन्धिर्भवेत्।।

यथा यादवोदयम्।।

**९. प्रेङ्खणम्**

हीननायकम् असूत्रधारञ्च । यथा –

असूत्रधारं एकाङ्कं उपरूपकम्

**गर्भविमर्शरहितं प्रेङ्खणं हीननायकम् ।**
**असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम्।।(६.२८६)**

**अन्वयः** – गर्भविमर्शरहितं हीननायकं असूत्रधारं एकाङ्कं अविष्कम्भप्रवेशकं प्रेङ्खणम्।।

**अर्थः** – गर्भविमर्शाभ्यां (तृतीयचतुर्थसन्धिभ्यां) शून्यं–मुखप्रतिमुखनिर्वहणसन्धियुतं अधमः नेता यस्मिन् तत् सूत्रधाररहितं एक एवाङ्क यस्मिन् तत् विष्कम्भकप्रवेशकाख्याभ्याम् अर्थोपक्षेपकाभ्यां रहितं भवति प्रेङ्खणम्।।

**नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम्।**
**नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना।। (६.२८७)**

**अन्वयः** - नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितं, नान्दी प्ररोचना नेपथ्ये गीयते ।।

**अर्थः** – बाहुयुद्धेन रोषभाषणेन सहितं सकलाभिः वृत्तिभिः संयुक्तं उपरूपकं प्रेङ्खणम्। आशिर्वचनसंयुक्ता वेषपरिवर्तनस्थाने गानविषयीक्रियते इति।।

यथा बालिवधम्।।

**१०. रासकम्**

पञ्चपात्रयुतं भाषाविभाषाबहुलं ख्यातनायिकं मूर्खनायकञ्च।

पञ्चपात्रम्, असूत्रधारमेकाङ्कं

**रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम् ।**
**भाषाविभाषाभूयिष्ठं भारतीकौशिकीयुतम् ।।(६.२८८)**

**अन्वयः** – पञ्चपात्रं मुखनिर्वहणान्वितं भाषाविभाषाभूयिष्ठं भारतीकौशिकीयुतं स्यात् रासकम्।।

**अर्थः** –पञ्चपात्राणि यस्मिन् तत् मुखनिर्वहणाभ्यां (प्रथमपञ्चसन्धिभ्यां) युक्तं संस्कृतप्राकृतभाषाभ्यां प्रचुरं भारतीकौशिकीभ्यां वृत्तिभ्यां युतं स्यात् रासकम् ।।

**असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलान्वितम्।**
**श्लिष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकम् ।।(६.२८९)**

**अन्वयः** - असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलान्वितं श्लिष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकम्।।

**अर्थः** – सूत्रधाररहितं, एकोऽङ्को यस्मिन् तत्, वीथ्यङ्गैः सहितं, कलाभिः (नृत्यगीताभिः) युक्तं, श्लेषयुक्तास्तुतिविशेषरूपायुतं, प्रसिद्धा नायिका यस्मिन् तत् मूर्खः(बालिशः) नायको यस्मिन् तत् उपरूपकं रासकम् आहुः।।

**उदात्तभावविन्याससंश्रितं चोत्तरोत्तरम् ।**
**इह प्रतिमुखं सन्धिमपि केचित्प्रचक्षते ।।(६.२९०)**

**अन्वयः** – उत्तरोत्तरं उदात्तभावविन्याससंश्रितं, इह केचित् प्रतिमुखं सन्धिमपि प्रचक्षते।।

**अर्थः** – उत्तरस्मात् उत्तरं नायिकामहत्वस्य संस्थितिसमन्वितं उपरूपकं रासकं स्यात्। रासकेऽस्मिन् आचार्याः प्रतिमुखं सन्धिमपि वदन्ति।।

यथा मेनकाहितम्।।

**११. संलापकम्**

चतुरङ्कं, पाखण्डनायकं, पुरसंरोधसंग्रामवर्णनापरं भवति।

चत्वारः त्रयो वा अङ्काः, नायकः आचारत्यागी

**संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः ।**
**पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः ।।(६.२९१)**

**अन्वयः** – संलापके चत्वारः त्रयो वा अङ्काः। नायकः पुनः पाषण्डः। तत्र शृङ्गारकरुणेतरः रसः स्यात् ।।

अर्थः – उपरूपकविशेषे संलापके चत्वारः त्रयो वा अङ्काः स्युः। नायकः पुनः आचारत्यागी स्यात्। तस्मिन् संलापके शृङ्गारकरुणाभ्याम् अन्यः रसः स्यात् ।।

**भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः।**
**न तत्र वृत्तिर्भवति भारती न च कौशिकी ।।(६.२९२)**

अन्वयः – पुरसंरोधः छलं संग्राम'विद्रवाः भवेयुः। तत्र भारती वृत्तिः न भवति कौशिकी वृत्तिश्च नो भवति।।

अर्थः – नगराऽवरोधः प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलनाच्छलं युद्धं शङ्काभयत्रासकृतः भवेयुः । तस्मिन् संलापके भारती वृत्तिः न भवति कौशिकी वृत्तिश्च नो भवति ।।

यथा मायाकापालिकम् ।।

१२.श्रीगदितम्

वृत्तनायकौ प्रख्यातौ नायिकाऽपि प्रसिद्धा, श्रीशब्दयुतं च पद्यं भवत्यत्र ।

एकाङ्कं, धीरोदात्तः नायकः, श्रीपदेन व्याप्तम्

**प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम् ।**
**प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम् ।।(६.२९३)**

अन्वयः - प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकं प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम्।।

अर्थः – प्रसिद्धं चरितं यस्मिन् तत् एकाङ्कं प्रसिद्धः धीरोदात्तः नायकः यस्मिन् तत् प्रसिद्धा नायिका यस्मिन् तत् तृतीयचतुर्थसन्धिभ्यां रहितं उपरूपकं भवति श्रीगदितम्।।

**भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलम् ।**
**मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम् ।।(६.२९४)**

अन्वयः - भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलम् विद्वद्भिरुपरूपकम् श्रीगदितं नाम मतम् ।

अर्थः – भारतीवृत्या प्रचुरं श्रीपदेन(प्रीतिपदेन) व्याप्तं उपरूपकं विपश्चिद्भिः श्रीगदितं नाम अभिमतम्।।

यथा क्रीडारसातलम्।।

श्रीगदिते मतान्तरेण लक्षणं प्रदर्शयति –

श्रीरासीना श्रीगदिते गायेत्किञ्चित्पठेदपि ।
एकाङ्को भारतीप्राय इति केचित्प्रचक्षते ।।(६.२९५)

**अन्वयः** – श्रीगदिते आसीना श्रीः किञ्चित् गायेत्, पठेदपि भारतीप्राय एकाङ्को इति केचित् प्रचक्षते।।

**अर्थः** – उपरूपकविशेषे श्रीगदिते उपविष्टश लक्ष्मीवेषधारिणी नटी किञ्चित् गायेत्, किञ्चित् पठेदपि भारतीवृत्तिप्रचुरः एकाङ्को भवतीति विद्वांसः प्रवदन्ति।।

ऊहयमुदाहरणम्।।

**१३.शिल्पकम्**

चतुरङ्कं ब्राह्मणनायकं श्मशानवर्णनयुतं भवति शिल्पकम्।

**चत्वारः शिल्पकेऽङ्काः स्युः चतस्रो वृत्तयस्तथा ।**
**अशान्तहास्याश्च रसा नायको ब्राह्मणो मताः ।।(६.२९६)**

चत्वारोऽङ्काः,
चतस्रो वृत्तयः,
सप्तविंशतिरङ्गानि

**अन्वयः** – शिल्पके चत्वारोऽङ्काः तथा चतस्रो वृत्तयः। अशान्तहास्याः रसाः स्युः ब्राह्मणो नायको मताः।।

**अर्थः** – शिल्पके चत्वारोऽङ्काः तथा कैशिक्याद्याः चतस्रो वृत्तयः भवन्ति। शान्तहास्यरहिताः शृङ्गारादयः भवेयुः। ब्राह्मणो नायको भवति।।

**वर्णनात्र श्मशानोदेर्हीनः स्यादुपनायकः।**
**सप्तविंशतिरङ्गानि भवन्त्येतस्य तानि तु ।।(६.२९७)**

**अन्वयः** –अत्र श्मशानादेः वर्णना। हीनः उपनायकः स्यात्। एतस्य सप्तविंशतिरङ्गानि भवन्ति। तानि तु –

**अर्थः** – अस्मिन् शिल्पके पितृवनादेः (शवादेर्ग्रहणं) कीर्तनम् । अधमः उपनायकः स्यात्। अस्य सप्तविंशतिरङ्गानि सन्ति । तानि तु वक्ष्यमाणेन श्लोकेन निर्दिशति।

**आशंसातर्कसन्देहतापोद्वेगप्रसक्तयः।**
**प्रयत्नगथनोत्कण्ठावहित्थाप्रतिपत्तयः ।।(६.२९८)**

**विलासालस्यबाष्पाणि प्रहर्षाश्वासमूढताः।**
**साधानानुगमोच्छ्वासविस्मयप्राप्तयस्तथा।।(६.२९९)**

**लाभविस्मृतिसंफेटा वैशारद्यं प्रबोधनम् ।**
**चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते ।।(६.३००)**

**अन्वयः** – आशंसा, तर्कः, संदेहः, तापः, उद्वेगः, प्रसक्तिः, प्रयत्नः, ग्रथनं, उत्कण्ठा, अवहित्था, प्रतिपत्तिः, विलासः, आलस्यं, बाष्पं, प्रहर्षः, आश्वासः, मूढता, साधनानुगमः, उच्छ्वासः, विस्मयः, प्राप्तिः, लाभः, विस्मृतिः, संफेटः, वैशारद्यं, प्रबोधनं, चमत्कृतिः च अमीषां स्पष्टत्वात् लक्ष्म न उच्यते ॥

**अर्थः** - आशंसा, तर्कः, संदेहः, तापः, उद्वेगः, प्रसक्तिः, प्रयत्नः, ग्रथनं(करणीयविषयाणाम् उपस्थापनं, पुटः ४७१), उत्कण्ठा, अवहित्था, प्रतिपत्तिः, विलासः, आलस्यं, बाष्पं, प्रहर्षः, आश्वासः, मूढता, साधनानुगमः, उच्छ्वासः, विस्मयः, प्राप्तिः, लाभः, विस्मृतिः, संफेटः, वैशारद्यं, प्रबोधनं, चमत्कृतिः च एतेषाम् अङ्गानां स्फुटत्वात् लक्षणं न उच्यते ॥

यथा कनकावतीमाधवः ॥

## १४. विलासिका

एकाङ्का शृङ्गारबहुला च भवति विलासिका ।

शृङ्गाररसप्रचुरा एकाङ्का

**शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता ।**
**विदूषकविटाभ्यां च पीठमर्देन भूषिता ॥(६.३०१)**

**अन्वयः** - शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता, पीठमर्देन विदूषकविटाभ्यां च भूषिता॥

**अर्थः** – शृङ्गाररसप्रचुरा एकाङ्का दशलास्याङ्गानि तैः संयुता पीठमर्देन विदूषकविटाभ्यां च अलङ्कृता विलासिका॥

**हीना गर्भविमर्शाभ्यां सन्धिभ्यां हीननायका ।**
**स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका ॥(६.३०२)**

**अन्वयः** - गर्भविमर्शाभ्यां सन्धिभ्यां हीना स्वल्पवृत्ता हीननायका सा विलासिका विख्याता॥

**अर्थः** – मुखप्रतिमुखनिर्वहणसन्धियुक्ता, स्वल्पं चरित्रं पद्यं वा यस्यां सा शोभनं वेषं यस्यां सा विलासिकेति विख्याता॥

केचिदाचार्याः तु विलासिका इति उपरूपकस्य स्थाने विनायिकेति पदं प्रयुक्तम्। अन्ये तु विलासिकायाः तु दुर्मल्लिकायाम् अन्तर्भावं निश्चिनोति। उदाहरणग्रन्थो न प्रसिद्धः ॥

१५. दुर्मल्लिका

चतुरङ्का, कौशिकीवृत्तिशालिनी ।

चत्वारोऽङ्का
आरभटीरहिता
गर्भसन्धिरहिता

> **दुर्मल्ली चतुरङ्का स्यात् कौशिकीभारतीयुता।**
> **अगर्भा नागरनरा न्यूननायकभूषिता ।।(६.३०३)**

**अन्वयः** – चतुरङ्का कौशिकीभारतीयुता अगर्भा नागरनरा न्यूननायकभूषिता दुर्मल्ली स्यात्।।

**अर्थः** – चत्वारोऽङ्का यस्यां सात्वत्यारभटीरहिता गर्भसन्धिरहिता (मुखप्रतिमुखविमर्शनिर्वहणसन्धिसहिता) नागराः जनाः यस्यां सा जात्यापकृष्टनायकभूषिता दुर्मल्ली स्यात्।।

> **त्रिनालिः प्रथमोऽङ्कास्यां विटक्रीडामयो भवेत् ।**
> **पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान्।।(६.३०४)**

**अन्वयः** – अस्यां प्रथमोऽङ्कः त्रिनालिः, विटक्रीडामयो भवेत्। द्वितीयोऽङ्कः पञ्चनालिः विदूषकविलासवान्।।

**अर्थः** –अस्यां दुर्मल्लिकायां प्रथमोऽङ्के तिस्रो नायकाः, स च विटकेलिप्रचुरः भवेत्। द्वितीयोऽङ्कः द्वितीयोऽङ्कः पञ्च नालयो यस्मिन् सः, स च विदूषकस्य व्यवहारसंपन्नः इत्यर्थः।।

> **षण्णालिकस्तृतीयस्तु पीठमर्दविलासवान् ।**
> **चतुर्थो दशनालिः स्यादङ्कः क्रीडितनागरः।।(६.३०५)**

**अन्वयः** – तृतीयस्तु षण्णालिकः पीठमर्दविलासवान् चतुर्थोऽङ्कः दशनालिः क्रीडितनागरः स्यात्।।

**अर्थः** – तृतीयस्तु अङ्कः षड् नालयो यस्मिन् सः (द्वादशघटिकानिष्पाद्य इति) पीठमर्दविलासवान् चतुर्थोऽङ्कः दशनालयो यस्मिन् सः (विंशतिघटिकानिष्पाद्य इति) क्रीडायुक्ताः नगरजनाः यस्मिन् सः स्यात्।।

यथा बिन्दुबमती।।

१६. प्रकरणिका

सार्थवाहादिनायका
नाटिका

> **नाटिकैव प्रकरणी सार्थवाहादिनायका।**
> **समानवंशजा नेतुभवेद्यत्र च नायिका ।।(६.३०६)**

**अन्वयः** – सार्थनाहादिनायका नाटिका प्रकरणी। यत्र नायिका नेतुः समानवंशजा भवेत्।।

अर्थः –सार्थवाहः (वणिक्) आदिः नायकः यस्यां सा – सार्थवाहादिनायका नाटिका एव प्रकरणी भवेत्। प्रकरण्यां नायिका, नायकस्य सदृशकुलोत्पन्नाभवेत्।।

अत्र दृष्टान्तः – मृग्यम्।।

१७.हल्लीशः

हल्लीश एक एवाङ्कः, सप्ताष्टौ दश वा स्त्रियः।

एक एव अङ्कः, सप्त अष्टौ अथवा दश स्त्रियः, एक एव नटः

**वागुदात्तैकपुरुषः कौशिकीवृत्तिरुज्वला।**
**मुखान्तिमौ तथा सन्धी बहुताललयस्थितिः ।।(६.३०७)**

**अन्वयः** – हल्लीशे एक एवाङ्कः, सप्ताष्टौ दश वा स्त्रियः। उदात्ता वाक्, एकपुरुषः उज्ज्वला कौशिकीवृत्तिः। तथा मुखान्तिमौ सन्धी बहुताललयस्थितिः।।

**अर्थः** – हल्लीशे उपरूपके एक एव अङ्कः, सप्त अष्टौ अथवा दश स्त्रियो भवेयुः। उत्कृष्टा, संस्कृतं शौरसेनी भाषा भवेत् । एक एव नटः सुव्यक्ता कौशिकी वृत्तिः। तथा मुखनिर्वहणाख्यौ सन्धी, बहूनां(अनेकप्रकाराणां) ताललयानां अवस्थानं च भवतीति।।

यथा केलिरैवतकम्।।

**१८. भाणिका**

**भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता ।**
**कौशिकीभारतीवृत्तियुक्तैकाङ्कविनिर्मिता ।।(६.३०८)**

एकाङ्केन विरचिता, सप्त अङ्गयुक्तम्

**अन्वयः** - श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता कौशिकीभारतीवृत्तियुक्ता एकाङ्कविनिर्मिता भणिका ।।

**अर्थः** – सूक्ष्मं वेषः यस्यां सा मुखनिर्वहणसन्धिभ्यां युक्ता कौशिकीभारतीवृत्तिभ्यां युक्ता एकाङ्केन विरचिता उपरूपका भाणिका।।

**उदात्तनायिका मन्दपुरुषात्राङ्गसप्तकम् ।**
**उपन्यासोऽथ विन्यासो बिबोधः साध्वसं तथा ।।(६.३०९)**

**अन्वयः** – उदात्ता मन्दपुरुषा नायिका। अत्र अङ्गसप्तकम्। अथ उपन्यासः विन्यासः विबोधः साध्वसम्।।

**अर्थः** – उत्तमा नायिका यस्यां सा, हीनः नायकः यस्यां सा भाणिका भवति। भाणिकायाम् अङ्गसप्तकं भवेत्। तान्यङ्गानि यथा – उपन्यासः,

विन्यासः, विबोधः, साध्वसम् चेति। समर्पणं निवृत्तिश्च संहार इति सप्तमः।

उपन्यासः प्रसङ्गेन भवेत्कार्यस्य कीर्तनम् ।(६.३१०)

- उचितावसरेण कार्यस्य कीर्तनम् उपन्यासः भवेत् ।

निर्वेदवाक्यव्युत्पत्तिः विन्यासः इति स स्मृतः ।

- निर्वेदवाक्यस्य व्युत्पत्तिः(प्रपञ्चनं) स विन्यासः ।

निर्वेदं लक्षयति –

**'तत्त्वज्ञानापदीष्यादेर्निर्वेदः स्वावमाननम् ।**
**दैन्यचिन्ताश्रु निःश्वासवैवर्ण्योच्छ्वसितादिकृत् ।।**(३.१४२)

**अर्थः** – यथार्थवस्तुबोधः विपत्तिः अक्षान्त्यादेः (आदिशब्देन पुराणश्रवणादेः परिग्रहः) दीनता आध्यायनं

- भ्रान्तिनाशो विबोधः स्यान्मिथ्याखयानं तु साध्वसम् ।(६.३११)

भ्रमनिवृत्तिः विबोधः, अनृतकथनं तु साध्वसं भवेत् ।

अस्याम् अमर्षबाधया आक्षेपयुक्तवचनं समर्पणम्

- सोपालम्भवचः कोपपीडयेह समर्पणम्।
- निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ।(६.३१२)

(दृष्टान्तस्य उपस्थापनं निवृत्तिः इति च कथ्यते ।)

संहार इति च प्राहुर्यत्कार्यस्य समापनम्।

आरब्धकृत्यस्य समाप्तिकरणं तत् संहार इति प्राहुः। यथा कामदत्ता।।

एतेषां सर्वेषां प्रकरणादीनां रूपकविशेषाणां, नाटिकादीनां उपरूपकविशेषाणां 'विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतं'(६.६) इत्युक्त्या समस्तानां औचित्यमनतिक्रम्य लाभमनतिक्रम्य नाटकप्रतिपादितविशेषस्वीकारः।।

# Summarised Overview

उपरूपकाणि संस्कृतनाटकानां लघुप्रकाराः सन्ति। अस्मिन् नृत्यनाटकं, सङ्गीतं, शारीरिकं ईशारः च सन्ति। भावप्रकाशने विंशति लघुप्रकारस्य नाटकानां विस्तृतं वर्णनं कृतमस्ति ये उपरूपकशैल्याः सन्ति। साहित्यदर्पणे अष्टादशविधानां नाटकानां वर्णनं सन्ति ते उपरूपकत्वेन निर्दिष्टाः। अग्निपुराणे दशरूपकाणां अतिरिक्तं सप्तदश लघुप्राकाराणां नाटकानां उल्लेखः अस्ति। उपरूपकाः भावात्मकाः भावाश्रिताः वा आसन् ।रूपकाः नाटकस्य(नाट्यस्य) प्रमुखरूपाः इति मन्यन्ते,उपरूपकाः (नृत्यरचनाः) नाटकस्य लघुरूपाः सन्ति। यद्यपि नाटकस्य प्रमुखरूपाः वीथी, भाणम् इति उच्यन्ते तथापि तेषां स्वभावस्य आधारेण ते उपरूपकेषु अपि वर्गीकृताः भवितुमर्हन्ति। अष्टादश उपरूपकाणि। नाटिका द्विविधा, नाटकप्रकरणयोः विषये व्यतिरिक्तेषु च सापेक्षतां धारयति उत्तरे सति प्रकरणिका इत्यपि उच्यते। एतेभ्यः रूपेभ्यः केवलं दीर्घता एव भेदः, नाटिका चतुर्णां कर्मणां प्रतिबन्धितः। त्रोटकः पञ्च, सप्त, अष्ट,नव वा कर्मभिः युक्तः भवितुमर्हति; व्यापारः अंशतः मानवीयः अंशतः आकाशीयः च भवति। गोष्ठी एकस्मिन् अभिनये एकः खण्डः अस्ति, यत्र नाटकीयः व्यक्तित्वः अस्ति। नवदशपुरुषाः, पञ्चषड्स्त्रीणां वर्णनं दृश्यते, विषयः तु प्रेम्णः । सट्टकः यत्किमपि संख्यायां कृत्येषु अद्भुतं कथा, परन्तु भाषा सर्वथा प्राकृता भवेत्। नाट्यरासके मुख्यतया नृत्यगानयोः विषयाः प्रेम्णः आनन्दः च भवन्ति। प्रस्थाने मुख्यतया नृत्यगानमपि भवति तथा च प्रेम्णः आनन्दः च विषयाः सन्ति। पात्राणि – नायकः नायिका च दासाः तेषां च बहिष्कृतान् संगतिं करोति। गीतं, नृत्यं, संगीतं च अस्य मुख्यानि तत्त्वानि। उल्लाप्ये एकस्मिन् कर्मणि विषयः पौराणिकः। शृङ्गारं हास्यं करुणं च भावाः। गीतैः विच्छिन्नः संवादः। एषः प्रकारः उपरूपकः (काव्यः) काव्यपद्यैः संगीतवायुभिः च विच्छिन्ना। एकस्मिन् कर्मणि प्रेमकथा अस्ति। प्रेङ्घणे- युद्धविवादयोः उपचारः एकस्मिन् एव कर्मणि अस्ति। एकस्मिन् कर्मणि रासकः हास्यविनोदः पञ्चपात्रयुक्तः। नायकः नायिका च उन्नतपदवी; उत्तरा योग्यपुण्यः पूर्वः मूर्खः। एकत्रयचतुर्विधं नाटकं सन्तापकः। अस्य नायकः पाषण्डः। विषयाः तु – विवादः, हिंसा, युद्धं, वञ्चना च। श्रीगदिते एकस्मिन् कर्मणि मनोरञ्जनं अस्ति, यस्मिन् श्री देवी श्री, श्रीमती, सौभाग्यदेवी वा प्रवर्तते, नायिका वा अभिप्रेता भवति। अंशतः पठ्यते अंशतः गाप्यते च।

शिल्पकः चतुर्धा भवति। यत्र मृतशरीराणि दह्यन्ते तत्र दृश्यं स्थापितं भवति। नायकः ब्राह्मणः आत्मविश्वासयुक्तः वा प्रतिनायकः बहिष्कृतः चमत्कारः च। विलासिका – एकस्मिन् कर्मणि मनोरञ्जनं अस्ति, यस्य विषयः प्रेम्णः सामान्यः तनावः च हास्यं भवति। दुर्मल्लिका – चतुर्णां कृत्यानां हास्यं षड्यंत्रं अस्ति, येषु प्रेत्यकस्मिन् नायकस्य मित्राणि च क्रमशः नेतृत्वं कुर्वन्ति । प्रकरणिका- अत्र विशिष्टवर्गः इति मन्यते, किन्तु रूपकाणां अधः इष्टः अवलोकितः। हल्लीशः- मुख्यतया एकस्मिन् एव अभिनये गानस्य, नृत्यस्य च मनोरञ्जनं अस्ति। यस्य प्रतिनिधित्वं एकः पुरुषः अष्ट, दश वा महिलाः कलाकाराः कुर्वन्ति। भाणिका- एकस्मिन् कर्मणि हास्यखण्डः अस्ति, न तु अत्यन्तं स्पष्टतया विवक्षितम्।।

# Assignments

1. नाटिकायाः लक्षणं सोदाहरणं लिखत।
2. प्रगल्भाभेदाः विशदयत।
3. प्राकृतभाषायां विद्यमानम् उपरूपकं किम् ? तदधिकृत्य उपन्यस्यत।
4. उपरूपकाः कीदृशाः आसन्?

निबन्धात्मकम् उत्तरत ।

1. उपरूपकभेदान् अधिकृत्य विवृणुत।
2. रत्नावली नाटिकायां कथावस्तु संक्षिप्य लिखत।
3. शिल्पकाङ्कानि कानि? विशदयत ।

# Suggested Readings


1. संस्कृतसाहित्यविमर्शः , कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम् ।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन् वाराणसी ।
3. A Short History of Sanskrit Literature - T.K.Ramachandra Iyer, R.S.Vadyar&Sons, Kalpathy, Palakkad, 2018.
4. Dasarupaka, Dhannjaya,Chapter III, Chaukhamba Sanskrit Series, Varanasi, 2014.


# References


1. साहित्यदर्पणम् –Ed.Devadattakausika, Bharatiyavidyaprakashan, New Delhi,1978.
2. साहित्यदर्पणम् – Ed.AcharyasheshrajasharmaRegmi, Krishnadas Academy, Varanasi, 1993.
3. साहित्यदर्पणम् –Ed.Saligramasastri, Motilal Banarasidas, New Delhi,1992.
4. साहित्यदर्पणम् –Ed.J.R. Ballantyne Paramdasa Mitra, Motilal Banarasidas, New Delhi, 1994.
5. साहित्यदर्पणम् –Ed.Acharya Krishnamohan Sastri, Chaukhamba Sanskrit Sanssthan, Varanasi, 2011.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# कुवलयानन्दः

# BLOCK - 4

UNIT 1

# अलङ्कारपरिचयः

## Learning Outcomes

- विभिन्नविषयेषु अध्ययनं कुर्वतां छात्राणां तत्तद्विषयपरिपोषकतया संस्कृताध्ययनाय अवसरं प्राप्नोति।
- काव्यालङ्काराणाम् अध्ययनेन साहित्यास्वादने क्षमतोत्पादनम्।
- काव्यालङ्काराणाम् अध्ययनद्वारा साहित्यरचनायै प्रावीण्यसंपादनम्।
- अलङ्कारशास्त्रस्य प्राधान्यं ज्ञात्वा सादृश्यमूलकानां कतिपयानाम् अलङ्काराणां सविशेषतां प्रत्यभिजानाति।
- अलङ्कारशास्त्रस्य प्रामुख्यं जानाति।
- अलङ्काराणां विकासं समधिगच्छति।

## Background

वेदोपकारकत्वात् अलङ्कारशास्त्रस्य सप्तमं वेदाङ्गत्वं वर्तते। साहित्यविद्या पञ्चमी विद्या इत्युच्यते। अलङ्कारशास्त्रे अष्टौ पद्धतयः सन्ति। ताः रसः-गुणः-रीतिः-ध्वनिः-अनुमानं-वक्रोक्तिः-औचित्यं चेति। तासु पद्धतिसु भामहादयः अलङ्काराणां प्राधान्यं कल्पयन्ति। अलङ्कारस्य प्राधान्यम् उद्भटः, रुद्रटः,राजशेखरः,रुय्यकः,जयदेवः,विश्वनाथः,अप्पय्यदीक्षितप्रभृतयः अलङ्कारनिपुणाः अङ्गीकुर्वन्ति। कालिदासप्रभृतयः कवयः अपि स्वस्वकाव्येषु अलङ्काराणां सन्निवेशेन भाषां काव्यमण्डलं च समलंकृतम् अकुर्वन् ।

अप्पय्यदीक्षितः षोडशे शतके स्वजीवितेन साहित्यनभोमण्डलं प्रशोभयामास। काव्यशास्त्रे तस्य योगदानं समुन्नतमेव। तेन महात्मना चतुरधिकशतमिताः ग्रन्थाः विरचिताः। तेषु चित्रमीमांसा, कुवलयानन्दः, वृत्तिवार्तिकञ्च काव्यशास्त्रसम्बन्धाः।

कुवलयानन्दम् अर्थालङ्कारसम्बद्धः ग्रन्थः। तस्मिन् १२३ अलङ्काराः निरूपिताः। तेषु ९६ अलङ्काराः जयदेवस्य चन्द्रालोकात् गृहीताः। शेषाः १७ स्वयमेव उद्भाविताः अन्येभ्यो गृहीताः च। दीक्षितमहाशयेन निरूपितेषु अलङ्कारेषु उपमा-उत्प्रेक्षा-दीपकं-प्रतिवस्तूपमा प्रभृतयः अलङ्काराः सादृश्यमूलकाः अलङ्काराः भवन्ति। तेषां पठनमस्माभिः कार्यम्।

## Keywords

शब्दालङ्कारः, अर्थालङ्कारः, उभयालङ्कारः, रसः, गुणः, रीतिः, ध्वनिः, अनुमानं, वक्रोक्तिः, औचित्यम्

## Discussion

संस्कृतसाहित्यप्रपञ्चे अलङ्कारशास्त्रं शब्दार्थशोभाधायकत्वात् कमनीयं पदम् अलङ्करोति। अलङ्कारसम्प्रदायो भामहेन प्रवर्तितोऽपि तद्ग्रन्थव्याख्यातृभिः उद्भटादिभिः एव स्थिरतां प्रापितः। एतत्सम्प्रदायानुसारिणां मते अलङ्कारा एव काव्यजीवातवः।

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती।।**

(चन्द्रालोकः, जयदेवः १.८)

अलङ्कारस्य भेदत्रैविध्यम्

इति कथयन् जयदेवोऽपि काव्ये जीवनाधायकतयाऽलङ्कारानेव स्वीकरोति। अलङ्कारस्य त्रयो भेदाः सन्ति – शब्दालङ्कारः, अर्थालङ्कारः, उभयालङ्कारश्चेति। यत्र अलङ्कारे शब्दः न परिवर्तनं सहते तत्र शब्दालङ्कारः, अनुप्रास-यमक-श्लेषादयः। यत्र तु शब्दपरिवर्तनेऽपि अलङ्कारत्वे न कापि क्षतिः तत्र अर्थालङ्कारः, उपमोत्प्रेक्षासन्देहरूपकसमासोक्त्यादयः। एकः पुनरुक्तवदाभासः, शब्दस्य परिवर्तनसहत्वे असहत्वे च शब्दार्थोभयालङ्कारः। तदिदम् अलङ्कारशास्त्रं षट्सम्प्रदायभेदभिन्नम्। षट् सम्प्रदायाश्च ते – रस-अलङ्कार- गुण- वक्रोक्ति- ध्वनि- औचित्याख्याः।

अलङ्करोति इति अलङ्कारः। अलङ्क्रियते अनेन वा अलङ्कारः। आभूषितं करोतीति अलङ्कारः। काव्यसौन्दर्यविधायकानां सम्पूर्णतत्त्वानां शास्त्रममेव अलङ्कारशास्त्रम्। अलङ्कारो नाम सौन्दर्यं, यथा कटक-कुण्डल-हारदिभिः आभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति तथैव अनुप्रास-उपमादिभिः अलङ्कारैः कविताकामिन्याः शोभावर्द्धनं क्रियते। अलङ्कारो हि नाम काव्यशोभाकरो धर्मः। भाषायां व्युत्पत्तिविवर्धनाय यथा व्याकरणशास्त्रमपेक्ष्यते तथैव काव्ये नैपुण्याय अलङ्कारशास्त्रमपि। अलङ्कारशास्त्रं विना केवलं काव्ये नैपुण्यं न सम्पद्यते अपि तु वाक्यदोषदृष्टिरपि नोत्पद्यते।

अलङ्कारस्य लक्षणानि

१.आचार्यमम्मटेनापि अलङ्कारलक्षणम् उच्यते –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**
(काव्यप्रकाशः, ८/६७)

२.कविराजविश्वनाथेनापि अलङ्कारलक्षणम् उक्तं –

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तो अलङ्कारास्तेऽङ्गदादिवत्।**
(साहित्यदर्पणम्,१.१)

(ये शब्दार्थयोः अनित्यधर्मत्वेन अतिशयशोभाकारिणः रसादीन् उपकुर्वन्ति ते काव्ये अलङ्काराः।)

३.अलङ्कारतत्वज्ञः आचार्यो दण्डी काव्यादर्शे अलङ्कारं लक्षयति –

**काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।**
(काव्यादर्शः २.१)

४. 'शब्दार्थौ सहितौ काव्यम्' इति भामहः।

५. वामनः काव्यालङ्कारसूत्रे सौन्दर्यमलङ्कारः(१.२) इति।

## Summarised Overview

काव्यशास्त्रस्य महत्वपूर्णमङ्गं वर्तते। अलङ्काराः त्रेधा वर्गीक्रियन्ते – शब्दालङ्कारः, अर्थालङ्कारः, उभयालङ्कारः चेति । शब्दप्रधानः अलङ्कारः शब्दालङ्कारः। अर्थप्रधानः अलङ्कारः अर्थालङ्कारः। तदुभयप्रधानः उभयालङ्कारः।

## Assignments

1. को नाम शब्दालङ्कारः ?

**निबन्धात्मकं उत्तरत -**

1. अलङ्कारसम्प्रदायः।
2. अलङ्कारभेदान् विवृणुत-
3. अलङ्कारलक्षणान् अधिकृत्य संक्षिप्य लिखत-

## Suggested Readings

1. संस्कृतसाहित्यविमर्शः – कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, मयराष्ट्रनगरम्, उत्तरप्रदेशः।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन्, वाराणसी।
3. A Short History Of Sanskrit Literature - T.K.Ramachandra Iyer.

## References

1. कुवलयानन्दः – अप्पय्यदीक्षितः, चौखम्बा विद्याभवन्, बनारस्।
2. संस्कृतशास्त्रमञ्जूषा, डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# उपमा, रूपकम्, अनन्वयः, उल्लेखः, स्मृतिः,भ्रान्तिः,सन्देहः, अपह्नुतिः

## Learning Outcomes

- अलङ्कारशास्त्रस्य प्राधान्यं ज्ञात्वा सादृश्यमूलकानां कतिपयानाम् अलङ्काराणां सविशेषतां प्रत्यभिजानाति।
- प्रत्येकमलङ्कारस्य लक्षणसमन्वयं कर्तुं शक्नोति।
- उपमादीनाम् अलङ्काराणां सादृश्यमूलकत्वम् अवगम्य सादृश्यं लिखितुं शक्नुवन्ति।

## Background

संस्कृतसाहित्ये अनेके अलङ्कारतत्त्वज्ञाः सन्ति। 'काव्यं ग्राह्यम् अलङ्कारात्' इति न्यायात् सर्वे कवीन्द्राः अलङ्कारैः अलङ्कृतां भाषामेव इच्छन्ति। षोडशे शतके संजातः आलङ्कारिकश्रेष्ठः भवति अप्पय्यदीक्षितः। तेन अलङ्कारशास्त्रसंबद्धं ग्रन्थत्रयं रचितम्। तेषु अन्यतमः भवति कुवलयानन्दः। अलङ्कारशास्त्रे प्रचुरप्रचारं प्राप्तस्य अस्य ग्रन्थस्य अनेके व्याख्याग्रन्थाः सन्ति। गङ्गाधरस्य रसिकरञ्जिनी, मथुरानाथस्य कुवलयानन्दटीका,सुखीरामस्य कुवलयानन्दटिप्पणं, देवीदत्तस्य लघ्वलङ्कारचन्द्रिका च तेषु प्रसिद्धाः।अस्मिन् पाठभागे प्रमुखान् षट् अलङ्कारान् पठामः। उपमा, रूपकं,अनन्वयः,उल्लेखः,स्मृति-भ्रान्ति-सन्देहाः, अपह्नुतिः च भवन्ति।।

## Keywords

उपमा, सादृश्यलक्ष्मीरुल्लसति, पूर्णोपमा, लुप्तोपमा, परम्परितं, साङ्गं, निरङ्गं, इन्दुरिन्दुरिव श्रीमान्।

## Discussion

## 2.1.उपमालङ्कारः

उपमीयते इति उपमा। उपमालङ्कारस्तु एकः अर्थालङ्कारः। उपमालङ्कारस्य बहुधा उपयोगः काव्येषु भवति। उपमायाः लक्षणं तावत् कुवलयानन्दे अप्पय्यदीक्षितः एवं कथयति -

प्रस्फुटम् सुन्दरं साम्यम्

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**
**हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते।।**

काव्यप्रकाशे तल्लक्षणं हि – साधर्म्यमुपमाभेदे। यत्र उपमानोपमेययोः भेदे विद्यमानत्वेऽपि समानधर्मः वर्ण्यते तत्र उपमालङ्कारः। अत एव विश्वनाथोऽपि – साम्यं वाच्यमवैधर्म्यवाक्यैक्य उपमाद्वयोः इति (साहित्यदर्पणम् १०.१४) लक्षणं कृतवान्। उपमा सादृश्यमूलकः भेदाभेदप्रधानः अलङ्कारः भवति। यत्र यस्मिन् काव्ये द्वयोः उपमानोपमेययोः सादृश्यलक्ष्मीः, सहृदयहृदयाह्लादि सादृश्यं उल्लसति स्पष्टं प्रकाशते सा उपमा। 'हंसीव कृष्ण' इत्युदाहरणम्। हे कृष्ण, ते कीर्तिः हंसीव आकाशगङ्गाम् अवगाहते। अत्र कीर्तिहंस्योः सादृश्यलक्ष्मीः स्पष्टं प्रकाशते इत्यतः उपमालङ्कारः।

उपमायाः चत्वारो अवयवाः सन्ति – उपमानं, उपमेयं,साधारणधर्मः, उपमावाचकश्चेति। येन उपमीयते तत् उपमानम्। तत्र अधिकगुणत्वेन प्रसिद्धं वस्तु उपमानम् । अत्र हंसी उपमानम्। यद् उपमीयते तत् उपमेयम्। न्यूनगुणत्वेन अप्रसिद्धं वस्तु उपमेयम्। अत्र कीर्तिः उपमेयम्। आह्लादकत्वादिकंसाधारणधर्मः। अत्र स्वर्गङ्गावगाहनं साधारणधर्मः। इवादिशब्दाः उपमावाचकाः। संक्षेपतः उपमा द्विविधा – पूर्णा, लुप्ता चेति। यत्र चतुर्णामपि उपमावयवानां उपादानं तत्र पूर्णोपमा। यथा 'हंसीव कृष्ण' इत्युदाहरणे हंसी उपमानं, कीर्तिः उपमेयं, स्वर्गङ्गावगाहनं साधारणो धर्मः, इवशब्दः उपमावाचकः इति चतुर्णाम् अप्युपादानात् पूर्णोपमा। उपमानोपमेयसाधारणधर्मवाचकानां चतुर्णां मध्ये एकस्य द्वयोः त्रयाणां वा अनुपादानात् अप्रयोगात् लुप्तोपमा भवति। एषु कस्यचिदङ्गस्य अभावे लुप्तोपमा स्यात्। अवयवलोपात् लुप्ता इति अन्वर्थसंज्ञा।

उपमा प्रभेदाः

वर्ण्योपमानधर्माणामुपमावाचकस्य च।
एकद्वित्र्यनुपादानाद्भिन्ना लुप्तोपमाष्टधा ।।

अष्टभेदाः– वाचकलुप्ता, धर्मलुप्ता, धर्मवाचकलुप्ता, वाचकोपमेयलुप्ता, उपमानलुप्ता, वाचकोपमानलुप्ता, धर्मोपमानलुप्ता, धर्मोपमानवाचकलुप्ता चेति। वाचकलोपात् वाचकलुप्ता। साधारणधर्मलोपात् धर्मलुप्ता। धर्मवाचकयोः लोपात् धर्मवाचकलुप्ता। वाचकोपमेययोः लोपात् वाचकोपमेयलुप्ता। उपमानमात्रलोपात् उपमानलुप्ता। वाचकोपमानयोः लोपात् वाचकोपमानलुप्ता। धर्मोपमानयोः लोपात् धर्मोपमानलुप्ता।

धर्मोपमानवाचकानां लोपात् धर्मोपमानवाचकलुप्ता च। लुप्तोपमायाः उदाहरणानि –

लुप्तोपमायाः उदाहरणानि

**तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम**
**कान्त्या स्मरवधूयन्ति दृष्टा तन्वी रहो मया ।**
**यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः**
**तदेतत्काकतालीयमवितर्कितसंभवम्।।**

१. अत्र तडिद्गौरी तन्वी तडिदिव गौरी इत्यर्थः। अत्र इव शब्दस्य लोपात् वाचकलुप्ता।
२. इन्दुतुल्यास्या इत्यस्य इन्दुना तुल्यम् आस्यं यस्याः सा इत्यर्थः। साधारणधर्मस्य लोपात् धर्मलुप्ता।
३. मम दृशोः कर्पूरन्ती तन्वी आसीत् सा। कर्पूरमिव आचरन्ति इत्यर्थः विवक्षितः। किन्तु नेत्रानन्दरूपो धर्मः इवशब्दः च नोपात्तः। अतः धर्मवाचकलुप्ता।
४. कान्त्या स्मरवधूयन्ती इत्यत्र शोभया स्मरवधूं रतीमिव वर्तमाना इत्यर्थः विवक्षितः। अत्र उपमेयः न वर्तते। वाचकशब्दोऽपि न। अतः वाचकोपमेयलुप्ता।
५. काकागमनमिव तालपतनमिव काकतालम्। ततः काकतालमिव काककृतः तालोपभोगः इत्यर्थः विवक्षितः। अत्र उपमानलोपः,अतः उपमानलुप्ता।
६. तत्र मया तया मेलनं – मम तत्र गमनं तस्याः तत्र आगमनं च अवितर्कितसंभवम्। मम तन्मेलनं काकागमनतालपतनसदृशम् अवितर्कितसंभवम्। अत्र वाचकस्य उपमानस्य च लोपात् वाचकोपमानलुप्ता।
७. अवितर्कितसंभवम् इत्यस्य 'स्थाने इति जानीहि मे सखे' इति पाठे साधारणधर्मस्य लोपः। अतः धर्मोपमानलुप्ता।
८. मम तया तत्र मेलनमिति यत् तदेतत्काकतालमिति। काकागमनतालपतनसदृशम्। अतः धर्मोपमानवाचकलुप्ता।।

## 2.2.रूपकम्

रूपवत् करोति रूपयतीति रूपकः

निषेधरहिते उपमेये यत्र उपमानस्य अभेदारोपः तत्र रूपकम्। उपमानेन उपमेयस्य उपरञ्जनमेव अस्य अलङ्कारस्य प्रामुख्यम्। यथा –

आहवे जगदुद्दण्डराजमण्डलराहवे।
श्रीनृसिंहमहीपाल! स्वस्त्यस्तु तव बाहवे।।

अत्र उपमेयभूते बाहौ उपमानभूतस्य राहोः अभेदारोपाद् किञ्च राजमण्डलरूपे उपमेये चन्द्रबिम्बस्य उपमानभूतस्य अभेदारोपाद् रूपकम्।

लक्षणम् –

**विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।**
**रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः॥**

साहित्यदर्पणे –

रूपकं रूपितारोपे विषये निरपह्नवे।
तत्परम्परितं साङ्गं निरङ्गं चेति त्रिविधम्॥

इदं रूपकं मूलतः त्रिधा – परम्परितं, साङ्गं, निरङ्गं चेति।

काव्यप्रकाशे उक्तं हि –तद्रूपकमभेदो य उपमेयोपमानयोः।

अर्थात् यत्र उपमेयोपमानयोः अभेदबुद्धिर्जायते तत्र रूपकालङ्कारः भवति॥

## 2.3.अनन्वयः

न अन्वयः अनन्वयः। स्वस्य स्वेनैव सादृश्यम् इत्यतः अनन्वयः इति अन्वर्थसंज्ञा।

**उपमानोपमेयत्वं यदेकस्यैव वस्तुनः।**
**इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः॥**

यत्र एकस्मिन् वाक्ये उपमानम् उपमेयत्वेन परिकल्प्यते तदा अनन्वयालङ्कारः। 'इन्दुरिन्दुरिव श्रीमान्' इत्युक्ते श्रीमत्वेन चन्द्रस्य नान्यः सदृशोस्तीति सदृशान्तरव्यवच्छेदो लक्ष्यते। अत्र इन्दुः एव उपमानम् उपमेयं च। ततश्च स्वस्य स्वेनापि सादृश्यासंभवात् अनुपमेयत्वे पर्यवसानम्। अत एव साहित्यदर्पणे –उपमानोपमेयत्वमेकस्यैव त्वनन्वयः।

एकस्यैव वस्तुनः उपमानोपमेयत्व वर्णनम्

यथा –

राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोधमे॥

अत्र राजीवं राजीवमिव तथा च जलं जलमिव इति कथनात् राजीवपदं जलपदञ्च उपमानोपमेयत्वेन परिकल्पनात् अनन्वयालङ्कारः।

अतः सादृश्यमूलकोऽयमलङ्कारः। अनन्वयस्य अपरमुदाहरणं यथा –

गगनं गगनाकारं सागरः सागरोपमः।
रामरावणयोर्युद्धं रामरावणयोरिव॥

आकाशः आकाश इव भवति। समुद्रः समुद्र इव भवति। रामरावणयोः युद्धं रामरावणयोः युद्धमिव भवति। अत्र आकाशः समुद्रः रामरावणयोर्युद्धं च उपमानानि उपमेयानि च भवन्ति। अतः अनन्वयालङ्कारः॥

## 2.4.उल्लेखः

उल्लेखः द्विविधः – प्रथमोल्लेखः, द्वितीयोल्लेखः।

प्रथमोल्लेखः- बहुभिर्बहुधोल्लेखादेकस्योल्लेखइष्यते।
स्त्रीभिः कामाऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः।।

यत्र नानाधर्मयोगिनः एकस्य अनेकैः अनेकधा उल्लेखनरूपः, एकस्य एकैनैव अनेकधा उल्लेखनरूपश्चेति। एकस्य अनेकधर्मविशिष्टस्य बहुभिः अनेकैः गृहीतृभिः बहुधा अनेकप्रकारेण उल्लेखात् विषयीकरणात् उल्लेखः इत्यन्वर्थनामा अलङ्कारः। स्त्रीभिः इत्याद्युदाहरणम्।

उल्लेखद्वैविध्यं-

सः सौन्दर्योदार्यपराक्रमशाली राजा स्त्रीभिः कामः ऐक्षि अर्थिभिः कल्पवृक्षः ऐक्षि, शत्रुभिः कालः अन्तकः ऐक्षि इत्युदाहरणम्। अत्र एक एव राजा सौन्दर्याद्यनेकधर्मविशिष्टः बहुभिः स्त्री-अर्थि-शत्रुभिः बहुधा काम-स्वर्द्रुमा-न्तकत्वेन उल्लिखितः इति लक्षणसमन्वयः।

द्वितीयोल्लेखः - **एकेन बहुधोल्लेखोप्यसौ विषयभेदतः।**

**गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने ।।**

अनेकप्रकारेण उल्लेखे विषयीकरणेऽपि असौ उल्लेखालङ्कारः।

अयं पुरोवर्ती राजा वचसि प्रभाषणे विषये गुरुः बृहस्पतिः महान् च, कीर्तौ यशसि विषये अर्जुनः पार्थः धवलश्च,शरासने धनुषि विषये भीष्मः गाङ्गेयः भयङ्करश्च। अत्र एक एव राजा एकेनैव गृहीत्रा वागादिविषयभेदात् बहुधा गुरुत्वादिप्रकारैः उल्लिखितः इति लक्षणसमन्वयः।।

## 2.5.स्मृति-भ्रान्ति-संदेहालङ्कारः

स्मृतित्वभ्रान्तित्व संदेहत्वानि त्रीणि लक्षणानि

स्यात्स्मृतिभ्रान्तिसंदेहैः तदङ्कालङ्कृतित्रयम्
पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः।
अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम्
पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः।।

स्मृतिभ्रान्तिसन्देहैः सादृश्यान्निबध्यमानैः स्मृतिभ्रान्तिमान्सन्देह इति स्मृत्यादिपदाङ्कितमलङ्कारत्रयं भवति। तत्र स्मृतित्वं तावत् स्मरामीत्यनुभवसाक्षिको जातिविशेषः। भ्रान्तित्वं विशेष्यावृत्तिप्रकारकज्ञानत्वम्। संदेहत्वं तु निश्चयभिन्नत्वे सति संभावनाभिन्नज्ञानत्वं पारिभाषिकम्। स्मृतिभ्रान्त्यादिवारणाय सत्यन्तम्।

स्मृतेः उदाहरणम् –

दिव्यानामपि कृतविस्मयां पुरस्तादम्भस्तः स्फुरदरविन्दचारुहस्ताम्।
उद्वीक्ष्य श्रियमिव काश्चिदुत्तरन्तीमस्मार्षीज्जलनिधिमन्थनस्य शौरिः।।

पूर्वत्र स्मृतिमदुदाहरणे सदृशस्यैव स्मृतिरत्र सदृशलक्ष्मीस्मृतिपूर्वकं तत्संबन्धिनो जलनिधिमन्थनस्यापि स्मृतिरिति भेदः।

पलाशमुकुलभ्रान्त्या शुकतुण्डे पतत्यलिः।
सोऽपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति॥

अत्र अन्योन्यविषयभ्रान्तिनिबन्धनः पूर्वोदाहरणाद्विशेषः।

जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः।
किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः॥

पूर्वोदाहृतसंदेहः प्रसिद्धकोटिकः, अयं तु कल्पितकोटिक इति भेदः॥

## 2.6 अपह्नुतिः

**अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः।**
**नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम्॥**

असत्यस्य स्थापना

असत्यस्य आरोपणाय यदि सत्यस्य निषेधो विधीयते तर्हि अपह्नुतिनामको अलङ्कारो भवति। उदाहरणेऽस्मिन् आकाशे चन्द्रं दृष्ट्वा तस्य तु निषेधः कृतः एवञ्च आकाशगङ्गाकमलमस्ति इति असत्यस्य स्थापना कृता तस्मादत्र अपह्नुतिनामको अलङ्कारोऽस्ति।

यत्र उपमेयमसत्यं कृत्वा उपमानस्य स्थापनं भवति तत्र अपह्नुत्यलङ्कारः भवति। उक्तञ्च काव्यप्रकाशे –

**प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः। (काव्यप्रकाशम् १४६)**

**प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः। (साहित्यदर्पणं १०.३८)**

गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन।

यदि श्लेषेण काक्वा वान्यथयेत्साऽप्यपह्नुतिः। (साहित्यदर्पणं १०.३८)

यत्र प्रकृतं (उपमेयं) प्रतिषिध्य तदुपरि उपमानस्य आरोपः क्रियते तत्र अपह्नुतिः। अस्याः लक्षणान्तरं – यत्र किमपि गोपनीयं वस्तु कथमपि सूचयित्वा श्लेषेण अश्लेषेण वा गोपाय्यते तत्रापि अपह्नुतिः भवति। अपह्नुतिः द्वेधा विभज्यते – क्वचिदपह्नवपूर्वकमारोपः, क्वचिदारोपपूर्वकोऽपह्नव इति।

प्रथमस्य अपह्नुत्यलङ्कारस्य उदाहरणं यथा –

**नेदं नभोमण्डलमम्बुराशिः नैताश्च ताराः नवफेनभङ्गाः।**
**नायं शशीकुण्डलितः फणीन्द्रो, नासौ कलङ्कः शयितो मुरारिः॥**

अत्र नभोमण्डल-तारा-राशि—कलङ्कानां प्रतिषेधात् परं तेषामुपरि अम्बुराशि-नवफेन-भङ्गफणीन्द्र-मुरारि-प्रभृतीनां उपमानानाम् आरोपात् अपह्नुतिः।

‘काले वारिधाराणाम्’ इत्याद्युदाहरणं द्वितीयलक्षणस्य। चन्द्रालोके अपह्नुत्यलङ्कारस्य लक्षणम् – ‘अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः’।।

## Summarised Overview

नायिकायाः वक्षस्थले विद्यमानौ स्तनौ इव यदा उपमानोपमेययोः परस्परं समानरूपेण शोभते तदा उपमालङ्कारः भवति। पूर्णोपमा लुप्तोपमा चेति उपमा द्विधा विभक्तानि। रूपकशब्दे सामान्यतः रूपयतीति रूपकमिति व्युत्पत्या अयमेवार्थः कर्तुं शक्यते यत् उपमाने तथा उपमेये अभेदारोपं कृत्वा उभयोः ऐक्यवर्णनम्।यत्र उपमानत्वं उपमेयत्वञ्च एकस्यैव वस्तुनः भवति तत्र अनन्वयालङ्कारः। एकस्मिन्नेव वस्तुनि तद्द्वयं संभवति। उल्लेखो नाम उत्कृष्टकल्पनम्। एकस्मिन् विषये अनेककर्तृकः अनेकरूपारोपः उल्लेख इत्यर्थः। स्मृतिभ्रान्तिसन्देहैः सादृश्यान्निबध्यमानैः स्मृतिभ्रान्तिमान्सन्देह इति। असत्यस्य स्थापना यत्र कृता तत्र अपह्नुतिः।

## Assignments

1. उपमा द्वैविध्यं लिखत ?
2. लुप्तोपमायाः कतिभेदाः सन्ति? काः ताः? उदाहरणसहितं विशदयत।

निबन्धत्मकं उत्तरत ।

1. उपमायाः लक्षणं सोदाहरणं लिखत।
2. अपह्नुत्यलङ्कारः।
3. रूपकालङ्कारं सप्रभेदं सोदाहरणं विशदयत ।

## Suggested Readings


1. संस्कृतसाहित्यविमर्शः,कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, मयराष्ट्रनगरम्, उत्तरप्रदेशः ।
2. संस्कृतनिबन्धमञ्जूषा,डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी ।
3. A Short History Of Sanskrit Literature T.K.Ramachandra Iyer. R.S.Vadhyar& Sons, 1977.


## References


1. कुवलयानन्दः–अप्पय्यदीक्षितः,चौखम्बाविद्याभवन्,बनारस्।

2. संस्कृतशास्त्रमञ्जूषा, डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन् , वाराणसी।

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# उत्प्रेक्षा, अतिशयोक्तिः, तुल्ययोगिता, दीपकम्, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, स्वभावोक्तिः

## Learning Outcomes

- विविधालङ्काराणां अभिधेयानि परिशील्य परस्परभेदान् जानन्ति ।
- सर्वेषामलङ्काराणां लक्षणानाम् अवगमनम्।
- काव्येषु अलङ्काराणां प्रयोगं जानाति।

## Background

संस्कृतसाहित्ये अनेके अलङ्कारतत्त्वज्ञाः सन्ति। 'काव्यं ग्राह्यम् अलङ्कारात्' इति सर्वे कवीन्द्राः अलङ्कारैः अलङ्कृतां भाषामेव इच्छन्ति षोडशे शतके संजातः आलङ्कारिकश्रेष्ठः भवति अप्पय्यदीक्षितः। तेन अलङ्कारशास्त्रसंबद्धं ग्रन्थत्रयं रचितम्। तेषु अन्यतमः भवति कुवलयानन्दः। अलङ्कारशास्त्रे प्रचुरप्रचारं प्राप्तस्य अस्य ग्रन्थस्य अनेके व्याख्याग्रन्थाः भवन्ति। गङ्गाधरस्य रसिकरञ्जिनी, मथुरानाथस्य कुवलयानन्दटीका, सुखीरामस्य कुवलयानन्दटिप्पणं, देवीदत्तस्य लघ्वलङ्कारचन्द्रिका च तेषु प्रसिद्धाः। अस्मिन् पाठभागे प्रमुखान् नव अलङ्कारान् पठामः। ते उत्प्रेक्षा, अतिशयोक्तिः, तुल्ययोगिता, दीपकं, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, स्वभावोक्तिः च भवन्ति।।

## Keywords

संभवना स्यादुत्प्रेक्षा, वस्तूत्प्रेक्षा, उक्तविषया, अनुक्तविषया, दीपकं, वर्ण्यावर्ण्यानां धर्मैक्यं, व्यतिरेको विशेषश्चेदुपमानोपमेययोः, कुरङ्गैरुत्तराङ्गाक्षैः ।

# Discussion

## 3.1 उत्प्रेक्षा

उत्प्रेक्ष्यते इत्युत्प्रेक्षा। लक्षणम् –

**सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना**
**उक्तानुक्तास्पदाद्यत्र सिद्धासिद्धास्पदे परे।**
**धूमस्तोमं तमःशङ्के कोकीविरहशुष्मणाम्**
**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।।**

संभावना उत्प्रेक्षा, तस्याः त्रयोभेदाः

सादृश्यमूलकोऽयम् अलङ्कारः। अन्यधर्मसंबन्धनिमित्तेन अन्यस्य अन्यतादात्म्यसंभावनम् उत्प्रेक्षा। यदा उपमानेन सह उपमेयस्य सम्भावनं प्रदर्श्यते तदा उत्प्रेक्षा अलङ्कारः। यथा–

**यात्येकतोऽस्तशिखरं पतिरोषधीनाम्**
**आविष्कृतोऽरुणपुरःसरं एकतोऽर्कः।**
**तेजोद्वयस्य युगपद्व्यसनोदयाभ्याम्**
**लोको नियम्यत इवात्मा दशान्तरेषु।।** (शाकुन्तलं, कालिदासः )

अत्र आत्मदशाप्रदर्शनेन ईश्वरीयनियमं ज्ञाप्यते, अत्र शकुन्तलायाः पितुः गृहात् भर्तृगृहगमनकालः समागतोऽस्तीति प्रसङ्गे वर्णितोऽयं श्लोकः ।

उत्प्रेक्षा त्रिविधा – वस्तूत्प्रेक्षा(स्वरूपोत्प्रेक्षा), हेतूत्प्रेक्षा, फलोत्प्रेक्षा चेति। वस्तुनः कस्यचित् वस्त्वन्तरतादात्म्यसंभावना वस्तूत्प्रेक्षा। अहेतोः हेतुभावेन उत्प्रेक्ष्यते चेत् हेतूत्प्रेक्षा। अफलस्य फलत्वेन संभवना फलोत्प्रेक्षा। वस्तूत्प्रेक्षा उक्तविषया अनुक्तविषया इति द्विविधा। हेतूत्प्रेक्षा फलोत्प्रेक्षा च सिद्धविषया असिद्धविषया चेति प्रत्येकं द्विविधे। एवं षड्विधमस्ति उत्प्रेक्षा। षण्णाम् उत्प्रेक्षाणां धूमस्तोममित्यादीनि क्रमेण उदाहरणानि।

### 3.1.1 वस्तूत्प्रेक्षा

उक्तविषया वस्तूत्प्रेक्षाकाव्यस्य स्वरूपप्रतिपादनम्रा टयति विचित्रं

**धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्।**

इदमन्धकारं चक्रवाकस्त्रीणां विरहाग्निनां धूमपटलम् इति अहं तर्कयामि। अत्र अन्धकारात्मकं वस्तु कोकीविरहाग्निनां धूमपटलेन वस्त्वन्तरतादात्म्यतया उक्तत्वात् वस्तूत्प्रेक्षा। तमः धूमस्तोमं शङ्के इति तमसो विषय्योक्तत्वत् उक्तविषया। एवं मन्ये, ध्रुवं, प्रायः, नूनम्, इव इत्यादयोऽपि उत्प्रेक्षाद्योतकाः।

अपरमुदाहरणं यथा –

**बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि।**
**सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्।।**

सहसा वसन्तागमेन वनस्थलीनां नखक्षतानि इव बालेन्दुवक्राणि अविकासात् कालेन्दुवक्राणि अतिलोहितानि पलाशानि शुशुभिरे।

अत्र वक्रत्वात् लोहितत्वात् च पलाशकुसुमानि नखक्षतानि इव शोभयामासुः इति उत्प्रेक्ष्यमाणत्वात् (अवस्तुनः वस्तुकल्पनात्) वस्तूत्प्रेक्षा। उपमेयस्य पलाशकुसुमानाम् उपादानत्वात् उक्तविषया।।

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**अवस्तु वस्तुना कल्पयति चेत् वस्तूत्प्रेक्षा।**

अनुक्तविषया वस्तूत्प्रेक्षा

लिम्पतीव तमः इत्युदाहरणम्। अन्धकारः अङ्गानि लेपनं करोति इव आकाशः अञ्जनं वर्षतीव। तमोव्यापनं सकलवस्तुमलिनीकरणेन अञ्जनलेपनमिव अञ्जनवर्षमिव उत्प्रेक्ष्यमाणत्वात् वस्तूत्प्रेक्षा। तमोव्यापनस्य अनुक्तत्वात् अनुक्तविषया च। अपरमुदाहरणं यथा –

**पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम्।**
**तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः।।**

समुद्रः तरङ्गाग्रैः फेनचन्दनं पेषणं करोति। तत् फेनचन्दनम् आदाय चन्द्रः किरणैः दिगङ्गनाः लेपनं करोति। अत एव दिशां धवलीकरणम्। समुद्रात् उत्थितस्य चन्द्रस्य किरणानां दिक्षु व्यापनं फेनचन्दनकृतेन लेपनत्वेन उत्प्रेक्ष्यते इत्यतः वस्तूत्प्रेक्षा। फेनचन्दनस्य व्यापनमनुक्तत्वात् अनुक्तविषया च।।

### 3.1.2 हेतूत्प्रेक्षा

**अहेतुं हेतुत्वेन उत्प्रेक्ष्यते चेत् हेतूत्प्रेक्षा।**
**रक्तौ तवाङ्घ्री मृदुलौ भुविविक्षेपणात् ध्रुवम् ।**

सिद्धविषया हेतूत्प्रेक्षा

तव मृदुलौ चरणौ भुवि सञ्चरणात् हेतोः रक्तवर्णौ। अत्र भुवि विक्षेपणं रक्तवर्णस्य हेतुत्वेन उत्प्रेक्ष्यते इत्यतः हेतूत्प्रेक्षा। पादयोः रक्तवर्णस्य स्वतःसिद्धत्वात् विक्षेपणं न हेतुः। अत्र पादविक्षेपणेनापि सिद्ध्यतीत्यतः सिद्धविषया। अपरमुदाहरणम् –

**रात्रौ रवेर्दिवा चेन्दोरभावादिव स प्रभुः ।**
**भूमौ प्रतापयशस्वी सृष्टवान् सततोदिते ।।**

राज्ञः प्रतापं यशसं चाधिकृत्य वर्णयति। रात्रौ सूर्यस्य, दिवा चन्द्रस्य च अभावात् स प्रभुः भूमौ सततोदिते प्रतापयशसे सृष्टवान्। अत्र राज्ञः प्रतापयशसोः हेतुः रात्रौ सूर्याभावः दिवा चन्द्राभावः न। अहेतुं हेतुत्वेन उत्प्रेक्षणात् हेतूत्प्रेक्षा। अत्र कविभावनया प्रतापयशसोः सृष्टिः स्वतःसिद्धत्वात् सिद्धविषया च।।

अहेतुं हेतुत्वेन उत्प्रेक्ष्यते चेत् हेतूत्प्रेक्षा।

यथा – त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी।

असिद्धविषया हेतूत्प्रेक्षा

सुन्दर्याः मुखं वर्णयति। चन्द्रः तव मुखस्य सौन्दर्यं लब्धुमिच्छया कमलैः सह वैरं करोति। अत्र चन्द्रपद्मयोः विरोधे स्वाभाविकेऽपि तन्वीमुखकान्तिलाभेच्छा हेतुत्वेन उत्प्रेक्ष्यते इत्यतः हेतूत्प्रेक्षा। चन्द्रस्य कान्तामुखकान्तिलिप्सायाः अप्रसिद्धत्वात् असिद्धविषया च।

**विवस्वतानायिषतेव मिश्राः स्वगोसहस्रेण समं जनानाम्।**
**गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्यं खलु नान्धकारैः।।**

अन्धकारं वर्णयति। विवस्वता, सूर्येण स्वकिरणैः साकं मिश्रिताः जनानां नेत्रापरनामधेया गावोऽपि नीता इव। तेन इदम् आन्ध्यं, न तु अन्धकारैः। अत्र नेत्रापरनामधेयाः गावः सूर्यकिरणैः साकमगच्छन् इति अहेतुं हेतुत्वेन उत्प्रेक्षणात् हेतूत्प्रेक्षा। सूर्येण जनानां नेत्रागमनस्य असिद्धत्वात् असिद्धविषया।।

### 3.1.3 फलोत्प्रेक्षा

सिद्धविषया फलोत्प्रेक्षा

अफलं फलत्वेन उत्प्रेक्ष्यते चेत् फलोत्प्रेक्षा। यथा –

**मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः।**

तव मध्यः स्तनयोः धारणाय कनकदामभिः बद्धः किम्? अत्र कनकदामबन्धनस्य फलमिच्छन् इव कुचधारणमिति उत्प्रेक्ष्यते। मध्यः स्वयमेव कुचौ धरति, न तु कनकदामबन्धनत्वेन। अतः फलोत्प्रेक्षा। कुचधारणस्य सिद्धत्वात् सिद्धविषया।

अपरमुदाहरणं यथा –

**पूरं विधुर्वर्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणिं कियन्ति।**
**पयांसि दोग्धि प्रियविप्रयोगे सशोककोकीनयने कियन्ति।।**

असिद्धविषया फलोत्प्रेक्षा

चन्द्रोदये समुद्रबृंहणं वर्णयति। समुद्रं वर्धयितुमिव अयं चन्द्रः चन्द्रकान्तमणिं द्रावयति। कोकीनयनेभ्यः अश्रूणि प्रियवियोगे दोग्धि। चन्द्रकान्तमणेः द्रावणं, कोकीनयनेभ्यः अश्रूणि वर्षणं च समुद्रवर्धनरूपं फलमुद्दिश्य न भवति। तथापि तत्फलमुद्दिश्य इव इति वर्णनात् फलोत्प्रेक्षा। चन्द्रोदये समुद्रबृंहणस्य स्वाभाविकत्वात् सिद्धविषया।।

अफलं फलत्वेन उत्प्रेक्ष्यते चेत् फलोत्प्रेक्षा। यथा –

**प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति।**

कान्तां वर्णयति। प्रायः कमलं तव पादेन ऐक्यं प्राप्तुमिव जले तपस्यति। अत्र जलजस्य जलस्थितिः स्वाभाविकमेव। न तु कान्तायाः पादसायूज्यप्राप्त्यर्थम्। तथापि कामिनीपादसायूज्यप्राप्तिरूपं फलमिति

कल्पनात् फलोत्प्रेक्षा। पद्मस्य जलस्थितेः स्वाभाविकत्वात् सिद्धविषया। अपरमुदाहरणं यथा –

**रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम्।**
**उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम्।।**

सूर्यास्तमयं वर्णयति कविः। रथस्थितानां पुरातनानाम् अश्वानां परिवर्तनाय इव अश्वोत्तमानाम् उत्पत्तिभूमौ उत्तरस्यां दिशि सूर्यः स्थितिं चकार। अत्र सूर्यस्योत्तरदिग्गमनं रथस्थितानां पुरातनानाम् अश्वानां परिवर्तनफलाय इति उत्प्रेक्ष्यमाणत्वात् फलोत्प्रेक्षा। अश्वपरिवर्तनस्य असिद्धत्वात् असिद्धविषया।।

### 3.2 अतिशयोक्तिः

**रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।**
**पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः।।**

विषयिणा विषयस्य निगरणं अतिशयः, तस्योक्तिः अतिशयोक्तिः

अध्यवसायस्य सिद्धत्वे सति अतिशयोक्तिः अलङ्कारो भवति। अतः साध्यवसाना लक्षणा अस्य बीजरूपा। अध्यवसानो नाम विषयस्य निगरणेन अर्थात् स्वस्वरूपगोपनेन उपमानस्य अभेदप्रतीतिः। तद्यथा उक्तं साहित्यदर्पणे–

सिद्धत्वेऽध्यवसायस्य अतिशयोक्तिः निगद्यते।

यथा काव्यप्रकाशे–

**अन्यत् सौकुमार्यमन्यदेव च कापि वर्तनच्छाया।**
**श्यामा सामान्यप्रजापतेः रेखैव च न भवति।।**

अतिशयोक्तिरलङ्कारः भेदेऽपि भेद – इत्यादिना अष्टधा भवति।।

### 3.3 तुल्ययोगिता

एकेन एव धर्मेण संबन्धः तुल्ययोगिता

**वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता**
**संकुचन्ति सरोजानि स्वैरिणीवदनानि च।**
**त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते**
**मालतीशशभृल्लेखाकदलीनां कठोरता।।**

प्रस्तुतानाम् अप्रस्तुतानां वा गुणक्रियारूपैकधर्मान्वयः तुल्ययोगिता। संकुचन्तीति प्रस्तुततुल्ययोगिताया उदाहरणम्।

**हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।**
**प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया।।**

अत्र हिताहितयोर्मित्रशात्रवयोरुत्कृष्टभूतिदानस्य पराभवदानस्य च श्लेषेण अभेदाध्यवसायाद् वृत्तितौल्यम्। यथा वा –

यश्च निम्बं परशुना, यश्चैनं मधुसर्पिषा।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः।।

अत्र वृश्चति-सिञ्चति-अर्चति इत्यध्याहारेण वाक्यानि पूरणीयानि। पूर्वोदाहरणं स्तुतिपर्यवसायि, इदं तु निन्दापर्यवसायीति भेदः। इयं सरस्वतीकण्ठाभरणोक्ता तुल्ययोगिता।।

### 3.4 दीपकालङ्कारः

**वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।**
**मदेन भाति कलभः प्रतापेन महीपतिः।।**

प्रकृताप्रकृतयोः एक साधारणधर्मान्वयो दीपकम्

दीपयतीति दीपकम्। वर्ण्यावर्ण्यानां प्रस्तुताप्रस्तुतानां धर्मैक्यम् एकधर्मान्वयः दीपकम् इति बुधाः वदन्ति। 'मदेन भाति कलभः प्रतापेन महीपतिः' इत्युदाहरणम्। कलभः करिकलभः मदेन भाति शोभते। महीपतिः प्रतापेन शौर्येण शोभते। अत्र वर्ण्यस्य राज्ञः अवर्ण्यस्य कलभस्य च भानरूपक्रियान्वयः वर्णितत्वात् दीपकालङ्कारः। दीपसादृश्यात् दीपकः। दीप इति दीपकः। दीपकस्य अपरमुदाहरणं यथा –

**मणिः शाणोल्लीढः समरविजयी हेतिदलितः**
**मदक्षीणो नागः शरदि सरिदाश्यानपुलिना।**

**कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता**
**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः।।**

निकषोल्लीढः मणिः(सुवर्णमणिः), युद्धे व्रणितः सेनानायकः, मदेन क्षीणितः गजः, शरत्काले क्षीणितनदीप्रवाहेन युक्तं तीरम्, एककलावशेषः चन्द्रः, सुरतक्रीडया क्षीणिता बालवनिता, याचकेषु विभवदानेन गलितविभवाः नृपाः च तनिम्ना कार्श्येन शोभन्ते । अत्र प्रकृतीनां नृपाणाम् अप्रकृतानां शाणोल्लीढमण्यादीनां च शोभारूपैकधर्मान्वयात् दीपकालङ्कारः।।

### 3.5 प्रतिवस्तूपमा

प्रतिवस्तु प्रतिवाक्यार्थम् उपमा समानधर्मः अस्यामिति प्रतिवस्तूपमा। लक्षणं तु –

**वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता।**
**तापेन भ्राजते सूरः शूरश्चापेन राजते।।**

वाक्ययोः उपमानोपमेयवाक्ययोः एकसामान्ये एकस्मिन् समानधर्मे प्रतिवस्तूपमालङ्कारः। तापेन भ्राजते सूरः इत्युदाहरणम्। सूरः सूर्यः तापेन आपतेन भ्राजते प्रकाशते। शूरः वीरपुरुषः चापेन धनुषा राजते प्रकाशते। अत्र भ्राजते,राजते इति भिन्नपदाभ्याम् एक एव धर्मः

(प्रकाशनरूपः) निर्दिष्टत्वात् प्रतिवस्तूपमालङ्कारः। अत्र सूरः उपमानं, शूरः उपमेयम्।

एकस्मिन् समानधर्मे प्रतिवस्तूपमा

अपरमुदाहरणं यथा –

**स्थिरा शैली गुणवतां खलबुद्ध्या न बाध्यते।**
**रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते।।**

गुणवन्तं वर्णयति। गुणवतां सज्जनानां स्थिरा शैली (सद्वृत्तं) दुष्टजनस्य मत्या न बाधते(नाश्यते)। हि यतः रत्नदीपस्य (रत्नमेव दीपः रत्नदीपः, तस्य रत्नदीपस्य) शिखा वात्यया महता वातेन अपि न नश्यते। अत्र उपमेयवाक्यस्य (गुणवतां शैली दुष्टबुद्ध्या न बाध्यते) उपमानवाक्यस्य (रत्नदीपः वात्ययापि न नाश्यते) च एकसामान्ये नाशाभावरूपे अन्वयात् प्रतिवस्तूपमा। नाशाभावरूपः समानधर्मः न बाध्यते न नाश्यते इति पृथक् पदनिर्देशः वर्तते।।

## 3.6 दृष्टान्तः

**चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः।**
**त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान्।।**

उपमानोपमेय वाक्ययोः बिम्बप्रतिबिम्बत्वं बिम्बप्रतिबिम्बभावः स्यात्

यत्र उपमानोपमेयवाक्ययोः भिन्नावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्तः। अत एव उक्तं काव्यप्रकाशे – दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्। साहित्यदर्पणेऽपि– दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्। त्वमेव कीर्तिमान् इत्यत्र कीर्तिकान्त्योः बिम्बप्रतिबिम्बभावः। यथा वा –

**कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्।**
**नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः।।**
(रघुवंशं ६.२२)

## 3.7 निदर्शना

**वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।**
**यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता।।**

समानयोः वाक्यार्थयोः ऐक्यस्य अभिन्नत्वस्य आरोपः

उपमां परिकल्प्य पदार्थयोः अनुपयुज्यमानः संबन्धः परिकल्प्यते तत्र निदर्शना अलङ्कारः। यथा-

इदं किलाव्याजमनोहरं वपुः तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।।
(शाकुन्तलं१.१८)

अत्र शकुन्तलायाः सुकुमारवपुषा तपःक्षमसाधनावाञ्छा नीलोत्पलपत्रधारया शमीलताच्छेदनवाञ्छावदिति असम्भववस्तु-संबन्धरूपो निदर्शनालङ्कारः।।

### 3.8 व्यतिरेकः

व्यतिरेको नाम वैलक्षण्यम्। तल्लक्षणन्तु-

**व्यतिरेको विशेषश्चेदुपमानोपमेययोः।**
**शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः।।**

आधिक्यम्
उपमेयस्य
उपमानात् न्यूनता

उपमानोपमेययोः विशेषः वैलक्षण्यं वर्ण्यते चेत् व्यतिरेकालङ्कारः। साम्यमुक्त्वा वैधर्म्यं वर्ण्यते चेत् व्यतिरेकालङ्कारः। शैलाः इवोन्नताः इत्युदाहरणम्। सज्जनाः पर्वताः इवोन्नताः (शैलाः आकारे, सन्तः चित्ते औन्नत्ययुक्ताः)। किन्तु सज्जनाः प्रकृत्या स्वभावेन कोमलाः मृदुलाः। शैलास्तु कठिनाः इति भावः। अत्र औन्नत्ये साम्यमुक्त्वा प्रकृतिकोमलत्वे वैधर्म्यवर्णनात् व्यतिरेकालङ्कारः। उपमानापेक्षया उपमेयस्य आधिक्ये न्यूनतायाम् अनुभये वा पर्यवस्यति। अस्मिन् उदाहरणे उपमेयस्य उत्कर्षं वर्णितम्। व्यतिरेकस्य अपरमुदाहरणं यथा-

**पल्लवतः कल्पतरोः एष विशेषः करस्य ते वीर।**
**भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते।।**

राजानं वर्णयति। हे वीर, कल्पतरोः कल्पवृक्षस्य पल्लवस्य तव करस्य एष विशेषः अस्ति। कल्पवृक्षस्य पल्लवः कर्णं भूषयति। किन्तु तव करस्तु कर्णं राधेयं दानातिशयेन तिरस्कुरुते। कल्पवृक्षपल्लवत्वे सादृश्यमुक्त्वा कर्णतिरस्कारे वैधर्म्यं वर्तमानत्वात् व्यतिरेकः। उपमानात् उपमेयस्य अधिकगुणवर्णना अत्रास्ति।।

### 3.9 स्वभावोक्तिः

स्वभावेन उक्तिः स्वभावोक्तिः। तल्लक्षणन्तु-

वस्तुनो यथावत्
स्वरूपस्फुटीकरण-
समर्थम्
असाधारणधर्मवर्णनम्

**स्वभावोक्तिः स्वभावस्य जात्यादिस्तस्य वर्णनम्।**
**कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते।।**

जात्यादिस्थस्य जातिक्रियागुणसम्बन्धिनः स्वभावस्य वर्णनं स्वभावोक्तिरलङ्कारः। 'कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैः' इत्युदाहरणम्। उत्तराङ्गक्षैः चञ्चललोचनैः स्तब्धकर्णैः निश्चलकर्णैः कुरङ्गैः हरिणैः उदीक्ष्यते वीक्ष्यते। अत्र हरिणानां कुरङ्गस्वभाववर्णनात् स्वभावोक्तिः। काव्यप्रकाशे हि स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् अर्थाद्यत्र शिशुपशुपक्षीत्यादीनां स्वभाववर्णनं क्रियते तत्र स्वभावोक्तिरलङ्कारः।।

## Summarised Overview

उत्प्रेक्षा नाम संभावना। निषेधं विना यत्र कारणे, फले, स्वरूपे वा अतिशयसंभवः क्रियते तत्र उत्प्रेक्षा भवति। षड्विधमस्ति उत्प्रेक्षा इत्युक्तपूर्वम्। अतिशयेन उक्तिः अतिशयोक्तिः इति व्युत्पत्तिः। यत्र अनेकप्रस्तुतानाम् अथवा अप्रस्तुतानां पदार्थानां एकक्रियया गुणेन वा अन्वयः वर्ण्यते तत्र तुल्ययोगितालङ्कारः भवति। एकस्यैव धर्मस्य समस्ते वाक्ये दीपवदन्वयाद् दीपकमिति नामयोगः। यत्र उपमेयोपमानवाक्ययोः एकः समानो धर्मः पृथक् पदेन निर्दिश्यते सा प्रतिवस्तूपमा। एक एव समानधर्मः पृथक् पृथक् क्रियापदेन निर्देशं क्रियते। उपमानोपमेय वाक्ययोः बिम्बप्रतिबिम्बत्वं बिम्बप्रतिबिम्बभावः स्यात्तदा तत् दृष्टान्तालङ्कारः। समानयोः वाक्यार्थयोः ऐक्यस्य अभिन्नत्वस्य आरोपः निदर्शना। उपमानोपमेययोः विशेषः वैलक्षण्यं वर्ण्यते चेत् व्यतिरेकालङ्कारः। यत्र स्वाभाविकक्रियायाः अथवा रूपस्य वर्णनं भवति तत्र स्वभावोक्तिरलङ्कारः।।

## Assignments

1. 'सङ्कुचन्ति सरोजानि ...' इत्युदाहरणं लक्षणे समन्वयं कुरुत।
2. 'तापेन भ्राजते सूर्यः' अत्र प्रतिवस्तूपमा कथम्?

**निबन्धात्मकं उत्तरत।**

1. का नाम उत्प्रेक्षा? सभेदं विशदयत।
2. उपमाव्यतिरेकालङ्कारयोः भेदं विवृणुत।

## Suggested Readings


1. संस्कृतसाहित्यविमर्शः,कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, मयराष्ट्रनगरम्, उत्तरप्रदेशः।
2. संस्कृतनिबन्धमञ्जूषा,डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
3. A Short History Of Sanskrit Literature T.K.Ramachandra Iyer. R.S.Vadhyar& Sons, 1977


## References


1. कुवलयानन्दः, अप्पय्यदीक्षितः,चौखम्बाविद्याभवन्,बनारस्।
2. संस्कृतशास्त्रमञ्जूषा, डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन् , वाराणसी।

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# UNIT 4

# समासोक्तिः, परिकरः, श्लेषः, अप्रस्तुतप्रशंसा, व्याजस्तुतिः, विरोधाभासः, काव्यलिङ्गं, अर्थान्तरन्यासः।

## Learning Outcomes

- विविधालङ्काराणां अभिधेयानि परिशील्य परस्परभेदान् जानन्ति।
- अलङ्काराणां वैविध्यं सलक्षणं जानाति।
- सर्वेषामलङ्काराणां लक्षणानाम् अवगमनम्।
- काव्येषु अलङ्काराणां प्रयोगं जानाति।

## Background

संस्कृतसाहित्ये अनेके अलङ्कारशास्त्रिणः सन्ति। 'काव्यं ग्राह्यम् अलङ्कारात्' इति। सर्वे कवीन्द्राः अलङ्कारैः अलङ्कृतां भाषामेव इच्छन्ति। षोडशे शतके संजातः आलङ्कारिकश्रेष्ठः भवति अप्पय्यदीक्षितः। तेन अलङ्कारशास्त्रसंबद्धं ग्रन्थत्रयं रचितम्। तेषु अन्यतमः भवति कुवलयानन्दः। अलङ्कारशास्त्रे प्रचुरप्रचारं प्राप्तस्य अस्य ग्रन्थस्य अनेके व्याख्याग्रन्थाः भवन्ति। गङ्गाधरस्य रसिकरञ्जिनी, मथुरानाथस्य कुवलयानन्दटीका, सुखीरामस्य कुवलयानन्दटिप्पणं, देवीदत्तस्य लघ्वलङ्कारचन्द्रिका च तेषु प्रसिद्धाः । अस्मिन् पाठभागे प्रमुखान् नव अलङ्कारान् पठामः। ते समासोक्तिः, परिकरः, श्लेषः, अप्रस्तुतप्रशंसा, व्याजस्तुतिः, विरोधाभासः, काव्यलिङ्गम्, अर्थान्तरन्यासं चेति ।

# Keywords

अयमैन्द्री, सुधांशुकलितोतत्तंसः, उक्तिरर्थान्तरन्यासः स्यात्, समर्थनीयस्य अर्थस्य काव्यलिङ्गं, नानार्थसंश्रयः श्लेषः।

# Discussion

## 4.1 समासोक्तिः

**समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य च।**
**अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः।।**

यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाम्यबलाद् अप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः तत्र समासोक्त्यलङ्कारः। उदाहरणम् – अयमैन्द्रीति।

यत्र श्लिष्टैः विशेषणैः अप्रकृतार्थस्य बोधनं प्रकृतमर्थमवलम्ब्य व्यञ्जनया भवति तत्र समासोक्त्यलङ्कारः। यथोक्तं काव्यप्रकाशे- परोक्तिभेदकैः श्लिष्टैः समासोक्तिः। अतोऽत्र कार्यलिङ्गविशेषणैः प्रस्तुतेऽर्थे अप्रस्तुतार्थस्य समारोपः समासोक्तिरलङ्कारो भवति। यथा–

प्रकृते अप्रकृतस्य प्रतीतिः

**चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं**
**रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकचरः।**
**करं व्याधुन्वत्या पिबसि रतिसर्वस्वमधरं**
**वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती।।** (शाकुन्तलं.१.१४)

अत्र दृष्टिस्पर्शनमृदुकथनाधरपानरूपतथाभूतकार्येण मधुकरे प्रच्छन्नशृङ्गारिनायकसमारोपात् समासोक्त्यलङ्कारः। सारूप्यादपि समासोक्तिः दृश्यते। यथा वा –

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति।। (उत्तरराम.२.२७)

अत्र वनवर्णने प्रस्तुते तत्सारूप्यात् कुटुम्बिषु घनसंतानादिसमृद्ध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तान्तः प्रतीयते।।

### 4.2.परिकरः

प्रकृतार्थम् उपकरोतीति परिकरः

यत्र अभिप्रायमूलकैः विशेषणैः काचिदुक्तिः पुष्टा भवति तत्र परिकरालङ्कारः । अत एव उक्तं काव्यप्रकाशे – विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः।

अलङ्कारः परिकरः साभिप्राये विशेषणे।
सुधांशुकलितोतत्तंसस्तापं हरतु वः शिवः।।

अत्र सुधांशुकलितोतत्तंसः इति विशेषणं तापहरणसामर्थ्याभिप्रायगर्भम्। शिवस्य तापहरणे, मन्मथस्य कौमुतिकन्यायेन सर्वधन्विधैर्यभञ्जकत्वे शरीरसंरक्षणार्थं पापमाचरतां मूढत्वे, स्वस्य वर्णनीयराजगुणकथनाशक्तत्वे च वाच्य एव उपस्कारकत्वात्। अत एव व्यङ्ग्यार्थस्य वाच्यपरिकरत्वात् परिकर इति नामास्यालङ्कारस्य। यथा–

महौजसौ मानधना धनार्जिता
धनुर्भृताः संयति लब्धकीर्तयः।
न संहतास्तस्य न भिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्।।(किरातार्जुनीयं १.१९)

अत्र दुर्योधनं प्रति महाबलाः योद्धारः पक्षपातित्वेन वर्तन्ते। तेषां पुष्ट्यर्थं 'महौजसः' इति विशेषणं दत्तम्। अतः परिकरालङ्कारः परिलक्षितो भवति।।

### 4.3. श्लेषः

अनेकार्थगोचरः शब्दविन्यासः

नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयाश्रितः। अनेकार्थगोचरः शब्दविन्यासः श्लेषः। त्रिविधः भवति श्लेषः –

१.वर्ण्याश्रयः (प्रकृतानेकार्थविषयः)।

२.अवर्ण्याश्रयः (अप्रकृतानेकार्थविषयः)।

३.उभयाश्रयः (प्रकृताप्रकृतानेकार्थगोचरः, प्रकृताप्रकृतश्लेषः)।

### 4.3.1 वर्ण्यश्लेषः (प्रकृतश्लेषः)

**प्रकृतानेकार्थविषयशब्दविन्यासरूपः प्रकृतश्लेषः।** यथा –

प्रकृतानेकार्थविषय शब्दविन्यासरूपः प्रकृतश्लेषः।

सर्वदोमाधवः पायात् स योऽगंगामदीधरत्।
सर्वदः माधवः यः अगं गाम् अदीधरत् सः पायात् इति।।

अस्य सर्वाभीष्टप्रदाता कृष्णः रक्षतु यः अगं(पर्वतं – गोवर्धनपर्वतं) गां (पृथिवीं) च धृतवान् इत्येकः अर्थः कृष्णार्थे । अयं प्रकृतार्थः। सर्वदा उमाधवः पायात् (रक्षेत्) यः गङ्गामदीधरत्। उमाधवः उमायाः धवः भर्ता शिवः इति शिवपक्षे। अयमपि प्रकृतार्थः। अस्यां प्रार्थनायां प्रकृतयोः कृष्णशिवयोः स्तुतिः वर्तमानत्वात् प्रकृतश्लेषः। प्रकृतश्लेषस्य अपरमुदाहरणं यथा –

त्रातः काकोदरं येन द्रोग्धापि करुणात्मना।
पूतनामारणाख्यातः स मेऽस्तु शरणं प्रभुः।।

काचन प्रार्थना इयम्। येन करुणात्मना रामेण अदरः भयरहितः द्रोग्धापि द्रोहशीलः काकः रक्षितः, पवित्रनामधेयः युद्धे विख्यातः सः (रामः) मे शरणमस्तु इत्येकोऽर्थः। येन काकोदरः (सर्पः) कालियः रक्षितः, पूतनायाः मरणेन ख्यातः सः कृष्णः मे शरणमस्तु इत्यपरोऽर्थः। अत्र प्रकृतयोः उभयोः रामकृष्णयोः स्तुतिः वर्तमानत्वात् प्रकृतश्लेषः।।

### 4.3.2.अप्रकृतश्लेषः(अवर्ण्यश्लेषः)

**अप्रकृतानेकार्थविषयशब्दविन्यासरूपः अप्रकृतश्लेषः।** यथा –

अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना।

अप्रकृतानेकार्थविषय शब्दविन्यासरूपः अप्रकृतश्लेषः।

तव मुखं हरिणा (सूर्येण) अहितसक्तिना अब्जेन (कमलेन) तुल्यम् इत्येकोऽर्थः। त्वन्मुखं हरिणेन मृगेण अहितसक्तिना कृतसङ्गेन अब्जेन(चन्द्रेण) तुल्यमिति द्वितीयोऽर्थः। अत्र प्रकृते नायिकावर्णने अप्रकृतयोः उभयोः पद्मचन्द्रयोः वर्णनात् अप्रकृतश्लेषः। अप्रकृतश्लेषस्य अपरमुदाहरणं यथा –

नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः।
सदृशो वनवृद्धानां कमलानां त्वदीक्षणे बहुभिः।।

त्वदीक्षणे लुब्धैः मधुलोलुपैः भूरिशिलीमुखैः भ्रमरैः आकुलीभावं नीतानां वने (जले) वृद्धिं प्राप्तानां (कमलानां) सदृशे भवतः इत्येकोऽर्थः पद्मपक्षे।

त्वदीक्षणे लुब्धैः व्याधैः शिलीमुखैः बाणैः आकुलीभावं नीतानां वने अरण्ये वृद्धानां हरिणानां सदृशे भवतः इति हरिणपक्षे।

अत्र नायिकानेत्रेक्षणे उपमानयोः कमलहरिणयोः वर्णनात् अप्रकृतश्लेषः।।

### 4.3.3 प्रकृताप्रकृतश्लेषः(वर्ण्यावर्ण्यश्लेषः)

**प्रकृताप्रकृतानेकार्थगोचरः शब्दविन्यासः प्रकृताप्रकृतश्लेषः।** यथा –

उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः।

प्रकृताप्रकृतानेकार्थ गोचरः शब्दविन्यासरूपः प्रकृताप्रकृतश्लेषः।

उच्चरद् उद्गच्छद् बहुरक्तप्रवहमानं कीलालं (रक्तं) वाहिनीपतिः सेनापतिः शुशुभे इति प्रकृतार्थः। उच्चरद् बहुकीलालं जलं यस्य सः नदीनां पतिः समुद्रः शुशुभे इति अप्रकृतार्थः। अत्र क्लिष्टपदानां प्रकृताप्रकृतगोचरत्वात् प्रकृताप्रकृतश्लेषः। प्रकृताप्रकृतश्लेषस्य अपरमुदाहरणं यथा –

असावुदयमारूढः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य हृदयं मृदुलैः करैः।।

उदयमारूढः (अभिवृद्धिं प्राप्तः) रक्तमण्डलः (प्रजाभिरनुक्तवान्) असौ राजा मृदुलैः करैः (अल्पैः ग्राह्यधनैः) लोकस्य हृदयं हरति (आवर्जयति) इति प्रकृतार्थः। उदयगिरिमारूढः रक्तमण्डलः(अरुणमण्डलः) राजा (चन्द्रः) मृदुलैः करैः (मृदुलकिरणैः) लोकस्य हृदयं हरति (आकर्षयति) इति अप्रकृतार्थः। अत्र प्रकृते राजवर्णनायां अप्रकृतस्य चन्द्रवृत्तान्तस्य वर्णनात् प्रकृताप्रकृतश्लेषः।।

## 4.4. अप्रस्तुतप्रशंसा

अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।

अप्रस्तुतार्थस्य प्रशंसा वर्णना

एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते।।

यत्र अप्रस्तुतवृत्तान्तवर्णनं प्रस्तुतवृत्तान्तावगतिपर्यवसायि तत्र अप्रस्तुतप्रशंसालङ्कारः। अप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतावगतिश्च प्रस्तुताप्रस्तुतयोः संबन्धे सति भवति। सारूप्ये तु एको भेदः इत्यस्याः पञ्च प्रकाराः। यदाहुः –

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा।। इति।

तत्र सारूप्यनिबन्धनाऽप्रस्तुतप्रशंसोदाहरणम् 'एकः कृती' इति।

यत्र अप्राक्साहित्यः वस्तुनः वर्णनं प्रकृतार्थमूलकं भवति तत्र अप्रस्तुतप्रशंसा अलङ्कारः। अतः अप्राकरिणकस्याभिधानेन प्राकरिणकस्याक्षेपोऽप्रस्तुताश्रया। यथा –

गान्धर्वेण विवाहेन बह्व्योऽथ मुनिकन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः।।

अत्र राज्ञा (दुष्यन्तः) शकुन्तलया सह गन्धर्वेण विवाहेच्छुकः, तत्समर्थनश्च अप्रस्तुतप्रशंसया विदधत दोषरहितो प्रशस्तोऽयं विवाहः इति स्थापयति । अतः अप्रस्तुतप्रशंसाऽलङ्काराश्च।।

## 4.5 व्याजस्तुतिः

निन्दया स्तुतिरूपार्थात्, स्तुत्या च निन्दार्थात् व्याजस्तुतिः

**उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः।**
**कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवम्।।**

निन्दया स्तुतेः स्तुत्या निन्दाया वा अवगमनं व्याजस्तुतिः। 'कः स्वर्धुनिः' इत्युदाहरणे विवेको नास्तीति निन्दाव्याजेन 'गङ्गा सुकृतिवदेव महापातकादिकृतवतोऽपि स्वर्गं नयतीति व्याजरूपया निन्दया तत्प्रभावातिशयस्तुतिः। निन्दाव्याजेन स्तुतेः स्तुतिव्याजेन निन्दायाश्च अवगमने व्याजस्तुतिरिति निष्कर्षः । तथा च व्याजस्तुतिः द्विविधा –

१.निन्दया स्तुतिः। २.स्तुत्या निन्दा चेति। क्रमेण, व्याजेन (निन्दाव्याजेन) स्तुतिः, व्याजरूपा स्तुतिः इति च व्युत्पत्तिः व्याज-स्तुतिशब्दस्य बोध्या।

4.5.1.निन्दया स्तुतेरवगमनरूपायाः व्याजस्तुतेः उदाहरणम् –

**कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवम् ।**

हे स्वर्धुनि गङ्गे ते विवेकः कः ? नास्ति ते विवेकः (यस्मात्) त्वं पापिनः दिवं स्वर्गं नयसे इत्यत्र तव विवेको नास्तीति निन्दाव्याजेन महापातकिनामपि पापप्रशमनेन स्वर्गप्रदानशक्ता इति गङ्गायाः प्रभावातिशयस्तुतिरेव क्रियते इति व्याजस्तुतिः।

4.5.2.स्तुत्या निन्दावगमनरूपायाः व्याजस्तुतेः उदाहरणम् –

**साधु दूति पुनः साधु कर्तव्यं किमतः परम्।**
**यन्मदर्थं विलूनासि दन्तैरपि नखैरपि।।**

हे दूति साधु, पुनः साधु (त्वया प्रशंसार्हं किमपि कृतं, तस्मात्) श्लाघनीयामि । अतः परं कर्तव्यं किमस्ति? यद्यस्मात् त्वं मदर्थं नखैः दन्तैश्च विलूना विदारिता असि इत्यत्र नायकं समानेतुं प्रेषिता दूती स्वयं तत्सम्भोगमनुभूय समागता शरीरे परिदृश्यमानदन्तनखक्षतैः ज्ञाततत्त्वया नायिकया एवं स्तुतिव्याजेन निन्द्यते। तस्मात् स्तुत्या निन्दापर्यवसायिनी व्याजस्तुतिरियम्।।

## 4.6 विरोधाभासः

> अभासत्वे विरोधस्य विरोधाभास इष्यते।
> विनापि तन्वि ! हारेण वक्षोजौ तव हारिणौ।।

विरोधस्य आभासत्वे आपाततः स्फुरणे, पर्यवसाने तत्परिहारे च सति विरोधाभासो नाम अलङ्कारः इष्यते। हे तन्वि तव वक्षोजौ स्तनौ हारेण विनापि हारिणौ हारवन्तौ मनोहारिणौ च इत्यत्र हारेण विनापि हारिणौ इति विरोधः स्फुरति, ततश्च हारिणौ इत्यस्य मनोहारिणौ इत्यर्थयोजनया विरोधपरिहाराद् विरोधाभासः।।

## 4.7 काव्यलिङ्गम्

> **समर्थनीयस्य अर्थस्य काव्यलिङ्गं समर्थनम्।**
> **जितोऽसि मन्द कन्दर्प, मच्चित्तेऽस्ति त्रिलोचनः।।**

यत्र एकः शब्दार्थः अन्यस्य कारणं भवति तत्र काव्यलिङ्गम्

समर्थनीयस्य अर्थस्य समर्थनं काव्यलिङ्गम्। हेतुना वाक्यं समर्थयति तर्हि काव्यलिङ्गालङ्कारः। 'जितोऽसि मन्द' इत्युदाहरणम्। हे मूढ कन्दर्प, कामदेव, त्वं जितोऽसि। मम चित्ते त्रिलोचनः शिवः अस्ति। अत्र मच्चित्ते मदनदाहकः शिवः अस्ति इति वाक्येन त्वं जितोऽसि इति कार्यस्य समर्थनात् काव्यलिङ्गम्। काव्यलिङ्गस्य अपरमुदाहरणम् –

> भस्मोद्धूलन भद्रमस्तु भवने रुद्राक्षमाले शुभे हा सोपानपरम्परे
> गिरिसुताकान्तालयालङ्कृते।
>
> अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि
> मोक्षनामनि महामोहे निलीयामहे।।

भस्मरेणुयुक्त हे रुद्राक्षमाले, शुभकरी, भवत्वै भद्रमस्तु, हे सोपानपरम्परे, शिवालयालङ्कृते, तुभ्यं नमः। भवद्भ्यः पूजया परमानन्दप्रदे महामोहे मोक्षे वयं विलयं प्राप्नुमः। अत्र युष्मत्सपर्यासुखालोकच्छेदिनि इतिपदेन

हेतुना मोक्षस्य महामोहत्वं समर्थयति। अत्र हेतुना वाक्यसमर्थनात् काव्यलिङ्गालङ्कारः। इदं पदार्थहेतुकं काव्यलिङ्गम्।।

### 4.8 अर्थान्तरन्यासः

**उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः।**

सामान्यविशेषयोः उक्तिः अर्थान्तरन्यासः। तयोश्च एकं प्रस्तुतम्, अपरम् अप्रस्तुतम् । ततश्च विशेषे प्रस्तुते तेन सह अप्रस्तुतसामान्यस्य न्यासः एकः अर्थान्तरन्यासः। सामान्ये प्रस्तुते तेन सह विशेषस्य न्यासः द्वितीयः। एवमर्थान्तरन्यासो द्विविधः -

मुख्यार्थेन संबद्धः अर्थान्तरस्य प्रतीतिः

१.सामान्येन विशेषसमर्थनरूपस्य अर्थान्तरन्यासस्य उदाहरणम्

**हनुमानमब्धिमतरद् दुष्करं किं महात्मनाम्।**

अत्र हनुमान् अब्धिं समुद्रम् अतरत् इति विशेषः महात्मनां दुष्करं किं ? इति सामान्येन समर्थ्यते।

२.विशेषेण सामान्यसमर्थनरूपस्य अर्थान्तरन्यासस्य उदाहरणम्

**गुणवस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।**
**पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते।।**

स्वल्पोऽपि निकृष्टोपि गुणवद्वस्तुसंबन्धात् गौरवं याति प्राप्नोति। पुष्पमालायाः अनुषङ्गेण संपर्केण सूत्रं तन्तुः शिरसि धार्यते इत्यत्र निर्गुणस्य गुणवत्संपर्कात् गौरवप्राप्तिरूपं सामान्यं प्रस्तुतं,तन्तोः पुष्पमालासंबन्धेन शिरसा वहनरूपगौरवप्राप्तिरूपेण अप्रस्तुतविशेषेण समर्थितमिति अर्थान्तरन्यासलक्षणसमन्वयः।

## Summarised Overview

समासेन नाम संक्षेपेण उक्तिः समासोक्तिः। प्राकरणिकेन यदि अप्रस्तुतवृत्तान्तस्य प्रतीतिः भवति तदा समासोक्तिरलङ्कारः भवति। यत्र केनापि विशेषप्रयोजनेन विशेषस्य प्रयोगः क्रियते तत्र परिकरालङ्कारः। श्लिष्टैः पदैः अनेकार्थाभिधाने श्लेष इष्यते।यत्र यस्मिन् काव्ये वर्णनं (अप्रस्तुतरूपं) प्रस्तुतानुगा प्रस्तुतवर्णनप्रतीतिपर्यवसायि भवति सा वर्णना अप्रस्तुतस्य प्रशंसेति व्युत्पत्या अप्रस्तुतप्रशंसालङ्कारः। यदि निन्दया स्तुतिरूपार्थः स्तुत्या च निन्दारूपार्थस्य प्रतीतिः भवति तदा व्याजस्तुतिः। विरोधस्य आभासत्वे विरोधाभासः। यत्र शब्दार्थः नवीनस्य अर्थस्य बोधकः स्यात् तत्र काव्यलिङ्गालङ्कारः। एकस्मात् अर्थात् अर्थान्तरस्य प्रतीतिरेव अर्थान्तरन्यासः।।

# Assignments

1. परिकरालङ्कारस्य लक्षणम् उदाहरणं च प्रदर्शयत।
2. व्याजस्तुतिरलङ्कारे किं भवति?
3. 'अयमैन्द्रीमुखं पश्य रक्तश्चुबति चन्द्रमाः' इत्युदाहरणे लक्षणसमन्वयं कुरुत ।

**निबन्धात्मकम् उत्तरत -**

1. अप्रस्तुतप्रशंसासमासोक्त्यलङ्कारयोः कः भेदः? विशदयत।
2. श्लेषः कतिविधम्? विशदयत।

# Suggested Readings

1) संस्कृतसाहित्यविमर्शः,कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, मयराष्ट्रनगरम्, उत्तरप्रदेशः ।
2) संस्कृतनिबन्धमञ्जूषा,डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी ।
3) A Short History Of Sanskrit Literature T.K.Ramachandra Iyer,R.S.Vadhyar& Sons, 1977.

# References


1. कुवलयानन्दः, अप्पय्यदीक्षितः,चौखम्बाविद्याभवन्,बनारस्।
2. संस्कृतशास्त्रमञ्जूषा, डा.उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन् , वाराणसी।


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg.No................** **QP CODE..................**

**Name..................**

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE -3 - M23SN03DC- काव्यशास्त्रम्-1**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

---

सर्वेप्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या। **(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION- A

## (प्रथमोभागः)

**I.** एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5x2=10)**

**(Answer any five Questions in a Paragraph)**

1. प्रस्तावनायाः पञ्च भेदाः के?
2. काव्यफलानि कानि ?
3. अङ्कावतारं निरूपयत।
4. का नाम चूलिका ?
5. भाणरूपकस्य सविशेषताः काः ?
6. वीथिं विशदयत ?
7. 'मदेन भाति कलभः प्रतापेन महीपतिः'। अलङ्कारं विशदयत ।
8. स्पृशन्ति शरवत्तीक्ष्णाः स्तोकमन्तर्विशन्ति च ।

   बहुस्पृशाऽपि स्थूलेन स्थीयते बहिरश्मवत् ॥ श्लोकं व्याख्यात।

## SECTION –B

(द्वितीयोभागः)

**II.** एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत। **(6 x 5=30)**

**(Answer any Six Questions in a page)**

9. वृत्तीः निरूपयत।
10. प्रसिद्धाः कति वृत्तयः? आरभटीं विशदयत।
11. मुखसन्धीं प्रतिपादयत।
12. भाषाविभागान् विशदयत।
13. अर्थप्रकृतेः भेदाः निरूपयत।
14. समवकारलक्षणं निरूपयत।
15. साहित्यदर्पणोक्तं प्रहसनमधिकृत्य टिपणीं लिखत।
16. स्वभावोक्तिं विशदयत।
17. 'तडिद्गौरी' इत्यत्र कीदृशी लुप्तोपमा? विशदयत।
18. व्यायोगलक्षणं सोदाहरणं स्वभाषया विशदयत।

## SECTION –C

(तृतीयो भागः)

**III.** केषाञ्चिद्द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। **(2x15=30)**

**(Write an essay on any two of the following)**

19. 'वाक्यं रसात्मकं काव्यम्'- विश्वनाथमतमनुसृत्य विशदयत।
20. उपमा विशदय्य तस्याः भेदान् सोदाहरणं विशदयत।
21. अर्थोपक्षेपकाः विशदयत।
22. उपरूपकाणि अधिकृत्य निरूपयत।

Model Question Paper (SET – B)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No:............** **QP CODE.................**

**Name..................**

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE -3- M23SN03DC- काव्यशास्त्रम्-1**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या। **(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION-A

**(प्रथमोभागः)**

**I.** एकखण्डिकया केषाश्चित्पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5x2=10)**

**(Answer any five Questions in a Paragraph)**

1. काव्यस्य चतुर्वर्गसाधनत्वं निरूपयत।
2. कार्यस्य पञ्च अवस्थाः काः?
3. महानाटकलक्षणं किम्?
4. अङ्गनिरूपणं विशदयत।
5. त्रिगतमित्यत्र किं स्वरूपं साहित्यदर्पणे निर्णीतम् ?
6. प्रकरणं विशदयत ?
7. स्थिरा शैली गुणवतां खलबुध्या न बाधते।

   रत्नदीपस्य हि शिखा वात्ययापि न नश्यते।। अलङ्कारं निश्चिनुत।
8. उपमालङ्कारं सोदाहरणं लिखत।

## SECTION –B
(द्वितीयोभागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**
**(Answer any Six Questions in a page)**

9. विष्कम्भकं निरूपयत।
10. प्रस्तावनायाः भेदान् विशदयत।
11. अर्थप्रकृतेः भेदाः कानि? विशदयत।
12. निर्वहणसन्धिं अङ्गानि च निरूपयत।
13. आरभटीवृत्तिं निरूपयत।
14. अङ्कस्य लक्षणं सोदाहरणं विशदयत।
15. गण्डनामकं वीथ्यङ्कं व्याख्यायताम्।
16. 'शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः'अलङ्कारं विशदयत।
17. प्रतिवस्तूपमालङ्कारम् उदाहरणसहितं प्रतिपादयत।
18. रूपकालङ्कारं विशदयत।

## SECTION –C
(तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. कौशिकीवृत्तिं निरूपयत।
20. अर्थोपक्षेपकाः के? प्रतिपादयत।
21. का नाम उत्प्रेक्षा सभेदं विशदयत।
22. प्रहसनस्वरूपम् उदाहरणसहितं विशदयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

# काव्यशास्त्रम्

Course Code: M23SN03DC

SREENARAYANAGURU
OPEN UNIVERSITY

ISBN 978-81-966907-0-0

9 788196 690700

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841